एवं भरतैरावतेष्वपि सुषमसुषमायां देवकुरूत्तरकुरुवत्, सुषमायां च रम्यक्हरिवर्षवत्, सुषमदुषमायां च हैमवतैरण्यवत् च नराः सुखमनुभवन्तीति । "तेषां मृतमिथुनशरीराणि महाखगाः तीडकाष्टमिवोत्पाट्य सद्यश्चिक्षिपुरम्बुधौ ।।१।। इति ऋषभचरित्रे । युगलिकसुखं सर्वं पूर्वपुण्यतः, तेषां पुण्यस्वरूपं तु पद्मचरित्रे । श्रेणिकप्रश्नानन्तरं श्रीगौतमस्वामिनोक्तं यथा –

"तो भणइ गणहरिंदो, जे इत्थ[१] उज्जुआ णरा भद्दा । ते भोगभूमिसुक्खं, लहंति साहुप्पयाणेणं ।।१।।"

१. इत्थं प, छ ।

"जे कुच्छिएसु दाणं दिंति, सुहभोगकारणनिमित्तं । ते कुंजरा य जाया, भुंजंति ह दाणजं सुक्खं ।।२।।"

"इक्कम्मि जह तलाए, गोसप्पेणं च पाणिअं पीअं । सप्पे परिणमइ विसं, धेणुसु खीरं समुब्भवइ ति ।।३।।"

"तह निस्सीलसुसीले, दिन्नं दाणं फलं अफलयं च । होही परम्मि लोए, पत्तविसेसेण से पुण्णं ।।४।।"

इति साधुदानपुण्येन ते युगलिका उक्तं सुखमनुभवन्तीति । अथ चक्रिसुखस्वरूपं दर्शयति- **'चक्किणो हरिणो रयणाइअं'** ति, चक्किणो त्ति चक्रवर्तिनो भरतसगरादयस्ते च यद्रत्नादिजं नवनिधिचतुर्दशरत्नसंभवं सुखमनुभवन्ति तदपि पूर्वपुण्यानुभावतः, तत्र तेषां नवनिधिस्वरूपं यथा –

"नेसप्पे१ पंडुअए२, पिंगलए३ सव्वरयण४ महपउमे५ । काले अ६ महाकाले७, माणवग८ महानिही९ संखे ।।१।।" [प्रव.सारो. १२१८]

एतेषु निधिषु कल्पपुस्तकानि शाश्वतानि सन्ति । तेषु च विश्वस्थितिराख्यायते । तदाह –

"नैसप्पम्मि निवेसा, गामागर-णगर-पट्टणाणं च । दोणमुहमंडबाणं, खंधाराणां गिहाणं च ।।२।।"

[तित्थोगा० पय० ११३२] [स्थानाङ्गे नवमस्थाने सू. ६७३]

तत्र ग्रामो वृत्त्याश्रितः, आकरो लवणाद्युत्पत्तिस्थानम्, नगरं राजधानी, जलस्थलनिर्गमप्रवेशं द्रोणमुखम्, मडम्बं सार्धद्विगव्यूतान्तर्ग्रामान्तररहितम्, स्कन्धावारः कटकनिवेशस्तदादीनां संनिवेशाः स्थापना आख्यायन्ते ।"

"गणियस्स य गीयाणं, माणुम्माणस्स जं पमाणं तु । धन्नस्स य बीआणं, उप्पत्ती पंडुए भणिया ।।३।।" [प्रव.सारो १२२०]

गणितं दीनारादि, [बीजानां तन्निबन्धनभूतानां] मानं सेतिकादि, उन्मानं तुलाकर्षादि तेषां प्रमाणम्, धान्यबीजानां शाल्यादीनां देशकालाद्यौचित्येन निष्पत्तिर्वर्णिता ।।३।।

"सव्वाभरणाण विही, पुरिसाणं जा य महिलाणं । आसाण य हत्थीण य, पिंगलगनिहिम्मि सा भणिया ।।४।।

"रयणाइं सव्वरयणे - चउदसपवराइं चक्कवट्टीणं । उप्पज्जंती एगिंदियाइं पंचेदियाइं च ।।५।।" [प्रव.सारो. १२२१-१२२२]

उत्पद्यन्ते इति तदुत्पत्तिस्तत्राख्यायन्ते । अन्ये त्वेवमाहुः - एतत्प्रभावात् स्फातिमन्ति स्युरित्यर्थः ।

"वत्थाण य उप्पत्ती, निप्फती चेव सव्वभत्तीणं । रंगाण य धाऊण य, सव्वा एसा महापउमे ।।६।।" [प्रव.सारो. १२२३]

भक्तयो वस्त्रादिगतचित्रविशेषाः रङ्गा माञ्जिष्ठकौसुम्भादयः । धातवो लोहादयः 'धोव्वाणय' त्ति पाठे वस्त्रादिधावनविधीनाम् ।

"काले कालनाणं१, भव्वपुराणं च तिसु वि वंसेसु*। सिप्पसयं२ कम्माणि३ य, तिन्नि पयाए हियकाराइं ।।७।। [प्रव.सारो. १२२४]

कालज्ञानं ज्योतिःशास्त्रानुगं तीर्थकृच्चक्रिवासुदेववंशेषु त्रिष्वपि भाव्यं भाविपुराणमतीतमुपलक्षणाद् वर्तमानं च तासु सुकालेसु त्ति पाठान्तरम् ।

---

* तीसु वासेसु इति स्थानाङ्गे = अनागतवर्षत्रयविषयमतीतवर्षत्रयविषयं चेति ।

"लोहस्स य उप्पत्ती, होइ महाकाल आगराणं च । रूप्पस्स य सुवण्णस्स य, मणिमोत्तियसिलपवालाणं ।।८।।" [प्रव.सारो. १२२५]

लोहस्य नानाभेदस्य तथा रूप्यादीनामाकरस्य चोत्पत्तिराख्यायते, तत्र शिलाः स्फटिकाद्याः ।

"जोहाण य उप्पत्ती, आवरणाणं च पहरणाणं च । सव्वाण य जुद्धनीई, माणवगे दंडनीई य ।।९।।" [प्रव.सारो. १२२६]

आवरणानि खेटगादीनि, युद्धनीतिर्व्यूहरचनादिरूपा ।

"नट्टविही नाडयविही, कव्वस्स य चउव्विहस्स उप्पत्ती । संखे महानिहिम्मि, तुडिअंगाणं च सव्वेसिं ।।१०।।" [प्रव.सारो. १२२७]

नृत्यस्य नृत्यकरणस्य नाटकस्याभिनेयप्रबन्धप्रपञ्चनप्रकारस्य विधिः । संस्कृतप्राकृतापभ्रंशसंकीर्णभाषाबद्धस्य गद्य-पद्यगेय वर्णपद[१]बद्धस्य वा काव्यस्यातोद्यानां चोत्पत्तिराख्यायते । अन्ये त्वाहुः - एते पूर्वोक्ताः सर्वेऽप्यर्था नवनिधिषु साक्षादेवोत्पद्यन्ते । स्थानाङ्गे ९ स्थाने तु चक्रवर्तिराज्योपयोगिद्रव्याणि सर्वाण्यपि नवसु निधिष्ववतरन्ति नवनिधानतया व्यवह्रियन्ते इत्यर्थः । तत्र ग्रामादिनिवेशा नैसर्पनिधितया व्यवह्रियन्ते इत्यादि स्थानाङ्गे –

"चक्कट्ठपइट्ठाणा, अट्ठुस्सेहा य नव य विक्खंभा । बारदीहा मंजूससंठिया जण्हवीइ मुहे ।।११।।"

"वेरुलियमणिकवाडा, कणगमया विविहरयणपडिपुन्ना । ससि-सूरचक्कलक्खण, अणुसमवयणोववत्तीआ ।।१२।।" [प्रव.सारो. १२२८-१२२९]

१. चौर्णपद प्, छ ।

शशिसूरचक्राकाराणि लक्षणानि येषाम्, अनुरूपाः समा वदनोपपत्तिः द्वारघटना येषाम्, स्थानाङ्गे तु- **अनुसमजुगबाहुवयणत्ति** पाठः । तत्र अनुरूपाऽविषमा यूपाकाराः, वृत्तत्वाद् दीर्घत्वाच्च बाहवो द्वारशाखा मुखे येषाम्,

"पलिओवमं ठिईआ, णिहिसरिसनामा य तत्थ खलु देवा । जेसिं ते आवासा, अक्किजा आहिवच्चा य ।।१३।।" [प्रव.सारो. १२३०]

नवनिधयः आवासा आधिपत्याय - आधिपत्यनिमित्तमक्रयानम्, तेषामाधिपत्यं न क्रयेण लभ्यमिति । अथ चतुर्दश रत्नलक्षणं किञ्चित् प्रकाश्यते, तत्र -

"सेनापति यः सदलनायको गङ्गासिन्धुपरपारविजयी १ । गृहपतिश्चक्रिगृहोचितकर्तव्यतापरः सर्वधान्यानां स्वादूफलानां[१] शाकविशेषाणां निष्पादकः २ । पुरोहितः शान्तिकर्मादिकृत् ३ । तुरगगजौ प्रकृष्टवेगविक्रमौ ४-५ । वर्द्धकिः गृहनिवेशादिकृत्, उन्मग्ननिमग्नयोर्नद्योः काष्टमयसेतुबन्धकृत् ६ । स्त्री अत्यद्भुतकामसुखनिधानम् ७ । चक्रं समस्तायुधातिशायि दुर्दमरिपुजयकृत् ८ । छत्रं च चक्रिहस्तस्पर्शप्रभावजातं द्वादशयोजनायामविस्तारि वैताढ्योत्तरभागम्लेच्छाराधितमेघकुमारमुक्ताम्बुनिवारकं सहस्रकाञ्चन-शिलाकामण्डितं सुवर्णदण्डं तपनातपवायुवृष्टिप्रभृतिनिवारकं ९ । चर्मरत्नं च चक्रिहस्तस्पर्शजातं द्वादशयोजनायामविस्तारं प्रातरुत्तापराह्नशाल्यादिसंपत्तिकम् १० । मणिरत्नं त्र्यस्रं षडस्रं यथाक्रममूर्ध्वाधःछत्ररत्न-चर्मरत्नयोरन्तराले छत्रतुम्बे न्यस्तम्, द्वादशयोजनानि

१. स्वादूपलानां प, छ ।

समस्तसैन्यप्रकाशकं तमिस्राखण्डप्रपातगुहयोश्च प्रविशतश्चक्रिणो हस्तिरत्नदक्षिणशिरसि बद्धं पूर्वापरपुरोरूपासु त्रिषु दिक्षु निबिडतमस्तोमापहारि यस्य वा हस्ते मणिबन्धादौ बध्यते शिरसि वा बध्यते, तस्य समस्तरोगोपद्रवान् अपहरति, रणे चावध्यः स्यात्, सर्वभयोज्झितश्च तस्मिंश्च मणिबन्धादौ स्थिते अवस्थितकेशनखाश्च स्युः ११ । काकिणीरत्नमष्टसौवर्णिकं समचतुरस्रं तस्य रुचयोऽपि द्वादशयोजनानि विसर्पन्ति यच्च चक्री सर्वकालं स्कन्धावारे रात्रौ दिनालोकभूतं प्रकाशं करोति, यत्प्रभावात् चक्री तमिस्रायां पूर्वपश्चिमभित्तौ प्रत्येकं योजनान्तरितानि पञ्चधनुःशतायामविष्कम्भाण्युभयपार्श्वयोर्योजनोद्योतकारीणि वृत्तहिरण्यरेखारूपाणि गोमूत्रिकयैकैकं योजनान्तरितानि एकैकस्यां २५ एकस्यां २४ मण्डलानि लिखन् व्रजति तानि च चक्रवर्तिपदं पालयन्ति तावदवतिष्ठन्ति गुहापि तथैवोद्घाटिता तिष्ठति । उपरते तु चक्रणि सर्वमपि उपरमते १२ । खड्गरत्नं-संग्रामभूमावप्रतिहतशक्तिः १३ दण्डरत्नं तु रत्नमयं पञ्चलताकं सर्वशत्रुविनाशकं विषमोन्नतप्रदेशेषु समत्वकारि शान्तिकरं चक्रिणो हि वाञ्छितमनोरथपूरकं दिव्यमप्रतिहतं प्रयत्नाच्च व्यापार्यमाणं योजनसहस्रमधो याति १४ । एतानि प्रत्येकं यक्षसहस्राधिष्ठितानि । सप्त-पञ्चेन्द्रियाणि सप्त एकेन्द्रियाणि पृथिवीपरिणामरूपाणि भवन्ति । चक्रिणः सर्वर्द्धिर्यथा -

"चउद्दसरयणबत्तीससहस्सदेसनिवणयरा । मयगलतुरग-रहवर निसाणचुओलसीइ लक्खाणि ।।१।।"

चतुर्दश रत्नानि १४, ३२००० राजानः, ३२००० नगराणि, ८४००००० हस्तिनः, ८४००००० अश्वाः, ८४००००० रथाः, ८४००००० निशानानि ।

"जक्खं सहस्स सोलस मडंबक्कब्बडसहस्सचउवीसा । रयणायरदीवंतरखेडगसोलसहस्साइं ।।२२।।"

१६००० यक्षाः षोडशसहस्राः । १६००० मडम्बषोडशसहस्राः । २४००० कर्बटानि, १६००० रत्नाकरषोडशसहस्राः द्वीपान्तरषोडशसहस्राः, १६००० खेटकषोडशसहस्राः १६००० ।

"अडयालीससहस्सा, दोणमुहा तह चउसट्ठिसहस्सा य । कल्लाणमहकल्लाणकारया तह य रमणीओ ।।३।।"

४८००० द्रोणमुखाः, ६४००० कल्याणकारकाः, ६४००० महाकल्याणकारकाः, ६४०००, रमण्यः

"कमसो चउदस छप्पन्न, छत्तीससहस्स बत्तीसं । संबाहपिंडगणिया, वेलाउलनाडयसहस्सा ।।५।।"

१४००० सहस्राः संबाधकाः, ५६००० पिण्डगणिकाः, ३६००० वेलाकूलानि, ३२००० नाटकसहस्राणि ।।६।।

"गोकुलकोडिहलकोडितिन्नि दसकोडिधयपडागाओ । छन्नवइकोडिपाइक्क-गामाहिवसुछट्ठखंडाइ ।।७।।"

३ त्रिकोटिगोकुलानि, ३ त्रिकोटिहलानि १० कोटिध्वजपताका, ९६ कोटिपदातयः ।।९६ कोटिग्रामाधिपतयः, षट्खण्डाः ।

"नवनवइनवइछपन्नबावत्तरसहस्साण । देसंतरहेमागर अंतरदीवा य पुरवरा।।१०।।

९९००० देशान्तराणि, ९०००० हेमाकराः, ५६ अन्तर्द्वीपाः, ७२००० पुरवराणि ।

"तित्तिओ कोडिनिओगी, अट्ठारस कोडितुरयसामन्ना । भोअणठाणा तिलक्खं, पणलक्खं दीवधरगाणं ।।"

"आउज्झं तियलक्खा, सरीरमद्दाण कोडिछत्तीसा । छत्तीसकोडि आहरण, धारया सूचकारी य ।।"

"संति संवाहगा उ, कोडी छत्तीस परिसरिद्धिं । भुंजति चक्कवट्टी, भरहाइया य पुण्णेणं ।।"

तत्र चक्रवर्तित्वं हि सम्यग्दृष्टय एव निवर्तयन्ति । चक्रवर्तिनां जघन्यमायुः सप्तवर्षशतानि, उत्कृष्टं चतुरशीतिपूर्वलक्षाणि । अथ **'हरिणो'** त्ति पयं हरिणो वासुदेवा अपि त्रिखण्डराज्यं ऋद्धिसुखं रत्नादिसुखं च पूर्वपुण्येनेति । तेषां रत्नानि चक्र-खड्ग-धनुर्मणयः प्रतीताः, वनमाला सदाप्यम्लाना देवार्पिता, गदा कौमोदकी प्रहरणविशेषः, शङ्खः पाञ्चजन्यः १२ योजनविस्तारिध्वान इति । तथा च तेषां देवसाहाय्यदेवद्रुमचिन्तामणिप्रमुखप्राप्तिः, सुवर्णपुरुषमन्त्रसिद्ध्यादिमहर्द्धिप्राप्तिश्च पुण्येनैव भवन्ति । अन्ये पुण्याढ्या नरेन्द्रादिमहाराजानः यत् सुखमनुभवन्ति तदपि पूर्वकृतानुभावत एव, तथा सुरा अपि चतुर्विधा भवनपत्यादिदेवा अपि यद् वाञ्छितं सुखमनुभवन्ति तदपि पूर्वपुण्येनेति तत्र देवसुखानि । यदुक्तं च –

"दिव्वालंकारविभूसणाइ रयणुज्जलाणि य घराइं । रूवं भोगसमुदओ, सुरलोगसमो कओ इहयं ।।१।।"

"देवाण देवलोए जं सुक्खं, तं नरो सुभणिओ वि । न भणइ वाससएण, वि जस्स वि जीहासयं हुज्जा ।।२।।"

[उप.मा. २७७-२७८]

इति जुयलया त्ति दीपकार्थः ।।९८।। अथ पुण्यबन्धहेतुं पृच्छति –

केण हेउवरेण य, पाणिणो तमऊलं किल पुण्णभरं भवे । कह कुणंति सुहं दीह-माऊयं सुमणओ मुणिसंघसुदाणओ ।।९९।।

भगवन् ! केन हेतुवरेण केन प्रधानहेतुना प्राणिनो जीवस्य, प्राणा विद्यन्ते यस्य स प्राणी तस्य प्राणिनस्तं युगलिकादिसुखहेतु पुण्यभरं सुकृतसंचयं भवे संसारे भवेद् वा स्यादिति प्रश्नः । तथा च प्राणिनो जीवा भव्यात्मानः अतुलमसाधारणं शुभं दीर्घायुः सुदीर्घजीवितं कथं कुर्वन्तीति प्रश्नः । गुरुप्रतिवचनं **'सुमणओ'**त्तिसुमनसः शुभभावतः मुनिसंघदानतः मुनिगणदानतः अथवा मुनिदानतः साधुदानतः, संघदानतस्तत्र संघः साधुसाध्वीश्रावकश्राविकारूपचतुर्विधः[१] संघस्तस्य भक्तितो वा विना भावं तु दानादीनि निःफलानि, यत उक्तं च –

"घनं दत्तं वित्तं जिनवचनमभ्यस्तमखिलं, क्रियाकाण्डं चण्डं रचितमवनौ सुप्तमसकृत् ।
तपस्तप्तं तीव्रं चरणमपि चीर्णं चिरतरं, न चेत् चित्ते भावस्तुषवपनवत् सर्वमफलम् ।।१।।" (सुक्तिमुक्ता० ८८)

सुभावदाता तु इति भावयति, यथा –

"धन्योऽहं मम मन्दिरं वरतरं पुण्यं धनं मामकं, श्लाघ्यं जन्म सुवासरोऽद्य यदयं सर्वज्ञमार्गानुगः ।"
आयातो मुनिपुङ्गवो मम गृहं गृह्णाति चानुग्रहात्, किञ्चित् कश्चिदिति प्रमोदकलितो दत्तेऽत्र सौख्यं सुधीः ।।२।।"

१. श्राविकीरूप० प्, छ ।

संघभक्तिफलं च –

"यद्भक्तेः फलमर्हदादिपदवीमुख्यं कृषेः शस्यवत्, चक्रित्वत्रिदशादि तृणवत् प्रासङ्गिकं गीयते ।
शक्तिर्यन्महिमस्तुतौ न दधते वाचोऽपि वाचस्पतेः, संघः सोऽघहरः पुनातु चरणन्यासैः सतां मन्दिरम् ।।३।।" [सुक्तमुक्ता०२४]

तत्र शुभदीर्घायुर्हेतुश्च, उक्तं च भगवत्यां –

कहंन्नं भंते ! जीवा सुहदीहाउत्ताए कम्मं पकरोति, गोयमा ! तहारूवं समणं वा माहणं वा मणुण्णेणं असणपाणखाइमसाइमेणं पडिलाभेमाणे किं लभइ ? गोयमा ! समणोवासगस्स णं तहारूवं समणं वा माहणं वा जाव पडिलाभेमाणे तहारूवस्स समणस्स वा माहणस्स वा समाहिं उप्पाएइ, समाहिकारएणं तामेव समाहिं पडिलभेई, समणोवासगस्स णं भंते ! तहारूवं समणं वा जाव पडिलाभेमाणे किं चियइ ? गोअमा ! जीविअं चयइ । दुञ्चयचई दुक्करं करेई, दुल्लहं लहइ, बोहि बुज्झइ ततो पच्छा सिज्झइ जाव अंतं करेइ ।।९९।। [भ. ७ शते, उ. १] ।

अथ पुण्यभेदान् पृच्छति –

कइविहं भणिअं सुकयं, सुए णवविहं असणाइ मुणीण तं । मूलदेव व्व देइ य, जो जिणे चंदणुव्व हु तेसिमलं सुहं ।।१००।।

व्याख्या – भगवन् ! श्रुते जिनोक्तसिद्धान्ते कतिविधं कतिप्रकारं सुकृतं पुण्यं भणितं प्रकाशितं तमिति पूर्वोक्तफलविशेषं पुण्यमिति प्रश्नः, अथोत्तरः - तत्पुण्यं नवविधं नवप्रकारं अशनादिकम्, यत उक्तं तृतीयाङ्गे –

"णवविहे पुण्णे पन्नत्ते तं जहा अन्नपुण्णे पाणपुण्णे वत्थपुण्णे लयण्णपुण्णे सयणपुण्णे मणपुण्णे वयपुण्णे कायपुण्णे नमुक्करपुण्णे त्ति । (ठाणाङ्ग सू. ६७६) अस्य भावार्थो यथा - पुण्यं पात्राय अन्नादिदानाद् यस्तीर्थङ्करतादिपुण्यप्रकृतिबन्धः । अत्र पात्रं यथा -

"नवगुप्तिसनाथेन, ब्रह्मचर्येण भूषिताः । दन्तशोधनमात्रेऽपि, परस्वे विगतस्पृहाः ।।१।।"

"कृतकारितानुमतिप्रभेदारम्भवर्जिताः । मोक्षैकतानमनसो, यतयः पात्रमुत्तमम् ।।२।।"

"प्रशान्ततनुवाक्चित्ता, भैक्षमात्रोपजीविनः । रताः परहिते नित्यं, यतयः पात्रमुत्तमम् ।।३।।"

"सम्यग्दर्शनवन्तस्तु, देशचारित्रयोगिनः । यतिधर्मेच्छवः पात्रं, मध्यमं गृहमेधिनः ।।४।।"

सम्यक्त्वमात्र[१]संतुष्टा, व्रतशीलेषु निःस्पृहाः । तीर्थे प्रभावनोद्युक्तास्तृतीयं पात्रमुच्यते ।।५।।

अथ कुपात्रम् -

"कुशास्त्रपाठमात्रेण, सारम्भाः सपरिग्रहाः । तत्त्वतो नास्तिकप्रायाः, कुपात्रमिति शंसिताः ।।१।।"

१. मात्रे० पु ।

युधिष्ठिर-भीमसंवादे चोक्तं –

"मूर्खस्तपस्वी राजेन्द्र !, विद्वाँश्च वृषलीपतिः । उभौ तौ तिष्ठतो द्वारे[१], कस्य दानं प्रदीयताम् ।।१।।"

युधिष्ठिर उवाच –

"सुखसेव्यं तपो भीम !, विद्या कष्टदुराचरी । विद्वांसं पूजयिष्यामि, तपोभिः किं प्रयोजनम् ।।२।।"

कृष्णद्वीपा० –

न विद्यया केवलया, तपसा चापि पात्रता । यत्र वृत्तमुभे चेमे, तद्धि पात्रं प्रचक्षते ।।३।।

अत्र **मूलदेवव्व**त्ति-तदशनादिपात्राय मूलदेववत् । ये ददति तथा च ये जिने, चतुर्थ्यर्थे-सप्तमी, चन्दनावत् ददति, **'तेसिमि'**त्ति तेषां मुनिजनपात्रदातृणामलमत्यर्थं[२] सुखं स्यादिति । यत उक्तं च –

"असणपाणसुखाइमसाइमं, वसहिमासणमो सहसा । सयणपत्तमुहं समणा, जे दिंति सग्गसिवंपि लहंति ते ।।"

तथा च उक्तं – **"पढमं जईण दाऊणमप्पणा णमिऊण पारेई । असइ उ सुविहियाणं, भुंजेइ य कयदिसालोओ ।।"**

"साहूण कप्पणिज्जं, जं न वि दिण्णं कहं चि किंपि तयं । धीरा जहुत्तगारी, सुसावगा तं न भुंजंति ।।"

१. द्वारो प२ । २. ०मित्यर्थं प१ छ ।

"वसहीसयणासणभत्तपाणभेसज्जवत्थपत्ताइं । जइ वि न पज्जत्तधणो, थोवा वि हु थोवयं देई ।।" (उप.माला. २३८-२४०)

अत्र वसतिप्रमुखदानविषये कुरुचन्द्रादिसंबन्धा ज्ञेयाः, ते तु अग्रे दर्शयिष्यन्ते । अत्र दीपकोक्तमूलदेवसंबन्धो यथा, सोमशर्ममन्त्रिवद् वा तत्संबन्धो अर्हद्दत्तः ।।१००।। तत्रादौ जिनेभ्यो दानस्य सर्वोत्तमत्त्वेन तद्दातुरुदाहरणं दर्शयति-

"आवयासु वि संपयसंदणा, कासि सा दहिवाहणनंदणा ।
गोयमाइमुणीणणुवंदणा, साहुणी पढमा जिण चंदणा ।।१०१।।" दीवयं

भगवन् ! आपत्सु वि आपदागमेष्वपि संपदां स्यन्दता जिनदानवहनं **'का आसि'** का जाता इति प्रश्नः । अथोत्तरं – सा दधिवाहन-नृपपुत्री, सा च ततो जिनदानतः पश्चाच्चरमतीर्थपतिश्रीमहावीरस्य प्रथमा साध्वी, किं विशिष्टतमा ? वचनं चन्दनमिव वदनं यस्याः सा, पुनः किं विशिष्टा ? केवलरूपं चन्द्रमसो विमाने जाता । पुनः जने लोके चन्दनमिव शीतलत्वाच्चन्दना, आपदि जिनदानस्वरूपं यथा -

"कौशाम्बीत्यस्ति पूर्वप्रकपिशीर्षावलीदला । काञ्चनालयकिञ्जल्का, स्मेराब्जमिव या बभौ ।।१।।"

शतानीको नृपस्तत्र, यदनीकभयातुरः । सूरोऽपि सप्रतापोऽपि, नार्कोऽप्येकत्र तिष्ठति ।।२।।

राज्ञी मृगावती तस्य, सा कथं वर्ण्यते बुधैः । स्वर्भूर्भुवस्त्रयेऽप्यस्मिन्, यद्रूरूपस्यास्ति नोपमा ।।३।।

मन्त्री सुगुप्तमन्त्रोऽभूत्, सुगुप्तो नाम विश्रुतः । तद्भार्या श्राविका नन्दा, मृगावत्याः प्रिया सखी ।।४।।
तथ्यंवादी यथार्थाख्यस्तत्राभूद् धर्मपाठकः । आसीद् धनावहश्रेष्ठी, मूला तस्य च गेहिनी ।।५।।
विहरन्नागतस्तत्र, स्वामी वीरजिनेश्वरः । पोषकृष्णप्रतिपदि, गृह्णात्यमुमभिग्रहम् ।।६।।
द्रव्यतो राद्धकुल्माषाः, सूर्पकोणैकदेशगाः । क्षेत्रतो देहलीमध्यबहिःस्थैकैकपादका ।।७।।
कालतो विनिवृत्तेषु, सर्वभिक्षाचरेषु च । भावतो भूभुजः पुत्री, दैवाद् दासीत्वमीयूषी ।।८।।
गाढं निगडबद्धांघ्री[१], मुण्डिताखिलमस्तका । रुदत्यतिक्षुधाक्रान्ता, दास्यते चेद् ग्रहीष्यते ।।९।।
इत्यभिग्रहवान् स्वामी, कौशाम्ब्यां स्थितवान् पुरीम् । भिक्षाचर्यामकार्षीच्च, दिवसे दिविसे प्रभुः ।।१०।।
यतोऽमुष्यामुदीयन्ते, द्वाविंशतिपरीषहाः । एवं च मासाश्चत्वारः, कौशम्ब्यां भ्रमतोऽगमन् ।।११।।
नन्दागृहे प्रविष्टोऽथ, तया ज्ञातः प्रभुस्ततः । अत्यादरेणोपनिन्ये, भिक्षा स्वामी च निर्ययौ ।।१२।।
सा चकाराधृतिं दास्यस्तामूचुर्देवि ! नित्यशः । देवार्योऽभ्येति गृहे[२]ऽत्र, भिक्षां गृह्णाति जातु न ।।१३।।

१. बद्धाङ्घ्रि प्र० । २. गेहे प्र० । ३. ०ग्रही प्र० ।

साऽथाऽज्ञासीद् भगवतोऽभिग्रहः[३] कोऽपि विद्यते । ततः श्याममुखीं दृष्ट्वाऽपृच्छन्मन्त्र्यभ्यधाच्च सः ।।१४।।
चतुर्मास्याः प्रभुर्नार्वाग्, भिक्षां गृह्णात्यभिग्रही । तत् किं ते धीसखत्वेन, यदेतदपि वेत्सि न ।।१५।।
मन्त्र्यूचे स्वः कर्ताऽऽस्यादत्ते भिक्षां प्रभुर्यथा । मृगावत्याः प्रतीहारी, विजया वदतामिति ।।१६।।
आगात् श्रुत्वा तमुल्लापं, स्वस्वामिन्यै न्यवेदयत् । आकर्ण्य साऽपि तां वार्तां, महतीमधृतिं दधौ ।।१७।।
उपालब्धस्तया यातो, राजा राज्येन किं तव । इयच्चिरं भ्राम्यतो यो, न भिक्षाभिग्रहं प्रभो ! ।।१८।।
त्वमज्ञासीर्न वाऽज्ञायि, स्थितोऽप्यत्र प्रभुस्त्वया । राजोचे मा स्म खिद्येथाः, सर्वं भव्यं करिष्यते ।।१९।।
इत्याश्वास्य महादेवीं, राजा सचिवमाह्वयत् । अप्राक्षीच्च प्रभोर्भिक्षाभिग्रहं सोऽपि नोऽविदत् ।।२०।।
आकार्याप्रच्छि भूपेन, नामतस्तथ्यवाद्यपि । विवेदाभिग्रहं नैव, ज्ञेयोऽतिशायिना हि सः ।।२१।।
राजाथाघोषयत् पुर्यां, भिक्षार्थं भ्राम्यतः प्रभोः । सर्वप्रकारैर्दातव्या, भिक्षा गृह्णीत वा कामपि ।।२२।।
राजाज्ञया च भक्त्या च, चक्रिरे ते तथा जनाः । नाग्रहीत् तैः परं स्वामी, प्रकारैरखिलैरपि ।।२३।।
इतश्च नगरी चम्पा, नरेन्द्रो दधिवाहनः । तामादातुं शतानीको, नौसैन्येन स्म गच्छति ।।२४।।

निशैकया गतश्चम्पामवेष्टयदचिन्ति च । चम्पापतिः पलायिष्ट, तदानीं दधिवाहनः ।।२५।।
पटहो घोषितस्तत्र, शतानीकमहीभुजा । तदानीकभटाश्चम्पां, स्वेच्छया मुमुषुस्ततः ।।२६।।
औष्ट्रिकः कोऽपि जग्राह, दधिवाहनवल्लभाम् । वसुमत्या समं पुत्र्या, नश्यन्तीं धारणीं तदा ।।२७।।
कृतकृत्यः शतानीको, निजं नगरमागतः । औष्ट्रिकोऽप्याह लोकानां, पत्न्येषा मे भविष्यति ।।२८।।
विक्रेष्ये कन्यकां चैतां, राज्ञी श्रुत्वेति दुःखिता । मृता हृदयसंघट्टात्, स्वशीलभ्रंशशङ्कया ।।२९।।
दध्यिवानौष्ट्रिकोऽथान्तर्युक्तं नोक्तमिदं मया । सुताऽथ रुदती तेन, नीता संबोध्य चाटुभिः ।।३०।।
चतुःपथेऽथ विक्रेतुं, दत्त्वा मूर्ध्नि तृणं धृताम् । कन्यामनन्यसामान्यां, दृष्ट्वा श्रेष्ठी धनावहः ।।३१।।
दध्यौ राज्ञः सुता कस्यापीश्वरस्याथवा भवेत् । तन्मापदीपदमसौ, क्वापि हीनकुलाङ्गना ।।३२।। [युग्मम्]
बालेयं स्वजनैर्जातु, मिलेदस्मद्गृहे स्थिता । प्रत्यर्थितमथ द्रव्यं, दत्त्वा तामग्रहीद् धनः ।।३३।।
नीत्वा सा स्वगृहे पृष्टा, कन्ये काऽसीति नावदत् । सुतेत्यथ प्रपन्ना सा, श्रेष्ठिना मूलयाऽपि च ।।३४।।
चिखेल स्वेच्छया श्रेष्ठिगृहे स्वे वेश्मनीव सा । सुवाग् विनयशीलाद्यैर्गृहलोको वशीकृतः ।।३५।।

स लोकस्तां ततोऽवादीत्, तैर्गुणैश्चन्दनेऽत्यसौ । ततो द्वितीयमेवैतन्नामाभूद् विश्वविश्रुतम् ।।३६।।
ग्रीष्मेऽन्यदाऽथ मध्याह्ने, श्रेष्ठी मन्दिरमागमत् । कोऽप्यंह्रिक्षालको नासीद्, तदाढौकिष्ट चन्दना ।।३७।।
श्रेष्ठिना वार्यमाणाऽपि, बलादक्षालयत् पदौ । क्षालयन्त्यास्तदा तस्याः, छूटिता केशवल्लरी ।।३८।।
पतन्तीं पाणियष्ट्यैव, धृत्वा श्रेष्ठी बबन्ध ताम् । सान्द्रायां माऽपतद्भूमौ, मूलैक्षत गवाक्षगा ।।३९।।
अचिन्तयत् ततो मूला, मया कार्यं विनाशितम् । यद्येतामुद्वहेत् श्रेष्ठी, तदाहं पतिता बहिः ।।४०।।
व्याधिर्यावत् सुकुमारस्तावदेतं छिनद्म्यहम् । गते श्रेष्ठिन्यथाहूय, नापितं तामम्मूण्डयत् ।।४१।।
निगडैर्यन्त्रयित्त्वाऽघ्रीं, क्षिप्ता क्वापि गृहान्तरे । श्रेष्ठिनोऽवारि कथयन्, सर्वः परिजनोऽनया ।।४२।।
मूला मूलगृहेऽयासीत्, भोक्तुं श्रेष्ठी गृहागतः । क्व चन्दनेति पप्रच्छ, मूलाभीतो न कोऽप्यवक् ।।४३।।
सोऽज्ञासीद् रममाणा सा, भविष्यत्यथवोपरि । पृष्टा निश्यपि नाख्याता, ज्ञातं सुप्ता भविष्यति ।।४४।।
द्वितीयेऽप्यह्नि नादर्शि, तृतीयेऽप्यनवेक्षिता । ऊचे श्रेष्ठी न यो जानयिष्यति सा हनिष्यते ।।४५।।
ततः स्थविरया दास्यैकया मज्जीवितेन सा । जीवत्वित्याचचक्षेऽस्य चन्दनावारकक्रिया ।।४६।।

दृषदा तालकं भङ्क्त्वा, तद्द्वारमुदघाटयत् । क्षुत्तृषार्त्तां निरीक्ष्येतामाश्वास्याथ धनावहः ।।४७।।
पश्यन् भोज्यं कृते तस्या, नापश्यत् किञ्चनापि सः । कुल्माषान् वीक्ष्य दत्त्वास्यै, सूर्पकोणे निधाय तान् ।।४८।।
निगडानां भञ्जनायागात् कर्मारगृहे स्वयम् । तदा सा कुलमस्मार्षीद्, दुःखपूरेण पूरिता ।।४९।।
क्व मे राजकुलं तादृग्, दुर्दशा क्वेयमीदृशी । किं मया प्राक्कृतं कर्म, विपाकोऽयं यतोऽभवत् ।।५०।।
स्वौकसि द्व्यासनस्यापि, तपसः पारणादिने । साधर्मिकाणां वात्सल्यं, कृत्वा पारणकं व्यधाम् ।।५१।।
कस्याप्यदत्त्वा किमपि, षष्ठपारणके कथम् । अश्नामीत्यतिथेर्मार्गं, पश्यन्त्यास्तेऽत्ति सा न तु ।।५२।।
मध्येऽङ्घ्रिमेकं देहल्या, बहिः कृत्वा द्वितीयकम् । द्वारशाखाविलग्नाऽऽस्ते, रुदन्ती मन्दमुन्मनाः ।।५३।।
तदाऽऽगाद् भगवान् वीरो, भिक्षार्थमवेक्ष्य सा । अहो ! पात्रं मया प्राप्तं, किञ्चित् पुण्यं ममास्त्यपि ।।५४।।
नोचितं वः प्रभो ! देयं[1], परं कृत्वा कृपां मयि । कल्पते चेदाददीध्वं, ज्ञात्वाथावधिना प्रभुः ।।५५।।
पूर्णोऽद्याभिग्रह इति, पाणिपात्रमधारयत् । कुल्माषान् तान् ददौ सर्वान्, धन्यंमन्याऽतिभक्तितः ।।५६।।

१. च प्रभोर्देयं प्र ।

सार्धा द्वादशकोट्यस्त्वपतन् स्वर्णस्य तद्गृहे । चेलोत्क्षेपः पुष्पगन्धवृष्टयो दुन्दुभिध्वनिः ।।५७।।
केशपाशस्तथैवाभून्निगडानि च पादयोः । स्वर्णनूपुरतां भेजुर्वपुः कान्तिर्नवाऽभवत् ।।५८।।
तत्क्षणाच्चदना चक्रे, सुरैः सर्वाङ्गभूषिता । आययौ देवराट् शक्रः, प्रमोदभरनिर्भरः ।।५९।।
दुन्दुभिध्वनिमाकर्ण्य, ज्ञात्वा पारणकं प्रभोः । शतानीकः सपत्नीकोऽप्यागमद् धनवेश्मनि ।।६०।।
धाट्यानीतः[१] संपुलोऽभूद्, दधिवाहनकञ्चुकी । सोऽप्यागात् तत्र तां वीक्ष्य, तदङ्घ्रौ प्रणिपत्य च ।।६१।।
मुक्तकण्ठं रुदन् सोऽथ, कैषाऽप्रच्छि च भूभुजा । सोऽवक् चम्पेशपुत्रीयं, वसुमत्यभिधानतः ।।६२।।
तादृश्यपि कथं प्रेष्यभावं प्राप्तेति रोदिमि । मृगावती तदाकर्ण्यावोचन्मेऽसौ स्वसुः सुता ।।६३।।
अमात्योऽपि सपत्नीकस्तत्रैत्यावन्दत प्रभुम् । पञ्चाहन्यूनषण्मास्याः, कृत्वा पारणकं प्रभुः ।।६४।।
निर्ययौ कनकं गृह्णन्, भूपः शक्रेण वारितः । यस्मै चन्दना दास्यत्येतत्तस्य भविष्यति ।।६५।।
सा पृष्टा मत्पितुः स्वर्णं, ततः श्रेष्ठी तदाददे । शक्रेणाभाषि राजाऽथ, संगोप्या चन्दना त्वया ।।६६।।
आस्वामिज्ञानमेषा यत्, शिष्याऽऽद्या भाविनी प्रभोः । चन्दनाऽस्थाद्गृहे राज्ञः, शक्राद्याः स्वालयं ययुः ।।६७।।

१. धान्ध्यानीतः संपुलकोऽभूद् धनवाहन प१ प२ छ।

लोकनिन्द्याऽभवन्मूला, स्तुता चन्दनया पुनः । दुर्दशैवं न चेन्मे स्यात्, कथं स्यात् पारणं प्रभोः ।।६८।।

धन्याहं कृतपुण्याहं, पारणाकारणा प्रभोः । बभूव दुर्दशापायं, मम सर्वोत्तमा दशा ।।६९।। [आ.नि.तिलकाचार्यवृत्तौ गा. ५२१]

इति जिनदानदात्रीचन्दनादृष्टान्तः ।।१०१।।

अथ जिननामकर्मबन्धस्वरूपं तत्कारणस्वरूपं च पृच्छति –

कज्जं वरं भवइ किं जिणकारणाणं, के कारया य पवरा जिणपारणाणं ।

जत्ता वरा भवइ केसि य चारणाणं, का गी गुरू हु मुणि सारणवारणाणं ।।१०२।।

भगवन् ! वरं प्रधानं सर्वोत्तमं कार्यं कर्म किमिति प्रश्नः । अथोत्तरं जिनकारणानां तीर्थकरकर्मबन्धकारणं कार्यं प्रशस्तकर्मबन्धस्तु अयमेव तस्य च सागरान्तःकोटाकोटीरूपा स्थितिरुत्कृष्टा उक्ता सा तु तिर्यग्गतिगमनं विना न पूर्यते, तिर्यग्गतौ च ***'तिरिया तित्थाहारमि*** ति वचनात्, तस्य बन्धनिषेध उच्यते । तीर्थनामकर्म द्विधा-अवश्यवेद्यमनवश्यवेद्यं च, तत्राद्यं त्रिभुवनाधिपत्यरूपं तिर्यग्गतौ न प्राप्यते, द्वितीयं तु प्राप्यत एव यतस्तत्प्रभूतस्थितिकमप्यपवर्तनाकरणेन लघुस्थितिः क्रियते उद्वर्तनया वा तदन्यप्रकृतित्वेनावस्थाप्यते, तदुक्तं –

"जमिह निकायं तित्थं, तिरियभवे तं निसेहियं संतं । इयरम्मि नत्थि दोसो, उव्वट्टोवट्टणा सज्झे ।।१।।" (पञ्चसङ्ग्रह-२५१)

न तु तं तीर्थकरभवादर्वाक् तृतीयभवे एव बध्यते । यदुक्तं ***"बज्झइ तं तु भगवओ."*** इत्यादि । निकाचनापेक्षयोक्तम्, अन्यथा तृतीयभवादर्वाक्तरामपि बद्ध्यते । उक्तं च विशेषणवत्यां

जं बज्झइ त्ति, भणियं **तत्थ निकाइज्जइत्ति नियमोऽयं । तदवंझफलं नियमा अण्णा, अणिकाइआवत्थे ।।१।।"** [विशे. ७५]

इति कर्मप्रकृतिमनःस्थिरीकरणवृत्तौ तस्य तीर्थकरनामकर्मकारणानि च, यथा –

"अरहंत-सिद्ध-पवयण-गुरु थेर बहुस्सुएत्यादीनि, तथा च भगवन् **को कारओ** त्ति, तत्र के कारकाः प्रवराः प्रधाना इति प्रश्नः, उत्तरं च – जिनानां साधूनां च पारणानां कारका धन्याः, यतः चन्दनया उक्तं –

"धन्याहं कृतपुण्याहं पारणाकारणा प्रभोः । तत्र जिनानां प्रथमपारणाकारकाः यथा ।।१।।"

"सिज्जंस[१] बंभदत्ते,[२] सुरिंददत्ते[३] य इंददत्ते[४] । पउमे[५] य सोमदेवे,[६] महिंद[७]-सोमदत्ते[८] य ।।१।।"

"पुरस्सेण[९] पुणव्वसु[१०]पुण, णंद[११] सुणंदे[१२] जए[१३] विजए[१४] य । तत्तो य धम्मसीहे[१५], सुमित्त[१६] तहेवग्घसीहे[१७] य ।।२।।"

"अपराजिय[१८] विससेणे,[१९] वीसइमे बंभदत्ते[२०] य । दिन्ने[२१] वरदिन्ने[२२] पुण, धन्ने[२३] बहुले य[२४] बोधव्वे ।।३।।" [शतपञ्चाशिका ४८-५०]

"एए कयंजलिउडा, भत्तिबहुमाणसुक्कलेसागा । तक्कालपहिट्ठमणा, पडिलाभेसु जिणवरिंदे ।।४।।"

"सव्वेसिं पि जिणाणं, जेहिं दिन्नाउ पढमभिक्खाओ । ते पयणुपिज्जदोसा, दिव्ववरपरक्कमा जाया ।।५।।"

"केइ तेणेव भवेण, निव्वुया सव्वकम्मउम्मुक्का । केइ तइयभवेणं, सिज्झिस्संति जिणसगासे ।।६।।" [शतपञ्चाशिका-५२-५४]

त्ति, तथा यात्रा वरा प्रधाना केषामिति प्रश्नः, उत्तरं तु **'चारणाण'** त्ति – जंघाचारण- विज्जाचारणादीनां तत्स्वरूपं तु भगवत्यां ज्ञेयम्, तथा च को गुरुश्च प्रवर इति प्रश्नः । उत्तरं तु-मुनीनां सारणवारणाणं दाता इति गम्यम् । चारणस्वरूपं च, अन्यत्रापि चारणस्वरूपं यथा –

"अइसयचरणसमत्था, जंघा-विज्जाहि चारणा मुणओ । जंघाहिं जाइ पढमो, निस्संकाउ रविकरे वि ।।१।।"

"एगुप्पाएण गओ, रुअगवरम्मि य तओ पडिनियत्तो । बीएणं नंदिस्सरम्मि, एइ तओ होइ तइएणं ।।२।।"

"पढमेण पंडगवणं, बीउप्पाएण नंदणं एइ । तइउप्पाएण तओ, इह जंघाचरणो एइ ।।३।।"

पढमेण माणुस्सुत्तरनगं तु, नंदिस्सरं तु बितिएण । एइ तओ तइएणं, कयचेईयवंदणो इहयं ।।४।।

"पढमेण नंदणवणे, बीओप्पाएण पंडगवणम्मि । एइ इहं तइएणं, जो विज्जाचारणो होइ ।।५।।" [प्रव.सारो ५९७-६०१]

इति पाक्षिकवृत्तौ योगशास्त्रे तु -

चारणा द्वेधा-जङ्घाचारणा विद्याचारणाश्च, तत्र रुचकद्वीपं यान्त्येकोत्पातेन वलन्तो रुचकद्वीपादेकेनोत्पतनेन ते नन्दीश्वरे समायान्ति

द्वितीयेन यतो गताः, ते चोर्ध्वगत्यामेकेन [१]समुत्पतनकर्मणा गच्छन्ति पाण्डुकवनम् ।।२।। ततोऽपि वलिता एकेनोत्पातेन यान्ति नन्दनम् । उत्पातेन द्वितीयेन प्रथमोत्पातभूमिकाम् ।

विद्याचारणास्तु –

गच्छन्त्येकेनोत्पातेन मानुषोत्तरमन्येन नन्दीश्वरद्वीपम्, तस्मादायान्ति चैकेनोत्पातेनोत्पत्तिता यतः ।

यान्त्यायान्त्यूर्ध्वमार्गेऽपि वियद् यानक्रमेण ते । अन्येऽपि बहुभेदाश्चारणा भवन्ति, तद्यथा – आकाशगामिनः पर्यङ्कावस्थानिषण्णाः कायोत्सर्गशरीरा वा पादोत्क्षेपक्रमाद् विना व्योमचारिणः, केचित्तु जलजङ्घा फल-पुष्पपत्रश्रेण्यग्निशिखा-धूम-नीहारावश्याय-मेघवारिधारा-मर्कटकतन्तुज्योतिरश्मिपवनाद्यालम्बनगतिपरिणामकुशला जलमुपेत्य वापी-निम्नगासागरादिषु जलजीवानां विराधयन्तो जले भूमाविव पादोत्क्षेप-निक्षेपकुशला जलचारणाः । एवं जङ्घा-फल-पुष्प-पत्रश्रेणि-दहनशिखा- धूमनीहारावश्यायमेघधाराचारणाः, कुब्जवृक्षान्तराल-भाविनभःप्रदेशेषु कुब्जवृक्षादिसंबद्धमर्कटतन्त्वालम्बन-पादोद्धरणनिक्षेपावदाता मर्कट-तन्तून् छिन्दन्तो यान्तो मर्कटतन्तुचारणाः, चन्द्रार्कग्रहभाद्यन्यतमज्योतीरश्मिसंबन्धेन भुवीव पादविहारकुशला ज्योतिरश्मिचारणाः, पवनेषु च अनेकदिग्मुखेषु प्रतिलोमानुलोमवृत्तिषु तत्प्रदेशावलीमुपादाय गतिमस्खलितचरणविन्यासमास्कन्दन्तो वायुचारणाः, एवं जङ्घाचारणादीनां यात्रा वरा । -

१. समुत्पतन न कर्मणा प, छ ।

अथ गुरोः सारणा-वारणास्वरूपं - तत्र विस्मृते क्वचित् कर्तव्ये भवतेदं न कृतमिति स्मारणा, अकर्तव्यानां निषेधो वारणा उपलक्षणत्वात् उक्तमप्यकुर्वत्यसकृत् खरं मधुरवचनैः प्रवर्तनं चोदना, विशेषतो वाऽतत्करणं प्रतिचोदना ।।१०२।। अत एव जिनगुर्वादेराज्ञाभङ्गादि न विधेयमिति दर्शयति –

किं न विहेयं मुणिणा, आणाभंगो जिणाण गुरूणो वि । सीहगिरिसीसएहिं व, कारणं भणियं पि कायव्वं ।।१०३।।

भगवन् ! मुनिना किं न विधेयं किं न कर्तव्यमिति प्रश्नः । उत्तरं-**जिणाण** त्ति-जिनानां वीतरागानामाज्ञाभङ्गः गुरोरपि च न विधेयः । यत उक्तं च –

"आणं सव्वजिणाणं, भंजइ दुविहं पहं अइक्कंतो । आणं च अइक्कंतो, भमइ जरा-मरणदुग्गम्मि ।।१।।"

आणाइ च्चिय चरणं, तब्भंगे जाण किं न भग्गं त्ति । आणं च अइक्कंतो, कस्साएसा कुणइ सेसं ।।२।।" [उप.माला.५००, ५०५]

गुरोरप्याज्ञाभङ्गो न विधेय इति यतो गुरूपदेशं विना कृतेऽनुष्ठाने हितं न, यत उक्तं च –

"नियगमइविगप्पि, विचिंतिअम्मि सच्छंदबुद्धिरईएणं । तत्तो पारत्तहियं, कीरइ जं गुरु अणुवएसेणं ।।१।।" त्ति [ ]

गुरवस्तु कारणे यद् भणन्ति तदपि च विधेयमिति, यतः

"कारणविऊ कयाइ, सेअं कायं भणन्ति आयरिया । तं तह सद्दहिअव्वं, भवियव्वं कारणेण तहिं ।।२।।" त्ति । [उप.माला. ९५]

कैरिव विधेयमिति **सीहगिरिसीसएहिं व'त्ति**-सिंहगिरिशिष्यकैरिव । तत्संबन्धो यथा – यदा श्रीवज्रस्वाम्यतिशिशुः, साधूनां हस्तिभूत आसीत् । प्रथमं साध्वीनामुपाश्रये तिष्ठन्नेकदशाङ्गानि तासां पदानुसारितया जग्राह । पश्चादानीतः साधूनां मध्ये स्थिरतया यत् किञ्चित् पठन्ननुपलक्ष्य तस्थौ, अन्यदा तं वसतिपालं विधाय गतेषु साधुषु गोचरे बहिर्भूमावाचार्यसिंहगिरिषु संस्थापना, साधून् महता शब्देन परिपाट्या वाचनां ददौ आगतैश्चाचार्यैरुपाश्रयाभ्यर्णे श्रुत्वा तद्ध्वनिमचिन्ति किं झटित्यागताः साधवः ? स्थित्वोपयुज्य ननु वैरः खलु । अयं निरूपयद्भिश्च लक्षितो वाचयन्नेकादशाप्यङ्गानि ततो मा भूदस्य संक्षोभ इत्यपसृज्य बृहद्ध्वनिना कृता नैषेधकी, इतरेणापि संवृत्त्याकारं कृता प्रतिपत्तिरिति, ततः पुरुषा रत्नमिदं मा ज्ञातवीर्याः परिभवन्नैते इति साधूनां किञ्चित् कार्यमुद्दिश्य प्रस्थिता ग्रामान्तरं गुरवस्तेप्याहुः, कोऽस्माकं वाचनां दास्यतीति सूरिभिरुक्तं वैर इति । ततस्तथेति प्रतिपन्नमेतैर्गता गुरवो, वैरेणापि समुत्सारितस्तेषां स्वल्पकालेन बहुः स्वाध्यायः, समाह्लादितानि चित्तानि, आगतैर्गुरुभिः उक्ता किमुत्सृतः स्वाध्यायः । तेऽप्याहुर्बाढमयमेवास्माकं वाचनाचार्यः, अनुग्रहः क्रियताम्, तैरुक्तं करिष्यते, कृतोपधानः, यत उक्तं च –

"सीहगिरिसुसीसाणं, भद्दं गुरुवयणसद्दहंताणं । वयरो किर दाहि वायण त्ति न विकोवियं वयणं ।।१०३।। [उप. माला-९३]

एवंविधा यथोक्तकारिशिष्यादिपुरुषाः कालदोषेण गताः । यतः कालः सर्वमपि शुभमशुभं च संहरतीति दर्शयति –

"सव्वं पि मारेइ य वत्थु, कालो उप्पज्जई जेण य सो वि कालो ।
खणे खणे सो वि मरेइ, कालो धुवाण सिद्धाण य नत्थि कालो ।।१०४।।
को साहुदाणम्मि य होइ, भद्दो जो होइ जीवाण सभावभद्दो ।
भवम्मि पुव्वे जह सालभद्दो, सो आसि सुखाण इहं समुद्दो ।।१०५।।

सर्वमपि वस्तु कालो मारयतीति संहरति, येन च तद् वस्तु उत्पद्यते सोऽपि कालः किमपि न करोति ते सिद्धाश्च दानादिधर्मत एव भवन्तीति । तद् दर्शयति –

भगवन् ! को जीवः साधुदाने भद्रः स्यात् ? उत्तरं च – यो जीवानां मध्ये भद्रकस्वभावो भवति, कथं यथा पूर्वभवे शालिभद्रो भद्रकस्वभावोऽभूत् स च शालिभद्रस्तेन कृतसाधुदानेन कामभोगऋद्धिसुखानां समुद्रो जातः, यतः उक्तं –

"किं बहु गुणप्पहाणं, तवोवहाणं सुपत्तदाणं च । जेहिं कयं सुहभावा, तस्स सुहं सालिभद्दु व्व ।।१।।"

अत्र शालिभद्रसंबन्धो यथा –

"रायगिहेऽन्नाभिहाणा उच्छिन्नकुला वच्छपाली आसी । तीए पुत्तो संगमाभिहाणो । अन्नया इंदमहुस्सवे वट्टमाणे गिहे गिहे खीरन्नभोयणं भुंजमाणं पासिऊण माया खीरभोयणं मग्गिया, नत्थि तीए खीरभोयणस्स संपत्ती, स पुणो पुणो मग्गइ, सा तं सखेया निब्भंछइ । तओ सा समीवगेहवासिणीहिं इब्भपत्तीहिं निसिद्धा । मा एअं निब्भंछेइ । बाला जं जं पासंति तं तं मग्गंति, भणियं तीए जइ तं नत्थि तो कहं देमि । तउ ताहिं अणुकंपाए दिन्ना खीरभोअणसामग्गी, रद्धा खीरा, दिन्ना संगमसुत्तस्स । इत्थंतरम्मि समागओ मासखमणपारणिगो साहू । दिन्नं तस्स सा, संजायहरिसेण संगमेण सेसा य भुत्ता, तेण तओ तस्साइप्पमाणभोअणओ जाया विसूईया, मओ सो संगमओ । साहुदाणस्समज्जियबहुपुण्णपब्भारो रायगिहे णयरे गोभद्दसेट्ठिस्स भद्दाभिहाणाए भारियाए सालिसुविणसूईओ विविहमणोरहपूरगो जाओ पुत्तत्ताए । पइट्ठियं से नामं सालिभद्दो त्ति । पत्तो जुव्वणं, विविहमहूसवेहिं परिणाविओ तिभुवणाइसयरूवधारिणीओ बत्तीसं कन्नाओ, भुंजइ ताहिं समं सुरुव्वभोए, इयउ अ विहिणा कालं काऊण गओ गोभद्दसेट्ठी सुरलोए, तेण ओहिणाणेण दिन्नो उवओगो, जाओ तस्स सालिभद्दस्सुवरि अईव सेणहो दंसियनियरूवो पइदिणं दिव्ववत्थालंकारविलेवणाइणि तस्स सवहूस्स पूरेई । भवणं च रयणादिहिं भरइ, अन्नया समागया रायगिहे रयणविक्कगा वाणियगा, तेहिं दंसियाइं रायकुले रयणकंबलाणि महग्घाणि त्ति न गहियाइं सेणियराइणा वि । तओ गया ते रयणविक्कगा भद्दागिहे, तीए मग्गिमुल्लं दाऊण गहियाइं । दिन्नाइं च वहूणं, ताहिं वि वहूहिं कयाइं ताइं पायपमज्जणाइं ति । इओ य सुओ तव्वतिकरो चिल्लणाए, पेरिओ तीए सेणिओ राया, तेण ततो णियगा आगारिआ रयणविक्कगा । चट्टा मग्गियाइं ताइं रयणकंबलाणि, तेहिं भणियं ताइं विक्कियाइं । सेणिएण भणियं कहिं ? तेहिं भणियं भद्दागिहे । विम्हिओ राया, दट्ठव्वो सो सालिभद्दो त्ति । तस्सेरिसी

रिद्धिप्फीती त्ति चिंतियं, पेसिया नियपुरिसा भद्दासमीवं सालिभद्दागमणत्थं । गया ते, गंतूण आगया य, कहइ, भद्दाकहणं जहा-महाराय ! भद्दा विन्नवई - न य अणेण सालिभद्दपुत्तेण सययं रयणप्पयासओ भुवणंसि कया वि सूररयणिकरा दिट्ठा किरणानि भणिया तेण किञ्जइ महाराइणा मम भवणागमणेण पसाओ त्ति । तं सोऊण उल्लसियहरिसविम्हियाइरेगो गओ सपरियणो सालिभद्दगिहं, दिट्ठं विभवातिसया पहसियधणदालयं तस्स गिहं । समारूढो तस्स चउत्थभूमीए, भद्दा वि करिय तस्स उचियपडिवत्तिं, गया सत्तमभूमीए जत्थत्थि सालिभद्दो । उट्ठिओ जणणीए पायवंदणत्थं, कहियं तीए पुत्त ! तव दंसणत्थं आगओत्थि महाराया रायगिहसामी सेणिओ त्ति । सो य चउत्थभूमीए भवणस्स चिट्ठइ, तं दट्ठूणं कुणसु महारायजुग्गं पडिवत्तिं, सो भणइ सव्वं ववहारं तुझे जह मम किं पुच्छहं । भद्दा भणइ तउ न य इमो पण्णववहारी वणिओ त्ति, किन्तु तओ सा भणइ सो तुज्झ सामी सेणिओ राया । तओ तेण चिंतियं ममावि अन्नो पहू सामीत्ति, अहवा जुत्तमिणं अम्हारिसाणं, विसयकद्दमलित्ताणं मोहसगाणं परवसपवत्तणं, धन्ना पुण ते मुणिणो जे लद्धपरमत्था नियपरहियट्ठा वसुहं विहरंति, इय चिंतियं तस्स जायवेरगस्स जाओ चरणपरिणामो, तओवि जणणी संतोसणिमित्तं उत्तरिय सत्तभूमीतो गओ सेणियसमीवं, दिट्ठो राइणा ठाविओ नियुस्संगसमीवं, उवलोईओ बाढं, तओ मिलाणवयणं सपरिस्सेवतणुयं च दट्ठूण भद्दा सेणियं भणइ, महाराय ! इमो दिव्वविलेवणाइलालितेंदियत्तणओ न खमइ सहिऊं मणुस्संगरागाइयं गंधं, तओ एय विसज्जिओत्ति । राया भणइ कहंत्ति तओ कहिओ सव्वो वुत्तंतो, विसज्जिओ सालिभद्दो । तओ निमंतिओ भद्दाए रायभोअणत्थं पडिवन्नं राइणा मज्जिउमारद्धो । तत्थ –

"विविहरयणकणयकंतिपणट्ठंधयारविमालासु । वावीसु संभमेण य, पडियमंगुलीमुद्दारयणं ।।१।।"

तओ तरलियलोयणतारं तं विलोयंति सेणियं जाणिऊण भद्दाए भणियाए चेडियाए कीलियापओएण निस्सरिए वावीजले पयासियदिसाचक्कवालं विविहरयणालंकारसंजुयं नियं अंगुलीमुद्दारयणं अंगारमिव विच्छायं उवलहिय सविलक्खेण रायणा[1] भणियं किमेयंति, तओ परियरेण[2] कहियं देवोवणियसालिभद्दवहूणं निम्मालभूसणमित्ति, ततो चिंतियं राइणा नत्थि किंपि असच्छामुक्किट्ठपुण्णाणं जेणेवं देवा अवि किंकरत्तं पडिवज्जंति, जायगाढविम्हिओ भद्दा विहियभोयणाइविहिपडिवत्ती । निग्गओ राया । तउ सालिभद्दो संजायसंवेओ चिंतइयं अहो हीणपुण्णो, पुरिसा रायाईणं आणपरवसा संयमसामीआ परसेवगा अकयतवसंजामोवहाणा निप्फलं जीवियमणुहवंति ता अहमवि अकयतवोवहाणो अन्नं सामिओ किं जीवामि त्ति जउ भणियं च –

"मणि-कणग-रयण-धणपूरिअम्मि भवणम्मि सालिभद्दो वि । अन्नो किरि मज्झ वि, सामीओ त्ति जाओ विगयकामो ।।१।।"

"न कुणंति जे तवं-संजमं च ते तुल्लपाणि-पायाणं । पुरिसा समपुरिसाणं अवस्सपेसत्तणमुविंति ।।२।।"

इति चिंतिय धम्मघोसायरियसमीवे जिणोवइट्ठं धम्मं सोऊण जिणमग्गभाविअप्पा तओ अण्णया समणे भयवं महावीरे[3] समासढे, सुच्चा भगवओ धम्मदेसणं भवविरत्तमणो पडिबोहियभद्दाजणणिं परियणं च नाणोवाएहिं सभज्जो निक्कंतो, गहियसुत्तत्थो पवट्टमाणो

१. राइणा प१ । २. परियणेण प१ छ । ३. समणो भयवं महावीरो समोसढो प१ ।

समग्गसमणसामायारिं विविहतवोकम्मं कुणमाणो बहुकालं विहरिऊण अन्नया आगओ भगवया[1] समं रायगिहं गोअरे पविसंतो भणिओ भगवया अज्ज तुह माया पडिलाहिस्सइ त्ति चमक्किओ, अवितहवाइणो हु जिणो[2] त्ति, कमेण गओ नियं भवणं, बहुतवसुसियसरीरो केणावि नोवलक्खिओ पच्छा निग्गओ, जम्मंतरजणणीए पडिलाहिओ दहिणा, तओ पुट्ठो तेण भयवं, कहिओ भयवया पुव्वभववुत्तंतो[3], ततो जायजाइसरणो तं दहिपारणगं काऊणं कयपादोपगमअणसणो कालं काऊण समुप्पन्नो सव्वट्ठसिद्धविमाणे, तओ चविऊण उपन्नकेवलो सिज्झिस्सइ त्ति ।।१०४-१०५।।

अथ पुण्यकर्तारं पुण्यनिमित्तं पृच्छति –

किज्जइ केण किमत्थं, पुण्णं भयवं च जस्स परलोए । सुहमीहा दुहभीई, सो भव्वो कुणइ तरणट्ठा ।।१०६।।

हे भगवन् ! एवं साधुदानादिकं पुण्यं केन क्रियते, केन पुण्यात्मना विधीयते । किमर्थं च कस्मै कार्याय च क्रियते इति प्रश्नः । अथ गुरूत्तरः – यस्य परलोके स्वर्गादौ सौख्येहा इति कथने यस्य परलोके स्वापरलोकसत्ता पुण्यपापफलाभोगसत्ता च विद्यते स एव पुण्यं करोति, यस्य च दुःखभीतिर्भवति स एव पुण्यं विधत्ते, **तरणट्ठा** त्ति-भवतरणार्थं ***पुण्येन तीर्यते*** इति वचनात् । सा ईहा दुःखभीतिश्च सचेतनस्य स्यादिति ।।१०६।। चेतनास्वरूपं पृच्छति –

१. भयवया प१ छ । २. जिणा प२ । ३. पुव्वजम्म प२ ।

सव्वेसिं [पि] जियाणं, सयं भवे नो भवम्मि का भयवं । सन्ना बहुकम्माणं, भवइ य धन्नाण केसिंपि ।।१०७।।

भगवन् ! सर्वेषामपि जीवानां सयं ति-स्वयं का न भवतीति प्रश्नः । अथ गुरुप्रतिवचनं केषांचित् तस्य जीवानामपि स्वात्मनामपि आस्तामन्येषां स्वजीवसंवेदनं न भवति, किं विशिष्टानां बहुकर्मणां यतो बहुकर्ममलकरणैर्मलिना[१] जीवाः स्वसंवेदनादि किमपि न विदन्ति, केचिच्च विदितस्वसंवेदना अपि स्वहिताचरणे मुह्यति । यत उक्तं च –

"कलुसीकओ य किट्टीकओ य, खउरीकओ य मइलिओ । कम्मेहिं एस जीवो, नाऊण वि मुज्झई जेणं ।।१।।"

उदाहरणं च यथा –

"कम्मेहिं वज्जसारोवमेहिं, जउनंदणो वि पडिबुद्धो । सुबहुंपि विसूरंतो, न तरइ अप्पक्खमं काऊं ।।१।।" [उप.माला. २४९-२५०]

तत्र करणैरिति अष्टकरणरूपैः । अष्टकरणानि यथा –

"बंधणं[२]-संकमणु[३]व्वट्टणा[४] य, अववट्टणा[५] उदीरणया[६] । उवसमणाइं[७] निहत्ती,[८] निकायणा[९] वत्ति ८करणाइं ।।१।।" [कर्मप्रकृति-२]

तत्र बन्धो वह्न्ययःपिण्डवदात्मकर्मपुद्गलानामेकीभवनम् १ । संक्रमः प्रकृति-स्थित्यनुभागप्रदेशानामनुकर्मरूपस्थितानामन्यकर्मरूपेण व्यवस्थापनं २ । स्थित्यनुभागयोर्बृहत्करणमुद्वर्तना ३ । तयोरेव ह्रस्वीकरणमपवर्तना ४ । कर्मपुद्गलानामकालप्राप्तानां-

१. मिलिता प, छ।

मुदयावलिकायां प्रवेशनमुदीरणा ५ । कर्मपुद्गलानामुदयोदीरणानिधत्तिनिकाचनाकरणायोग्यत्वेन व्यवस्थापनमुपशमना ६ उद्वर्तनाऽप-वर्तनावर्जशेषकर्मणायोग्यत्वेन व्यवस्थानं निधत्तिः ७ । समस्तकरणायोग्यत्वेन व्यवस्थापनं निकाचना ८ । इति कर्मप्रकृतिवृत्तौ ।

बहुकम्माणमिति अष्ट तानि कर्माणि नाणावरणिज्जं दंसणावरणिज्जं वेयणिज्जं मोहणिज्जं आऊय-णाम-गोत्तं अंतरायं च । एतेषां निमित्तं पुनः मिथ्यात्वमज्ञानमविरतिः प्रमादः कषाया योगाश्च स्थितिश्चैतेषां द्विविधा, उत्कृष्टा जघन्या च, उत्कृष्टाऽशुभपरिणामजनितानां ज्ञानावरणकर्मणो दर्शनावरणकर्मणो वेदनीयकर्मणो अन्तरायकर्मणश्च प्रत्येकं त्रिंशत्सागरोपमकोटिकोट्यः मोहनीयस्य च सप्ततिकोटाकोट्यः, नामकर्मणो गोत्रकर्मणश्च प्रत्येकं विंशतिसागरोपमकाटाकोट्यः, आयुःकर्मणस्त्रयस्त्रिंशत्सागरोपमाणाः, जघन्या पुनः वेदनीयस्य कर्मणो द्वादशमुहूर्ताः, नामगोत्रयोः प्रत्येकं जघन्या स्थितिरष्टमुहूर्ता, शेषाणां प्रत्येकमन्तर्मुहूर्त्तानीति, इह केषांचित् घने तु तत्र द्रव्यदिशो(यप्रा) केषांचित् संज्ञा न भवति, केषांचिद् भवत्यपि । यत उक्तं च श्री आचाराङ्गे

इहमेगसिं नो सन्ना भवइ तं जहा-पुरित्थिमाओ दिसाओ आगओ अहमंसि, पच्छित्थिमाओ वा दिसाओ आगओ अहमंसि दाहिणाओ वा दिसाओ वा आगओ अहमंसि उत्तराओ वा दिसाओ आगओ अहमंसि, उड्ढा वा दिसाओ, अहे वा दिसाओ अन्नयरिओ दिसाओ वा आगओ अहमंसि । एवमेगेसिं नो नायं भवइ । अत्थि मे आया उववाइए, नत्थि मे आया उववाइए । केहं आसी के वा ईओ चुए इह पेच्चा पभविस्सामि । से जं पुण जाणिज्जा सहसंमईयाए, परवागरणेणं अन्नेसिं वा अंतिए सोच्चा । (आचारांग सूत्र-१)

अत्र केचिदष्टादशद्रव्यदिगागता अपि निजागमनं न जानन्ति, भावदिग्गताऽपि निजागमनं न जानन्ति ।।१०७।। तत्र भावदिग् यथा -

मणुया तिरिया काया, तहग्गबीया चउक्कगा चउरो । देवा नेरइया वा, अट्ठारस हुंति भावदिसा ।।१०८।।

मनुष्याश्चतुर्भेदाः संमूर्छनजाः१, कर्मभूमिजाः२, अकर्मभूमिजाः३, अन्तर्द्वीपजाश्च४ । तिर्यञ्चः द्वि-त्रिचतुःपञ्चेन्द्रियाः४ कायाश्च पृथिवी-अप्-तेजो-वायुरूपाः४, अग्रबीज-मूलबीज-स्कन्धबीज-पर्वबीजरूपास्तरवः४, देवता नारकाश्च १८ ।।१०८।।

अथ एतासु द्रव्यदिग्-भावदिक्षु कया सह आत्मा यातीति पृच्छति -

काए सह णं अप्पा गच्छइ, भयवं गईसु विविहासु । अणुपुव्वीए सद्धं, सुहासुहेहिं च कम्मेहिं ।।१०९।।

भगवन् ! आत्मा-जीवः कया सह णमिति वाक्यालंकारे, विविधासु गतिषु गच्छति । विविधगतिषु कया तमात्मानमादाय यातीति प्रश्नः । आनुपूर्व्या, सा तु चतुर्धा-देवानुपूर्वी मनुजानुपूर्वी तिर्यग्गत्यानुपूर्वी नरकगत्यानुपूर्वी, तया सार्धं यातीत्युत्तरः, च पुनः, शुभाशुभकर्मभिश्च याति ।।१०९।। यदि जीवा गतिषु यान्ति तर्हि कति गतय इति पृच्छति -

नारी-नर-नेरइया, तिरिच्छि सुरदेवि सिद्धतिरिया य । थोवा संखगुणा चऊ-संखगुणाणंतगुण दुन्नि ।।११०।।

नारीतो नरा असंख्येयगुणास्ततो नारका असंख्येयगुणाः ततस्तिर्यक् स्त्रियः असंख्येयगुणास्ततो देवा असंख्येयगुणास्ततो देव्यः असंख्येयगुणास्ततो सिद्धा अनन्तगुणाः, ततोऽपि तिर्यग्योनिका अनन्ताः ।।११०।। अथवा तिर्यञ्चोऽनन्ताः प्रोक्तास्ते केषु कायेषु वर्तन्ते इति पृच्छति–

तिरिया केसु अणंता, अणंतकायेसु थावरा संखा । जीवा तसा असंखा, तसा य के अंडयाइया ।।१११।।

व्याख्या – तिरियात्ति-तिर्यञ्चो जीवा केषु पिण्डेषु अनन्ता वर्तन्ते इति प्रश्नः । अथ गुरुत्तरः-ते अनन्तकायेषु अनन्ताः, अत्र अनन्तकायाश्च यथा –

"सव्वा हु कंदजाई[१], सूरणकंदो[२] अ वज्रकंदो[३] य । अल्लहलिद्दा[४] य तहा, अद्दं[५] तह अल्लकच्चूरो[६] ।।१।।"

"सत्तावरी[७] विराली[८], कुमारी[९] तह थोहरी[१०] गलोई [११]य । लसुणं[१२] वंसकरिल्ला[१३], गज्जर[१४] तह लोणओ[१५] लोढा[१६] ।।२।।"

गिरिकन्नि किस[१७]लपत्ता, खरिसुआ[१८] थेग[१९] अल्लमुत्थाय[२०] । तह लोणरुक्खउल्ली[२१] खिल्लडो[२२] अमयवल्ली[२३] य ।।३।।

---

१. ०रिद्दा प्र० ।

मूला[२४] **तह भूमिरुहा**[२५] **बिरुहा**[२६] **तह टक्कवत्थुलो**[२७] **पढमो । सूअरवल्लो**[२८] **अहहा पल्लंको**[२९] **कोमलंबि**[३०] **लिया ।।४।।**
आलू[३१] **तह पिंडालू,**[३२] **हवंति एए अणंतनामेहिं । अन्नमणंतं नेयं, लक्खणजुत्तीइ समयाओ ।।५।।**
घोसाडकरीरकुरतिंदुगअइकोमलंबगाईणि । वरुणवडनिंबगाईण अंकुराइं अणंताइं ।।६।।
गूढसिरसंधिपव्वं, समभंगमहीरुगं च छिन्नरुहं । साहारणं सरीरं, तव्विवरीअं च पत्तेयं ।।७।। [जीव वि. गा. १३]
चक्कं व भज्जमाणस्स, जस्स गंठी हविज्ज चुन्नधणो । तं पुविसरिसभेयं, अणंतजीवं[१] वियाणाहि ।।८।।
[प्रव.सारो. २३६-२४३]

एवं अनन्तकायेषु अनन्ता जीवा उक्ताः, पृथिवी-जलाग्नि-वायु-प्रत्येकवनस्पतिरूपं च स्थावराः असंख्यपिण्डाः, तथा त्रसा जीवाः सर्वेऽपि असंख्येयाः । अथ शिष्यः पृच्छति – के ते त्रसाः, ते च यथा-**अंडयाईया** इति – अण्डजादिकाः यथा –

"अण्डजाः पक्षिसर्पाद्याः, पोतजाः कुञ्जरादयः । रसजा मद्यकीटाद्याः, नृगवाद्या जरायुजाः ।।१।।"
"यूकाद्याः स्वेदजा मत्स्यादयः संमूर्च्छनोद्भवाः । उद्भिदः खञ्जनश्चोपपातका देवनारकाः ।।२।।"
"भवन्त्यपर्पटश्रोत्रा*, जीवा नियतमण्डजाः । **परसपर्पटश्रोत्रा,** जीवाः पोत-जरायुजाः ।।३।।"

१. ०जीवा प, छ । * येषां कर्णौ कपोतादिपक्षाविव पिच्छादिपटलनिर्वृत्तौ ते निश्चितमण्डजा : इत्यर्थः प्रतिभाति ।

"जरायुजाः सरोमाणः, नीरोमाणश्च पोतजाः । अण्डजास्तु सरोमाणः, पक्षिणोऽन्ये विलोमकाः ।।४।।"
"जराण्डपोतजाः सास्नाः, व्यस्नाः संमूर्च्छजाः पुनः । स्वजातिसदृशाकारौ, स्यातां संमूर्च्छनोद्भिदौ ।।५।।"
प्रायः स्वजातिविष्ठासु संमूर्च्छन्त्ययुगेन्द्रियाः ।।६।।
मूर्च्छा संज्ञानुभावेन, तेऽपि त्रिचतुरिन्द्रियाः । सेवन्ते जन्तवो जन्तून्, मलामृतकलाभवान् ।।७।।
अपदा द्वीन्द्रियाः प्रायस्त्रीन्द्रिया पादसंकुलाः । षडादयोऽष्टान्ताश्चतुरिन्द्रियदेहिनाम् ।।८।।
द्व्यादयश्चतुरन्ताश्च पादाः पञ्चाक्षजन्तुषु । सर्पाः पुनरुरःसर्पाः सपादा नकुलादयः ।।९।।
मुखाग्रशृङ्गिणः प्रायस्त्रीन्द्रियाः जन्तवो मताः । शिरःशृङ्गजुषः केऽपि, ये तु ते चतुरिन्द्रियाः ।।१०।।
इति त्रसजीवस्वरूपम् ।।१११।।

अथ अण्डजादिजीवानां संज्ञास्वरूपं पृच्छति -

अंडयपमुहाणं पुण, जियाण सन्नाओ कइविहा भणिया । तिविहा चउदस-पन्नर,-सोलसभेया सुए ताओ ।।११२।।

पूर्वोक्तत्रसादिजीवानां श्रुते कतिविधाः कतिप्रकाराः संज्ञा भणिताः इति प्रश्नः । ताः संज्ञाः त्रिविधाश्चतुर्विधा दशविधास्तथा पञ्चदशविधाः षोडशविधाश्च, तत्र त्रिविधा तावत् हेतुवादोपदेशिक्याद्याः, तत्र हेतुवादकी[१] १, दीर्घकालिकी २, दृष्टिवादकी । तत्र हेतुवादकी

१. वादिकी प्र० ।

यथा – यया पुनः पुनः संचिन्त्येष्टेषु छायादिषु वर्तन्ते अनिष्टेभ्यो निवर्तन्ते, प्रायः सांप्रतकाल एव प्रायोग्रहणादतीतानागतयोरपि सा हि वादोपदेशिकी द्वि-त्रि-चतुरिन्द्रिय-संमूर्च्छजपञ्चेन्द्रियाणां अस्याश्चासंज्ञिनो निश्चेष्टाः पृथ्व्यादय एव यद्यपि पृथ्व्यादीनामाहारादि १० संज्ञा भवन्ति । तथापि तासामव्यक्तरूपत्वान्मोहोदयसंज्ञित्वेनाशोभनत्वाच्च, तदपेक्षयापि तेषां न संज्ञित्वव्यपदेशः । नहि लोके कर्षापणमात्रास्तित्वेन धनवानुच्यते रूपमात्रेण वा रूपवानिति, अन्यत्रापि हेतुवादोपदेशसंज्ञित्वमाश्रित्योक्तं –

"कृमि-कीट-पतङ्गाद्याः, समनस्का जङ्गमश्चतुर्भेदाः । अमनस्का पञ्चविधाः, पृथिवीकायादयो जीवाः ।।१।।"

अथ दीर्घकालिकी-यया दीर्घमपि कालं भूतमर्थं स्मरति भविष्यच्च वस्तु चिन्तयति, कथमिति कर्तव्यमिदं सा दीर्घकालिकी संज्ञा । देव-नारक-गर्भज तिर्यग्मनुष्याणां असंज्ञिनस्त्वमनस्काः संमूर्च्छनजपञ्चेन्द्रियाहारतश्च प्रायोऽनया एव संज्ञया ते प्रवर्तन्ते ।

अथ दृष्टिवादकी दृष्टिः सम्यक्त्वादिस्तया वदनं वादस्तद्विषय उपदेशः प्ररूपणं तेन संज्ञा सम्यग्दृष्टेरेव, असंज्ञा तु सर्वो मिथ्यादृष्टिरिति एताश्च ज्ञानावरणक्षयोपशमजन्यमतिभेदरूपाः । अथ चतुर्भेदरूपाः, यथा – **चत्तारि सन्नाओ पन्नत्ताओ तं जहा आहारसन्ना भयसन्ना, मेहुणसन्ना परिग्गहसन्ना,** तत्राद्या क्षुद्वेदनीयोदयजन्या चतुर्भिः स्थानैरुत्पद्यते,

"ओमकोट्ठयाए छुहावेयणिज्जकम्मस्स उदयेण मईए तदट्ठोवओगेण (क्षुद्वेदनीयस्य कर्मण उदयेन) १ रिक्तोदरतया २, आहारकथा श्रवणादिजनितबुद्ध्या ३, सततमाहारचिन्तया ४, भयसंज्ञा भयमोहोदयजन्या चतुर्विधस्थानैरुत्पद्यते - हीणसत्तयाए भयमोहणिज्जस्स कम्मस्स

उदएणं मईए तदट्ठोवओगेण-तदर्थोपयोगेनेहलोकादिभयपर्यालोचनेन । वेदोदयान्मैथुनाय स्त्र्यादिसमालोकवेपथुप्रभृतिक्रिया मैथुनसंज्ञा, साऽपि च-चिय(मंस)सोणियाए वेयमोहणिज्जकम्मस्स उदयेणं मईए तदट्ठोवओगेणं ४, उपचितमांसशोणिततया (वेदमोहनीयस्योदयेन) कथाश्रवणादिजनितबुद्ध्या मैथुनार्थानुचिन्तनेन एताश्चतस्रः एकेन्द्रियादिजीवानां सर्वेषामपि भवति । तथा च केषाञ्चिदेकेन्द्रियाणामपि स्पष्टमेवोपलभ्यन्ते, यथा जलाद्याहारोपजीवनाद् वनस्पतीनामाहारसंकोचमिव वल्यादीनां तु हस्तस्पर्शादिभीत्या संकोचादिभ्यो भयसंज्ञा । बिल्वपलाशादीनां निधानोपरिपादमोचनादिभ्यः परिग्रहसंज्ञा, कुरुबकाशोकतिलकादीनां तु कमनीयकामिनीभुजाव-गूहनपार्ष्णिप्रहारकटाक्षादिविक्षेपादिभ्यः प्रसूनपल्लवादिदर्शनात् मैथुनसंज्ञा तथा -

आहार भयपरिग्गहमेहुण४ तह कोह-माण-माया य । लोभोहलोगसन्ना, दसभेया सव्वजीवाणं ।।१।।" (प्रव.सारो. ९२४)

अत्रौघसंज्ञा, स मतिज्ञानावरणक्षयोपशमात् शब्दार्थगोचरा सामान्यावबोधक्रिया ओघसंज्ञा, तद्विशेषावबोधक्रिया लोकसंज्ञा, दर्शनोपयोग ओघसंज्ञा, ज्ञानोपयोगस्तु लोकसंज्ञा इत्यर्थः, इति स्थानाङ्गटीकायाम्, आचाराङ्गटीकायां तु अव्यक्तोपयोगरूपा वल्लाविताना रोहणादिका ओघसंज्ञा । लोकसंज्ञा तु स्वच्छन्दघटितविकल्परूपा लोकाचरिता, न सन्त्यनपत्यस्य परलोकः, श्वनो यक्षा विप्रा देवाः काकाः पितामहाः बर्हिणां पक्षवातेन गर्भ इत्यादि । तथा १५ संज्ञाः-तत्र दश पूर्वोक्ता एव, सुखदुःखसंज्ञे सातासातरूपे ११-१२, मोहसंज्ञा मिथ्यादर्शनरूपा १३, विचिकित्सासंज्ञा चित्तविप्लुतिलक्षणा १४, धर्मसंज्ञा क्षमाद्यासेवनरूपा १५, एताश्च सर्वजीवानां यथासंभवं ज्ञेयाः ।

इह च क्वचिद् ग्रन्थे चतुर्विधाः संज्ञा उक्ताः, क्वचिद् दशधा, क्वचित् पञ्चदश, ततः कासांचित् पुनर्भणनेऽपि न पौनरुक्त्यम् । तथा श्रीआचाराङ्गे विप्रलापवैमनस्यरूपां शोकसंज्ञां प्रक्षिप्य षोडश संज्ञाः प्रतिपादिताः । अथ पूर्वोक्ता परिग्रहसंज्ञा ४ चतुर्धा । लोभोदयात् सचित्तेतरद्रव्योत्पादनक्रिया परिग्रहसंज्ञा । 'अविमुत्तियाए लोहमोहणिज्जस्स उदयेणं मईए तदट्ठोवओगेणं' अविमुक्ततया सपरिग्रहतया, सचेतनादिपरिग्रहदर्शनजनितबुद्ध्या ३ परिग्रहानुचिन्तनेन ४।।११२।।

को रविचंदगहाइसु कूरो मंदग्गहो य मंगलओ । तत्तो वि य को कूरो, जेसिं च परिग्गहो लग्गो ।।११३।।

भगवन् ! रवि-चन्द्रादिषु ग्रहेषु क्रूरो ग्रहः क इति प्रश्नः । गुरूत्तरश्च मन्दग्रहः शनैश्चरग्रहश्च पुनः मङ्गलः, पुनः पृष्टं ततोऽपि च कः क्रूरः, येषां च जीवानां परिग्रहग्रहो लग्नः सोऽतिक्रूर इति, यतः दीपकच्छन्दः ।।११३।।

जेण सयाण पियावहो, नरयलोगपहम्मि य सो रहो ।
भवइ जेण निव्वाण य, विग्गहो कलहकोडिकरो हु परिग्गहो ।।११४।।
अंगिणो य परिग्गह-मुच्छिया नरयभूमिगमणत्थसमुच्छया ।
न य कुणंति सुअसवणा-तिहिं ते लहंति य नंदवदुग्गइं।।११५।।

व्याख्या – तेन परिग्रहेण परिग्रहकारणेन प्रियानां वल्लभानामपि बन्धुजनानां बान्धवादिजनानां वधो मारणं स्यात् भवति, केचिद्राजपुत्रा राज्यर्द्धिनिमित्तं जनकसहोदरादिगोत्रिणोऽपि घ्नन्ति । च पुनः यमपुरीं प्रतिगमनाय परिग्रहो रथः स्यन्दनवाहनम्, केषाञ्चिन्नराणां परिग्रहो मरणाय शीघ्रं भवत्यभिप्रायः, तथा च तेन परिग्रहेण परदेशपरापूर्ववस्तुग्रहणकारणेन नृपाणां-राज्ञां परस्परं विग्रहः संग्रामो भवति इत्यादि कलहकोटीकरः परिग्रहः इति ।।११४।।

तथा च अङ्गिनः प्राणिनः परिग्रहमूर्च्छिताः सन्तो नरकगमनार्थं समुत्सुकाः नरकपृथिवीषु गमनार्थं सोद्यमाः । आस्तां धर्मक्रिया करणम्, श्रुतमपि जिनवचनमपि श्रवणातिथिं न कुर्वन्ति जिनोक्तधर्मशास्त्रमपि ये न शृण्वन्तीति ते पुरुषाः नन्द इव नन्दनृपवत् दुर्गतिं नरकरूपां ते लभन्ते, तत्र नन्दनृपो यथा -

जम्बूदीवम्मि भरहे वासे पुव्वदिसाभाए पाडलिपुरं नयरं आसि । तत्थ तिखंभामि व्व नंदो नाम राया सो निद्दओ अण्णानिहीआगरो अकरणं सो अकराणां करं काऊण कराणं महाकरं काऊणं य इड्ढिमंताणं इब्भाण धणीणं लोगाणं जं किंचि दोसं दाऊण तेसिं दंडिऊण धणं सुवण्णं च मेलेऊणं सव्वमवि देसमंडलं निद्धणीकयं तेण चम्मनाणगं पि पवत्तियं, ततो लोगो इय भणइ सिरिवीरजिणमोक्खगमणाओ किंचि वि साहिए एगूणवीसवाससएसु गएसु दुरप्पा कलंकी भावी सो एसो चेव नंदराया जाओ । एवं तस्सावववायं विगए भओ लोगो

वदई । एवं तेण सव्वलोगदंडेहिं बहुसुवण्णं धणं च मेलेऊणं सुवण्णपव्वया कया । धणरयणकूवा भरिया, तहा सो पुण्णकामो न संजाओ । अथ च आकर्ण्य तत् तथाऽयोध्यानाथेनाथ हितैषिणा तं प्रबोधयितुं वाग्मी दूतः प्रेषित आगमत् –

"सर्वतोऽप्याहृतः श्रीकं, निःश्रीकं तं तथापि हि । दूतो भूपमथापश्यत्, नत्वा चोपाविशत् पुरः ।।१।।"

सोऽनुज्ञातो नृपेणोचे, श्रुत्वा मत्स्वामिवाचिकम् । कुपितव्यं न देवेन, न हिताश्च दुभाषिणः ।।२।।

अवर्णवादो वयस्यस्य, यः[१] परम्परया श्रुतः । स[१] प्रत्यक्षीकृतो ह्यद्य[२], न निर्मूला जनश्रुतिः ।।३।।

अन्यायात्तोऽर्थलेशोऽपि, राज्ञः सर्वयशछिदे । अप्येकं तुम्बिकाबीजं, गुडभारान् विनाशयेत् ।।४।।

आत्मभूताः प्रजाः राज्ञो, राजा न छेत्तुमर्हति । क्रव्यादा अपि न क्रव्यं, निजमश्नन्ति जातुचित् ।।५।।

प्रजाः पुषाणं पुष्णन्ति, योषिता एव ता नृपम् । वश्याऽपि न ह्यनड्वाही, दत्ते दुग्धमपोषिता ।।६।।

सर्वदोषप्रसूर्[३]लोभो, लोभः सर्वगुणापहः । लोभस्तत् त्यजतामेतत्, त्वद्धितो वक्ति मत्प्रभुः ।।७।।

नन्दो तद्गिरो दावदग्धभूरिव वारिणा । अत्युष्णबाष्पममुचद्, दग्धकाम इवाश्रुतम् ।।८।।

१. यैः प, छ । २. ह्यदः० प, छ । ३. प्रभु प, छ ।

राजदौवारिको जातु, न वध्य इति नन्दराट् । उत्थायं गर्भवेश्मान्तः, सः शिरोऽर्तिरिवाविशत् ।।९।।

नासौ सदुपदेशानां, जवासक इवाम्भसाम् । योग्य इत्यामृशन् दूतोऽप्यगात् स्वस्वामिनोऽन्तिकम्[१] ।।१०।।

नन्दोऽप्यन्यायपापोत्थैः, वेदनादानदारुणैः । रोगैरिहापि संप्राप्तः, परमाधार्मिकैरिव ।।११।।

वेदनाभिर्दारुणाभिः, पीड्यमानो यथा यथा । नन्दश्चक्रन्द लोकोऽभूज्ञातानन्दस्तथा तथा ।।१२।।

पच्यमानो भृज्यमानो, दह्यमान इव व्यथाम् । अवाप नन्दः स्तोकं, हि सर्वं तादृक्षपाप्मनः ।।१३।।

ये भूतले विनिहता गिरिवच्च कूटी-भूताश्च येऽद्य मम काञ्चनराशयस्ते ।

कस्य स्युरत्यभिगृणन् न वितृप्त एव, मृत्वा निरन्तभवदुःखमवाप[२] नन्दः ।। इति परिग्रहस्वरूपम् । ।।११५।।

मेहुणसंनिजिएहिं, काओ किज्जंति कामचिट्ठाउ । ताओ किज्जंति मुणि-भणियाओ हवंति चउवीसट्ठाउ ।।११६।।

मैथुनसंज्ञिजीवैः काः काः कामचेष्टाः क्रियते इति प्रश्नः । अथ गुरूत्तरः-ताः मुनिभिरुपदिष्टाः, चतुर्विंशतिदुष्टा भवन्ति । तत्र कामो द्विधा - संप्राप्तोऽसंप्राप्तश्च, तत्राद्यः कामिनामन्योऽन्यसमुत्थश्चतुर्दशधा, दृष्टिसंपातः स्त्रीणां कुचाद्यवलोकनं १, दृष्टिसेवा हावभावसारं

१. ऽन्तिके प॰ छ । २. निरन्तभृज्च दुःखम. प॰ छ ।

तद्दृष्टेर्निमीलनं २, संभाषणं स्मरकथाभिरुचितकाले जल्पनं ३, हसितं वक्रोक्तिगर्भहसनं ४, ललितं पासकादिक्रीडा ५, उपगूढं गाढपरिष्वङ्गः ६, दन्तपातो दशनच्छदच्छेदविधिः, नखक्षतं ८, चुम्बनं ९, आलिङ्गनं १०, कुचादिग्रहणं ११, करणं सुरतारम्भः यत्र भेदं वात्सायनशास्त्रप्रसिद्धं १२, मैथुनं क्रिया १३, अनङ्गक्रीडा वास्यादयक्रियारूपाः १४,

असंप्राप्तो विप्रलम्भरूपो दशधा, दुष्टेऽपि मण्यादौ तदभिलाषमात्रं १, चिन्ता अहोरात्ररूपं तस्याः २, श्राद्धा तत्संगमाभिलाषः ३, स्मरणं संकल्पितरूपस्यालेख्या दर्शनेन आत्ममनो विनोदनं ४, विक्लवता तद्विरहदुःखेन आहारादिषु निरपेक्षा ५, लज्जानाशः ६, प्रमादः ७, तदर्थमेव उन्मादो नष्टचित्तता ८, तद्भावना तद्बुद्ध्या स्तम्भालिङ्गनं ९, मरणं निश्चेष्टावस्था १० इति दशधा अप्राप्तरूपः कामः ।।११६।।

इति तपागच्छेन्द्रश्रीहीरविजयसूरिशराज्ये उपाध्यायसकलचन्द्रगणिविरचिते श्रीहिताचरणग्रन्थे साधुदानपुण्यफलादिदृष्टान्तरूपाष्टादशमोऽधिकारः ।

।। सुगतिस्वरूप एकोनविंशतितमोऽधिकारः ।।

जाणिज्जइ कायव्वं, णराण चरणाइकारिणी सुगई । सा नरसुकुलुप्पत्ती, सुदुल्लहं तम्मि चरणाइ ।।११७।।

व्याख्या – भगवन् ! नराणां मनुजानां चरणादिकारिणी चारित्रादिगुणविधायिनी सुगतिः का ज्ञायते ? का चिन्त्यते ? इति प्रश्नः । अथ गुरुनिर्वचनं-सा सुगतिः सुदेवगतिरपि उच्यते, परं चरणादिगुणकारिणी सुगतिस्तु दुर्लभा सुकुलनरोत्पत्तिर्ज्ञेया । यत उक्तं च –

"छट्ठाणाइं जीवाणं नो सुलहाइ भवंति तं माणुस्सए भवे आयरियखित्ते जम्मं सुकुले पच्चायाती केवलिपन्नत्तस्स वा धम्मस्स सवणता सुतस्स वा सद्दहितस्स वा पतितस्स वा रोतितस्स वा सम्मं काएण फासणता ।।[1]

तथा च अत्र तु नो सुलभा उक्ता-उत्तराध्ययने । दुर्लभता उच्यते-यतः –

"दुलहे खलु माणुसे भवे, चिरकालेण वि सव्वं पाणिणा । गाढा य विवागकम्मणो, समयं गोयम ! मा पमायए ।।१।।"

[उत्त. अध्य. १० गा. ४]

तथा –

---

१. फासंता प, छ ।

"चत्तारि परमंगाणि दुल्लहाणि य जंतुणो । माणुसत्तं सुई सद्धा संजमम्मि य वीरियं ।।१।।" [उत्त. अध्य. ३ गा. १]

केचिद् देवा अपि मानुषं भवं ईहन्ति - इच्छन्ति, तद्वियुक्ताश्च परितापं गच्छन्ति । यथा -

तओ ठाणाइं देवे पीहेज्जा तं माणुस्सगं भवं आयरिए खेत्ते जम्मं सुकुल पच्चायाति ।। तिहिं ठाणेहिं देवे परितप्पेज्जा तं. अहो णं मए संते बले संते वीरिए संते पुरिसक्कारपरक्कमे खमंसि सिवंसि सुभिक्खंसि[१] आयरिय-उवज्झाएहि विज्जमाहिं कल्लसरीरेणं णो बहुसुते अहीते अहो णं मए इहलोगपडिबद्धेणं परलोगपरंमुहेणं विसयतिसिएणं दीहे सामन्नपरिआए अणुपालिए अहो णं मए इड्ढिरससायगुरुएणं भोगासंसगिद्धेणं णो विसुद्धचरित्ते फासिए । अन्नसुकुलोत्पत्तिकथने कुकुलोत्पत्तिपरिहारो हि पूर्वकृतपुण्यवतामेव भवति । यथोक्तं च -

"उत्पत्तिर्विमले कुले यतिजने सङ्गे जिनेन्द्रे परा, भक्तिर्दानमतिर्निदानरहिता वैराग्यबुद्धिर्भवे ।
सर्वत्रोचितकारिता गुणवतामेकान्तपक्षग्रहः, कुग्राहे विफला क्रिया सुकृतिनः कस्यापि संपद्यते ।।१।।

विमलसत्कुलोत्पत्तिं विना तु प्रायः सामान्यजातिकुलेषु जिनधर्मचरणगुणादिसामग्री दुर्लभा, तत्र सामान्यकुलानि यथा -

"शिल्पिनः स्वर्णकारश्च, दारुकृत् कांस्यकारकः । लोहकृत् कुम्भकारश्च, प्रकृतयो हि षडुत्तमा ।।१।।"

---

१. सुभिक्खम्मि प्र छ ।

"आरामी मणिकारश्च, तन्तुवायश्च लेपकः । दास्यकृत् नापितश्चैव, प्रकृतयो मध्यमा हि षट् ।।२।।"

"मलिम्लुचोऽथ रजकः, सौनिकश्चक्रिणस्तथा । ध्वजकश्चर्मकारश्च, प्रकृतयोऽधमा हि षट् ।।३।।"

अथ **सुदुल्लहं तम्मि चरणाइ** ति । **तम्मि** त्ति-तस्यां नरसुकुलोत्पत्तावपि प्राप्तायामपि सुनरकुलोत्पत्तौ च पुण्यनराणां चरणादिकं दुर्लभम् । यतो नरजन्म विना चारित्रपञ्चकं दुर्लभं तत्तु नरभवे एव भवति, आदिशब्दाद् द्वादशाङ्ग्यध्ययनं मनःपर्यवज्ञानं गणधरादिलब्धयः आहारशरीरं प्रमत्तादिगुणस्थानारोहणं आनतादिदेवलोकगमनं न नरगतिं विना स्यात् तीर्थकरत्वं च तीर्थकरकर्मप्रकृतिबन्धश्च चक्रवर्तित्वं वासुदेव-बलदेवत्वं तीर्थकरादिनिर्ग्रन्थदानदायकत्वं केवलज्ञानं परमावधिश्च मोक्षावाप्तिः इत्यादि, तस्या मनुष्यगतावेव प्राप्यते नान्यत्रेति गाथार्थः ।।११७।।

अथ चैवं गुणगणकरं नरभवं सुकुलोत्पत्तिं प्राप्यापि केचिदज्ञानादिषु पतिताः सर्वज्ञोक्तमहिंसादिलक्षणं धर्मं प्राप्यापि प्रमादादिना त्यजन्तीति दर्शयति -

अन्नाणयाइएहिं, एएहिं नडिया य केवि न कुणंति । सव्वण्णूत्तमहिंसाइयलक्खणसंजुअं धम्मं ।।११८।।

केवि य अन्नाणेणं, असवणयाए य सुद्धधम्मस्स । केवि अ अहम्मियाए, केवि नरा मयपमाएणं ।।११९।।

रागेण-दोसेण वा, आलस्सेणं व बालयाए वा । सयणधणमोहयाए, भयओ मइमंदयाए वा ।।१२०।।

किवण त्ति किडूयाए, गारवतियओ चउक्कसाएणं । पंचिंदियट्टयाए, सोगेणं के वि दुक्खेणं ।।१२१।।

व्याख्या – केचिन्नरा अज्ञानतादिभिः पदैर्नटिता दूषिताः सन्तः अज्ञानिभाषितधर्मरताः सर्वज्ञोक्तं अहिंसादिलक्षणभूषितं धर्मं न कुर्वन्ति, केचित्तु तं प्राप्तमपि त्यजन्ते, तत्र अज्ञानतादिपदानि यथा – तत्र केचिन्नरा अज्ञानतया अनार्यदेशाद्युत्पन्नत्वेन धर्मशब्दमात्रज्ञानाभावतो नरजन्मवन्तोऽपि पशुवत् धर्मं न जानन्ति न कुर्वन्ति, केचित् तु जन्मतोऽपि गुर्वादिसमीपे धर्मशब्दमात्राश्रवणतया केचित् तु अधर्मितया अधर्मिकुलाद्युत्पन्नत्वेन केचित् तु धर्मश्रवणेऽपि मदप्रमादादिना, तत्र प्रमादश्च –

"अन्नाणं संसओ चेव, मिच्छानाणं तहेव य । राग-दोसो मइज्झं(ब्भं)सो, धम्मम्मि य अणायरो ।।१।।"

अथवा **'मज्झं विसयकसाया'** इत्यादिना धर्मं न कुर्वन्तीति, तत्र केचिज्जीवा रागेण कामराग-स्नेहराग-दृष्टिरागरक्ता विद्युन्मालिविद्याधरवत् चाण्डाला रागेण दोषेण वा तुरमणिदत्तवत् । जिनधर्मद्वेषेण योगादिमिथ्याधर्मरागेण[१] वा केचिदालस्येन केचिद् बालतया[२] शिशुत्वमूर्खत्वेन वा केचित् तु स्वजनधनादिमोहमोहिताः[३], केचिद् भयतो राजादिभयतो दानपुण्यादिधर्मं न कुर्वन्ति,

१. सोगादि प्र । २. बालत्वात् प्र छ । ३. ० मोहे सहिताः प्र छ ।

केचिन्मतिमन्दतया वा धर्मं न कुर्वन्ति, तथा च केचित् कृपणतया धर्मसमवाये न मिलन्ति । केचित् तु द्युतादिक्रीडासक्ता धर्मं त्यजन्ति, केचित् तु सातागारवऋद्धिगर्विताश्च केचित् कषायकलुषितात्मान एव तिष्ठन्ति न तु धर्मं कुर्वन्ति, केचित् तु पञ्चेन्द्रियवशार्त्ता एव शब्दादिविषयासक्ता एव कालं नयन्ति । केचित् तु शोकार्त्ता एव मृतं पुत्रादिकं शोचयन्तो रुदन्ति देवगुर्वादिदर्शनमपि न कुर्वन्ति ।।११८-१२१।। किं विशिष्टं धर्मं न कुर्वन्ति, सर्वज्ञोक्तं अहिंसादिलक्षणविभूषितं मण्डितम्, अहिंसादिलक्षणं यथा –

केवलिजिणपन्नत्तं, हिंसाहीणं दयामयं अणहं । सच्चाणुट्ठाणं पुण, अहिट्ठिअं सच्चपुरिसेहिं ।।१२२।।

समखंतिसंतियं तह, अहिरण्णयसुवण्णयं व सुद्धिकरं । उवसमरयणनिहाणं, तिगुत्त-णवबंभचेरं च ।।१२३।।

गयपयणपायणं तह, भिक्खासणाणाइ वत्ति व । सययमकिंचणमुणिणो, निरग्गिसरणो व विहिमरणं ।।१२४।।

अत्र **केवलिजिणपन्नत्तं** ति-त्रिभिः केवलिभिः प्रज्ञप्तं त्रिभिर्जिनैरपि प्रज्ञप्तं धर्ममिति गम्यम् । तत्र केवलित्रयं यथा – तओ केवली पन्नत्तो ओहिणाणकेवली मणपज्जवनाणकेवली केवलनाणकेवली, तओ जिणा पन्नत्ता, तं जहा ओहिणाणजिणे मणपज्जवनाणे जिणे केवलणाणजिणेत्ति, पुनः किं विशिष्टं ? सदयं सर्वमपि जिनधर्मं दयामयानुष्ठानत्वात्, पुनः किं विशिष्टं ? **हिंसाहीणं** तत्र

कृष्णलेश्यापरिणामो रौद्रध्यानपरिणामो हिंसा तया **हीणं** त्ति-तया हीनं यतो जिनोक्तमार्गे न यागादिहिंसाकृत्यानि भवन्ति सूत्रोक्तक्रियायां क्रियमाणायां तु या काचिद् विराधना सा तु निर्जरा ज्ञेया । यतः –

"जा जयमाणस्स भवे, विराहणा सुत्तविहीसमग्गस्स । सा होइ निज्जरफला, अब्भत्थविसोहिजुत्तस्स ।।१।। त्ति" [पुष्पमाला-२४१]

पुनः किं विशिष्टं ? अनघं निःपापं सर्वपापविनाशकत्वात् तथा च सत्यानुष्ठानं सत्यमहापुरुषोक्तत्वात्, सत्यं सत्यानुष्ठानं च, किं विशिष्टं धर्मं ? सर्वक्षान्तिं शान्तिं च ददातीति सर्वक्षान्तिशान्तिदं अथवा समस्तक्षान्तिशान्तिं गच्छतीति समक्षान्तिशान्तिगम्, तथा च अहिरण्यसुवर्णकं सर्वोत्तममुनिधर्मे तु रूप्यसुवर्णरक्षणरहितत्वात् तथा शुद्धिकरं अशुद्धानां पापात्मनां जीवानां शुद्धिं करोतीति शुद्धिकरम्, तथा उपशमरूपरत्ननिधानं उपशमसारचारित्रधर्मत्वात् तथा त्रिगुप्ति-नवब्रह्मचर्यं च मनो-वाक्-कायेन ब्रह्मचर्येण पवित्रितत्वात् ।।११९।। तथा च गतं पचनं पाचनं अन्नादीनां यस्मात् तत् गतपचनपाचनम्, तहा अदोषभिक्षाशनादिर्वृत्तिर्यत्र तत्, तथा सततं निरन्तरमकिञ्चना मुनयो यत्र तत् तथा महाशीतेऽपि निर्गतं अग्निशरणं **'नत्थि जोइसमं सत्थं'** इति वचनत्वात्, च पुनर्विधिना आराधनापताकादिविधिना पण्डितमरणं यत्र तत् बहुशो काममरणनिर्वेदाः, प्रातःकरणेनानशनकरणं तु विधिमरणमिति ।।१२२-१२४।।

अकुसलमणो निवत्तिं, असंनिहिं सुहपवत्तिलक्खणं सुमनं । इरियाइसमिइगमणं, जईणं निज्झाणयं धम्मं ।।१२५।।

सिवियमुणिधम्मकिरियं, केवि य सुवंति कंडरिय व्व । मुत्तूणं तं च केवि य, लिंति पुणो नंदिसेणु व्व ।।१२६।।

व्याख्या – एतयति धर्मं यतीनां सततमकुशलमनोव्यापारनिवृत्तिर्यत्र, संसारव्यापारार्तिनिवर्तकत्वात् देवलोकसुखसमसंयम सुखलीनत्वात् । यत उक्तं च –

'देवलोगसमाणो परिआओ य महेसिणं' । रयाणं अरयाणं, महानरयसारिसो ।। इति [१]वचनाच्च, [दशवैका० प्र.चू.१०]

पुनः किं विशिष्टः ? असंनिहित्ति-न विद्यते संनिधिः आहारादिसंचयो यत्र, तथा शुभप्रवृत्ति[२]लक्षणो यदपि तदपि गमनागमनव्यापारः शुभलक्षण एव निर्जराकारणत्वात् । पुनः किंः विशिष्टः ? सुमनः सुष्ठु मनो यत्र, पुनः किं विशिष्टः ? ईर्यादिसमित्या गमनं विहारो यत्र तं यतीनां धर्मम् ।।१२१।।

सुगमा । (पुंडरी)अ-कण्डरीकसंबन्धो –

पुंडरीगणीणयरीए पुंडरीय-कुंडरीया दो वि भायरो । अन्नया तत्थ धम्मघोसनामायरिआ समागया, निग्गया नियबहवो धम्मिलोगा भयवओ वंदणत्थं, तत्थ गओ पुंडरीओ वि राया वंदणत्थं, सुआ य संवेयणी धम्मदेसणा, पडिबुद्धा आमंतिया य राइणा रायवग्गिया लोगा, कंडरिओ य जुवराया भणिओ य सहोयर ! अहं दिक्खं गिण्हामि, तुमं च रज्जं गिण्हाहि, तेण भणियं किं नरयाइदाइणा रज्जेण अहमवि दिक्खं पडिवज्जिस्सामि, पुंडरीएणं भणिअं, जुत्तं तुम्हारिसाणं कहणमिणं परं दुक्करं तव अइसुकुमालस्स [३]कठिणवत्ति पवज्जंति । तेण भणियं न

१. वचनत्वाश्च प्र । २. लक्षणं प्र । ३. कढिण प्र छ ।

य सपुरिसाणं किं चि दुक्करं ति । वारिज्जमाणगहिआ पव्वज्जा । अनायगं रज्जं कहं चिट्ठइ त्ति । वारिओ लोगेण पुंडरीओ पव्वज्जमाणो । अह बहुकालं पव्वज्जमणुपालिऊण, अन्नया दुस्सहपरीसहोवसग्गेहिं मायागारवाइरसगिद्धित्तणेणं भग्गो वि चिंतयाए कम्मपरिणईए अणाइभवत्थदोसेणं गओ चरणपरिणामो । चिंतियं च तेण गिण्हामि रज्जं, आगओ स पुरिं, ठिओ उज्जाणे, जाणिओ पुंडरीएणं, चिंतियं च तेण किमेवमागओ, ण सुंदरं ति, आगओ स पुरं जणंतेउरेण सह वंदणत्थं, वंदिओ, पसंसिओ बाढं, लज्जाए भग्गपरिणामोवि, एसो विहरिओ, पुणो वि आगओ पच्छा वलिऊणं, ठिओ उज्जाणे, पुट्ठो रायणा, अट्ठो भंते भोएहि त्ति भणिअं तेण । अंता तओ राइणा भणिआ मंतिप्पमुहा पुव्विं मए निसिद्धमाणेणवि गहिया पव्वज्जा अणेणं त्ति । अहुणा रज्जं गिण्हाओ इमो त्ति भणिऊण दिन्नं तस्स रज्जं पुंडरीएणं, गहियं तस्स संतिअं रजोहरणाइअं लिंगं गहेऊण गुरुसमीवगमणत्थं निग्गओ, उवविट्ठो कंडरीओ रायसीहासणं तद्दिवसे एव । भुत्तं च रायजुग्गं भोयणथालं सरसभोयणेणं जाया तस्स विसूईआ, रज्जाईमुच्छिओ कामभोअपरिणामो । अदिट्ठव्वो ति लोएण निंदिज्जमाणो उल्लसियअट्टरुद्दज्झाणो मरिऊण गओ सत्तमिं पुढविं । पुंडरीओ पुण गंतूण गुरुसमीवं करेमि अप्पाणं निक्कलंकं ति, उल्लसियतिव्वसुहपरिणामो अमण्णूअन्नपाणेहिं जायविसूईयावेयणे वि अवलियसुहज्झाणो कालं काऊण गओ सव्वट्ठसिद्धं ति, यओ भणिअं च –

"वाससहस्सं पि जई, काऊणं संजमं सुविउलंपि । अंते किलिट्ठभावो न विसुज्झइ कुंडरीओ व्व ।।"

"अप्पेण वि कालेणं, केइ जहा गहियसीलसामन्ना । सोहंति नियय कज्जं, पुंडरीयमहारिसी व्व जहा ।।२।।" [उप.माला. २५१-२५२]

अथ नन्दिषेणो यथा – रायगिहनयरे सेणियनिवस्स पुत्तो नंदिसेणो समणस्स भगवओ महावीरस्स समीवे धम्मं सोऊण पडिबुद्धो जाओ चरणगहणपरिणामो वि, भाविभोगकम्मोदयओ जाणिऊण देवयाए पडिसिद्धो वि पडिवन्नो वयं, जाओ गीअत्थो अज्झकिरिओ, अन्नया एगल्लविहारजुग्गं परिकम्मं कुणमाणो गोअरग्गं पविट्ठो । गओ गणिआगेहं, कओ धम्मलाहो, गणिआए भणिओ, अम्हाणं हि धणलाहेण पओअणं ति न उण धम्मलाहेणं ति । तओ तहाविहभवियव्वयावसेण इड्ढिसंपन्नेणं गिहनीवारओ आगरसिऊणं तिणं पाडिआ अणेगहिरण्णवुट्ठी, तओ गणिआए चिंतिअं एसो जंगमनिहाणं उवाएण रक्खणीओत्ति, निगच्छमाणो धरिओ, भाडिअं दाऊण कहं गच्छसि कम्मविवित्तियाए ठिओ, आवज्जिया गणिआ, नेककलाविन्नाणेहिं गहिओ तत्थ चिट्ठमाणेण पइदिवसं दसभविपडिबोहणे अभिग्गहो । तओ पइदिवसं दसं दसदसभवियं पडिबोहिऊण भगवओ सीसत्ताए देइ । पच्छा खणो कम्माणि, जायपच्छायावो विसुद्धं सामन्नं कुणमाणो विहरिओ ।।१२५-१२६।।

इति तपागच्छेन्द्रश्रीहीरविजयसूरिराज्ये उपाध्यायसकलचन्द्रगणिविरचिते श्रीहिताचरणग्रन्थे सुगतिस्वरूपः एकोनविंशतितमोऽधिकारः

धर्मभेदस्वरूपो विंशोऽधिकारः

अथ धर्मभेदान् पृच्छति –

निव्वाणाइय धम्मो, कइभेओ भविजिणेहिं कायव्वो । दाणाइयचउब्भेओ, नाणाइ य दसविहो मुणिणो ।।१२७।।

दाणं सीलं सुतवो, भावो इय चउव्विहो मुणेयव्वो । नाणं दंसण-चरणं, तव-खंति-सुहो य मुणिधम्मो ।।१२८।।

दाणं च होइ तिविहं, णाणाभयधम्मुवग्गहं दाणं । जं तत्थ णाणदाणं, तमिणं णेयं समासेण ।।१२९।।

णाणं जहट्ठिआणं, जिणुत्ततत्ताणमवगमो भविणो । संखेव-वित्थरेण व, सम्मदिट्ठीण मणदीवो ।।१३०।।

दिन्नेण जेण जीवो, विण्णाया होइ बंधमुक्खाणं । तं होइ णाणदाणं, सिवसुहसंपत्ति(अं)बीअं ।।१३१।।

व्याख्या – भगवन् ? स पूर्वोक्तो निर्वाणादिदायको धर्मः कतिविधो कतिभेदो भविजनैर्भव्यात्मभिः कर्तव्य इति प्रश्नः । उत्तरं तु दानादिकचतुर्भेदश्चतुःप्रकार अथवा ज्ञानादिकचतुर्विधः, यत उक्तं च –

"दान-शील-तपो-भावभेदाद् धर्मं चतुर्विधम् । मन्ये युगपदाख्यातुं चतुर्वक्त्रोऽभवद् भवान् ।।१।।" [वीत. स्तो प्र.-४गा.४] ज्ञानादिचतुर्विधश्च –

"नाणं च दंसणं चेव, चरित्तं च तवो तहा । एस मग्गुत्ति पन्नत्तो, जिणेहिं वरदंसिहिं ।।२।। [उत्त. अध्य. २८ गा.२]

अथवा दशविधो धर्मो मुनेः साधोः कर्तव्य इति ।।१२७-१२८।।

अथ प्रत्येकं तद्भेदान् दर्शयति - सुगमा, तत्र दानं च त्रिविधं भवति, ज्ञानदानमभयदानं धर्मोपग्रहदानं च, तथा च यद् ज्ञानदानं तदिदं वक्ष्यमाणं समासेन संक्षेपेण ज्ञेयं ज्ञातव्यमिति ।।१२९।। तत्र ज्ञानस्वरूपं च यथा - यथावस्थितानां जिनोक्ततत्त्वानां पदार्थानामवगमोऽवबोधो जीवस्य प्राणिनो ज्ञानं भवति । यतो ज्ञानं तु जीवस्यैव स्यान्नाजीवस्य । स चावबोधस्तावत् कस्यचिद् भविनः प्राणिनः संक्षेपेण कस्यचिच्च विस्तरेण भवति, सम्यग्दृष्टेश्च मनोदीपः प्रदीपो ज्ञानं स्यात् ।।१३०।।

अथ ज्ञानफलस्वरूपं दर्शयति – दत्तेन ज्ञानेन श्रुतज्ञानेन जीवो जन्तुर्विज्ञाता विचक्षणो भवति । जीवाजीव-पुण्य-पापास्रव-संवर-निर्जरा-बन्ध-मोक्षादितत्त्वानां विज्ञाता स्यात् । यत उक्तं च –

ज्ञानाद् विदन्ति[१] खलु कृत्यमकृत्यजातं, ज्ञान-चारित्रममलं च समाचरन्ति ।
ज्ञानाच्च भव्यभविनः शैवमाप्नुवन्ति, ज्ञानं हि मूलमतुलं सकलश्रियां तत् ।।१।।"

तथा –

मोहं धियो हरति कापथमुच्छिनत्ति, संवेगमुत्तमयति प्रशमं तनोति ।
सूते नु रागमधिकां मुदमादधाति, जैनं वचःश्रवणतः किमु नो विधत्ते ।।१।।"

तथा –

"न भवति धर्मः श्रोतुः, सर्वस्यैकान्ततो हितश्रवणात् । ब्रुवतोऽनुग्रहबुद्ध्या, वक्तुस्त्वैकान्ततो भवति ।।२।।" [तत्वार्थकारिका २९]

'तं होइ णाणदाणंति' येन ज्ञानदानेन ग्राहकस्य ज्ञानदातुश्च पूर्वोक्तगुणा भवन्ति तद् ज्ञानदानं किं विशिष्टं ? शिवसुखसंप्राप्तिबीजम् ।।१३१।। तथा च –

---

१. दानाद् विदतीति प्र छ ।

नाणं अणिहणवित्तं, णाणं सिवलच्छिसाहणे मंतं । णाणमकारणमित्तं, णाणं गुणरयणवरखित्तं ।।१३२।।

णाणं तमोन्तसूरो, णाणं मइसालिवुड्ढिजलपूरो । णाणं णायणिहाणं, सिवजाणं झाणसंताणं ।।१३३।।

एअं इहलोयम्मि य, परलोयम्मि य सुहाइं देई पुणो । पावेइ जेण जीवो, तम्हा णाणं च दायव्वं ।।१३४।। सुगमा,

सुर-नरवईण सुक्खं, अणुत्तरं बुद्धिरिद्धिविन्नाणं । तह विमलणाणणयणं, पावइ णाणप्पयाणेणं ।।१३५।।

ज्ञानं अनिधनवित्तं अचौर्यं धनं शिवलक्ष्मीसाधने मन्त्रमिव मन्त्रम् । तथा अकारणमित्रं तथा गुणरत्नोत्पत्तिक्षेत्रम्, तथा ज्ञानं अज्ञानतमसः अन्तकरणे सूर्यः, ज्ञानं कुमतान्धकारतरणिरिति वचनत्वात्, तथा ज्ञानं मतिरूपशालिवृद्धिविषये जलपूरः, शालिक्षेत्रेषु प्रचुरजलपूर एव तासां वृद्धिहेतुत्वात् । ज्ञानं न्यायनिधानम्, सर्वेषां लोकलोकोत्तरन्यायानां निधानं ज्ञानमेव श्रुतज्ञानमेव, तथा शिवमार्गयानं तथा च सर्वशुभध्यानसंतानम् । एवंविधज्ञानदायकस्य फलं यथा – सुरनरपतीनां सुखं तथा अणुत्तरं बुद्धिसमृद्धिविज्ञानं च तथा विमलं ज्ञाननयनं केवलज्ञानं ज्ञानप्रदानेन प्राप्नोति ।।१३२-१३५।। तथा (चोक्तं) –

गयराग-दोस-मोहो, सव्वण्णू होइ णाणदाणेणं । सुरणुअमाणणिओ, सुणाणदाया भवे सुद्धा ।।१३६।।

सिरिभद्दबाहुपमुहा-सुअदायारो य थूलभद्दाणं । तह अज्जरक्खियस्स वि, सिरिवयरसामिणो जाया ।।१३७।।

सुगमा । अत्र श्रीभद्रबाहु-श्रीस्थूलभद्रयोः पूर्वपाठनपठनसंबन्धोऽपि ज्ञेयः, तथा तेषां संबन्धो कथातो ज्ञेयस्तद्यथा...☆ ।।१३६-१३७।।

सिरिधम्मसूरिसीसा, चउवीसं पाढिया पमाएणं । आयरियमंगलणं, पत्ता गुरुणा सहस्सारे ।।१३८।।

कुशपुरं नाम णयरं, तत्थ सुमंगलो नाम माहणो, पगइभद्दओ[१] धम्मप्पिओ य, तेण खित्ते हलं खेडमाणेणं दुहा खंडीकओ सप्पो दिट्ठो, तेण दयावरेण पावभीरुणा, पावभीएणं चिंतियं अहो नियउयरभरणकए जीवा पंचिंदियवहमाणाइ पावाइं एवं कुणमाणा वट्टंति, तो अहं कहं इमस्स भुअंगमहिंसाओ दुग्गइगमणं विणा सुचिस्संति इच्चाइपच्छायावेण अप्पाणं निंदमाणो वेरग्गं पत्तो, तत्तो तेण चिंतियं पुत्तस्स लहंगेहाइ य समप्पिऊणं खित्ताओ निगच्छमाणो जो कोवि दंसणी पासिस्सं पढमं दिट्ठिगोयरो भविस्सइ, सो वि जइ सुतत्तण्णू भविस्सइ तस्स धम्मं पडिवज्जिस्सामि, इय चिंतिऊण निग्गओ सुहा लद्धा सुउणा भवंतु त्ति, गओ अग्गओ गच्छंतस्स संमुहा मिलिआ जिणमुणिणो पणमिआ तेण पुट्ठं धम्मं, तेहिं कहिओ सव्वजीवसुहकरो जीवदयाईओ धम्मो, पडिबुद्धो, गहिया पव्वज्जा, अहिज्जिओ चउद्दसपुव्वाइं, तस्स

१. भद्दिओ प, छ । ☆ त्रुटितमस्ति

दीक्खागुरुहिं सिरिधम्मवद्दसूरीहिं, तस्स सुमंगलसूरिस्स सुपत्तालया, चउव्वीसं सीसा चउद्दसपुव्वी पढणत्थं अप्पिआ । स सुमंगलायरिओ तेसिं पाढइ, परं जोगपट्टोवट्ठं भाइ पमायपरो पाढइ एवं गच्छति समए सो विणावि अणुओगालंबणं जोगवट्टं न मुंचति, सीसेहिं वि फालो अचित्तो तह उत्तिओ वा, चउरंगुलविच्छिन्नो, इच्चाइ सिद्धंतसावणपुव्वं भणिओ भासासमिइई जाणाविओ । जोगवट्टं निक्कारणं वावरइ अह आयरिय सुमंगलो आऊअं परिपूरिय अणालोइअपडिक्कंता कालं काऊणं सहस्सारं, सीसा वि चउवीसं पि आराहियसंजमा अपमत्ता ते वि तत्थोववन्ना, तओ आयरियदेवो सुंदानगरीए अपुत्तस्स अंबडववहारिणो पुत्तत्ताए उववन्नो, सोहग्गाइगुणसुंदरो नामेणावि गुणसुंदरो त्ति, पत्तो तारुण्णं इत्थावसरे सिणाणमज्जणं कुणमाणस्स पुव्वकयपमायकम्मोदएणं वायविगारो सरीरे पविट्ठो तेण वाउरोगेण पक्खित्तजोगपट्ट परुषासणसंठाणसरीरो जाओ । तओ पुत्तसिणेहेण जणएण कया कारिआ य बहवोऽपि पडियारा वायुसमणत्थं परं अभव्वस्स सुगुरुवएसा इव जाया सव्वेवि निप्फला, इत्थ समयम्मि तीए-चेव णयरीए जिणधम्मरयणस्स ववहारिणो गिहे ते चउव्वीसं सीसदेवा देवलोगाओ चविऊण पुत्ता जाया । अन्नया गीअत्थसाहुदंसणपज्जुवासणपरा जायवेरग्गेण पव्वइआ विवित्ततवोवहाणा उपन्नओहिणाणं जाणंति ते पुव्वभवचेट्ठियं निअधम्माणुट्ठाणं, दिन्नो तेहिं नियगुरुणो उवओगो दिट्ठो सो तयवत्थो तओ तेहिं गुरुभत्तीए किं वा परेहिं लाभं जाणिऊण गया ते चउवीसं पि अंबडगेहं, तया च मिच्छत्ती अंबडो अणेगववहारिसभासमक्खं नियगेहे चेव देसंतरागयनाडगसमीवाओ नाडयं कारयमाणो आसि । इत्थंतरे ते चउवीसं मुणिवरा तत्थ आगया, विसज्जियं नाडयं । तेण अंबडेण साहूणो पासिऊण साहूणं हासकरणत्थं भणिअं तेण भो भो

महप्पाणो तुब्भे नट्ठिऊं जाणह । तेहिं वुत्तं जाणामो, परं अम्ह नाडयं अणुवमं अपुव्वं तेण जो कोवि इत्थ गेहे न भवइ सो सेट्ठिपमुहो आमंतिअव्वो नाडयविलोअणत्थं, तओ अंबडेण तत्थ उप्पाडिऊण सो गुणसुंदरो वि आणीओ । अन्ने वि कोउगपरा लोगा, तओ तेण अंबडेण तेसिं साहूणं हत्थितालमुअंगवसाइनाडगोवगरणं अप्पिअं, तओ वुड्ढसाहुणा बद्धपरियरेण नट्ठिअं, वाइअं तालाइ, वुड्ढेण नच्चमाणेण एसा गाहा पढिआ, जहा –

"धिद्धीए मायललिअं, ठाणविसेसा अणुंपि होइ बहुं । किं कुणिमो अंबडया, पसरंति न अम्हं गुरुपाया ।।१।।

तओ इमं गाहं तेवीसंपि साहवो युगवं गायंति तओ जाओ गुणसुंदरो वीमंसारूढो । पुणो वि वुड्ढसाहुणा गीआ गाहा ।"

"धिद्धीए मायललिअं, सुमंगलो पत्तमेरिसं वत्थं । किणिणिमो मंगलया, पसरंति न अम्ह गुरुपाया ।।२।।"

तओ तेवीसं तहेव गायंति एवं वारत्तयंपि गाइअं । तओ मुच्छावसेण पुव्वजाइसरणं जायं सुमंगलजीवस्स, सुमंगलनामसवणेण पुट्ठो जयणाइकुडुंबेण, भणियं तेण जायं मम जाइसरणं, मम एए साहवो पुव्वभवसीसा, अहमेतिसिं गुरू । जोगवट्टाइपमाएण मम एरिसी अवत्था जाया । तओ तेहिं साहूहिं कम्मविसए धम्मोवएसो दिन्नो, पडिबुद्धो, तस्स जणयाइआ जाया सावया । सुमंगलजीवेण भणिया ते तुब्भे ओहिणाणिओ, मम रोगोवसमणोवायं भणह, तेहिं भणियं सट्ठिं वरिसाणि जाव पंचोववासपारणके चउदसकवलपाणं कायव्वं । एवं

वायुरोगावगमो होहि त्ति, पडिवन्नं तेण, तओ ते पत्ता उज्झाणोवस्सयं, तओ नाणाइआराहणेण अप्पमत्तो आउअं पूरिय कयसंजमो पत्तो सव्वट्ठसिद्धिं, तओ चुओ सिज्झिस्सइ, जणयपमुहा य चरित्तमाराहिय पत्ता नवमगेविज्जं, तओ चुआ सिज्झिस्संता त्ति ।।१३८।।

अथ ज्ञानिनां यत् क्रियते तत् पृच्छति –

णाणीणं किं किज्जइ, दिज्जइ आहारमाइअं सुद्धं । आहाराइ विणा नो, जम्हा णाणीण देहाइं ।।१३९।।

असण-पाण-सुखाइम-साइमवसहिमासणमोसह-चिवरं । सयणपत्तं समणाण दिंता धणदेव इव धण्णा[1] ।।१४०।।

केणं व कालज्जुग्गं, दिन्नं दाणं मुणीण सुमणुण्णं । घणदेवो धणदिन्नो [2]दुन्नि वि संतित्थ दिट्ठंता ।।१४१।।

अत्र धनदेव-धनदत्तकथा यथा-सिंहलद्वीपे सिंहलेश्वरो राजा, सिंह[3]ला राज्ञी, सिंहलसिंहः सुतः । सो अन्यदा वसन्तसमये वने क्रीडार्थं जगाम । तावता तत्र वनगजेन चेर्यमाणायाः कस्याचित् कन्यायाः हाहारवं शृणोति –

न हु ताता पस्ससि तुमं जणणि तुमं पि हु करेसि मं करुणं । कुलदेवयाउ तुम्ह वि, इह समए कत्थ विगयाओ ? ।।१।।"

इत्यादि विलापवर्णनम् । ततः सिंहलसिंहकुमारेण चिन्तितं -

१. सयणपत्तमुहं समणाण, जे दिंति धणदेव तेसु धी प१ प२ छ ।
२. देवोषणमित्तो सहेस इत्थ दिट्ठंता प१ प२ छ ।
३. सिंहसा प१ छ ।

"किं ताणं जम्मेणं वि, जणणीए पसवदुक्खजणगेण । परउवयारगुणो वि हु, न जाण हिययं परिप्फुरइ ।।१।।"

ततः कुमारेण हस्तिनं वशे कृत्वा मोचिता कन्या हस्तिपार्श्वात्, विस्तृता कुमारस्य कीर्तिः, एतद् व्यतिकरं श्रुत्वा राजाऽपि हृष्टः, यतः – **'गुणाः कुर्वन्ति०'** ततः सा कन्या धनवती नाम्नी कुमारगुणानुरागिणी जज्ञे तत्पिताऽपि धनश्रेष्ठी कुमारस्य तां ददाति, कृतं पाणिग्रहणम् । इतश्च यदा कुमारः पुरमध्ये क्रीडया यतो यतो याति ततस्ततः पौरनारीवर्गोऽपि समग्रः स्वस्वकर्माणि त्यक्त्वा कुमाररूपहृतहृदयः पृष्ठितमः परिक्रमति । पौरैः राजा विज्ञप्तः, राज्ञाऽपि कुमारो नगरान्तः भ्रमन् निषिद्धः देशान्तरं गन्तुकामो धनवतीं गृहीत्वा रात्रौ पुरान्निर्गत्य मार्गे गच्छन् समुद्रतटे प्राप्तः, आरूढो यानपात्रं धनवतीयुतः कुमारः प्रतिकूलवातेन भग्नं यानपात्रम्, धनवती फलकं लब्ध्वा प्राप्ता तीरे, मार्गे गच्छन्ती वियोगातुरा प्राप्ता कुसुमपुरम्, तत्र प्रियमेलकतीर्थे सा दुस्तपं तपस्तपति यावद् भर्ता न मिलिष्यति तावद् मौनव्रतं पालनीयमित्यभिग्रहं गृह्णाति । इतश्च कुमारोऽपि प्राप्तफलकखण्डं समुद्रमुत्तीर्य रत्नपुरं प्राप्तः । तत्र रत्नप्रभराज्ञः रत्नसुन्दरीप्रियाकुक्षिसमुद्भवा रत्नवतीकुमरी[1] सर्पेण दष्टा, मान्त्रिकैः परित्यक्ता, कुमारे पटहस्पर्शनापूर्वं सा सञ्जीकृता परिणीता च । कुमारो धनवतीवियोगेन भूमौ[2] शेते, ब्रह्मव्रतं च पालयति । एकदा तया पृष्टः सपत्नीर्ष्याभयेन समयोचिते तमुत्तरं दत्ते । देवि ! ममेयं प्रतिज्ञा -

"देसावलोअणत्थं, निगच्छंतस्स महइ पइन्ना । बंभं भूमीसयणं, जा नियजणए न पिच्छामि ।।१।।"

१. रेवती कुमरी प, छ । २. वियोगे भूमौ प, छ ।

रत्नवत्योक्तं नाथ ! त्वं धन्यो यस्येयती भक्तिः पित्रोरुपरि, राज्ञाऽपि कुमारः पृष्टः सन् [१]स्वदेशपुरकुलादिकं सर्वं कथयति । ततो रत्नवतीयुतं बहुरत्नवस्त्रादिभिः सत्कृत्य सिंहलद्वीपं प्रति विसर्जयति, सज्जीकृतं यानपात्रम्, आरूढः सप्रियः कुमारः राज्ञा च [२]ऋद्धाभिधः स्वमन्त्री संप्रेषणार्थं प्रेषितः । दृष्टा तेन मन्त्रिणाऽन्यदा कन्यका लुब्धस्तस्यां स कुमारं जलधौ पातयति । रत्नवती विलापान् करोति, मन्त्री भणति, भद्रेऽहं तव सदाऽपि दासः भव मम भार्या । तया चिन्तितं नूनमेष दुरात्मा मम शील(खण्डनं) करिष्यति, तत् किमप्युत्तरं दत्त्वा शीलं रक्षयामीति विचिन्त्य सा वदति, भो [३]सचिव ! तीरे गत्वा एतन्मृतकार्यकरणानन्तरं त्वद्वचः करिष्ये । भग्नं प्रवहणम्, लब्धफलका रत्नवती कुसुमपुरे प्रियमेलकतीर्थे प्राप्ता, साऽपि तथैव तपस्तपति, मन्त्र्यपि प्राप्तफलकः कुसुमपुराधिपस्य राज्ञो मन्त्री जातः । कुमारोऽपि जलधौ पतन् केनाप्युत्पाट्य तापसाश्रये मुक्तः, कुलपतिरपि कुमारशरीरे [४]राजलक्षणानि दृष्ट्वा स्वपुत्रीं ददाति, जातं पाणिग्रहणम्, हस्तमोचनके दत्ता एका कन्था प्रतिदिनं टङ्कशतदात्री, एका च खड्वा आकाशगामिनी, कुलपतिं नत्वा चटितः सप्रियः कुमारः खड्वायाम्, धनवतीं मनसिकृत्य चालिता खड्वा प्राप्ता सा आकाशमार्गे कुसुमपुरोद्याने, रूपवत्यास्तृषा लग्ना, कुमारः प्रियां कन्थां खड्वां च मुक्त्वा पानीयार्थं निकटावटे गतः, तत्र च कूपे भो कुमार ! मामस्मादन्धकूपात् कर्षय इति मनुष्यभाषया ब्रुवाणः सर्पो दृष्टः । स च कुमारेण उत्तरीयं मुक्त्वा कर्षितः, सर्पेण च कुमारो दष्टो हस्ते । कुब्जः कुरूपश्च बभूव । कुमारेणोक्तं भो सर्प ! भव्यः प्रत्युपकारः कृतस्त्वया, सर्पः [५]प्राह भो

१. स्वदेशे पुर० प, छ । २. राज्ञाऽवरुद्धा० प, छ । ३. मत्रिन् प, छ । ४. गजल० प, छ । ५. सर्प आह प, छ ।

कुमार ! एष एव तव प्रत्युपकारं करिष्यति, संकटे स्मरणीयोऽहं इत्युक्त्वा तिरोदधे सर्पः, किमिति विस्मितमानसः पानीयं लात्वा प्रियां भणति प्रिये ! पानीयं पिब । सा कुब्जरूपं दृष्ट्वा परपुरुष इति न तत्संमुखं विलोकयत्यपि सा तत उत्थाय सर्वत्र गवेषयति स्वप्रियम्, क्वाप्यदृष्ट्वा प्रियमेलकतीर्थे गता, तथैव तपस्तपति तिस्रोऽपि मीलितनयना[१] मौनव्रतधारिण्यस्तिष्ठन्ति । विकृतिपरिवर्जितं धार्मिकतनोपचितं साहारं भुञ्जते । राजाऽपि कुतूहलेन तत्राच्छति पटहं दापयति य[२] एता वाचयति[३] तस्य स्वसुतां कुसुमवतीं ददामि ततः कुब्जकधारी कुमारः पटहं स्पृशति, ततः कोरकपत्राणि[४], वेष्टनकेनाच्छाद्य तत्रागच्छति राजसमक्षं वस्त्रमुत्सार्य कोरकपत्राणि वाचयति, कथयति यो यो द्विजातो भवति स एतानि अक्षराणि पश्यति । ततो राजाऽपि अहो भव्यान्यक्षराणि इति प्रशंसति, कुब्जको वाचयित्वा व्याख्यानयति यथा – सिंहलद्वीपे सिंहलसिंहो धनवतीयुतो जलधौ प्रवहणे भग्ने पपात, अग्रतः कले कथयिष्ये, पुस्तकं वेष्टयति । धनवती स्वचरित्रं श्रुत्वाऽग्रतः किं जातमिति पृच्छति, फलकेन समुद्रमुत्तीर्य रत्नपुरे रत्नवतीं परिणीय समुद्रे मन्त्रिणा क्षिप्तः इत्युक्त्वा पुनरुत्तिष्ठति । ततो रत्नवती पृच्छति, अग्रतः किं जातमिति अतिनिर्बन्धे पुनः कथयति । केनापि तापसाश्रमे नीतः, तत्र रूपवतीं परिणीय कन्था-खट्वा-युतोऽत्रागतः । पानीयार्थं कूपे गतः सर्पेण दष्टः इत्युक्त्वोत्तिष्ठति, रूपवती पुनः पृच्छति स न कथयति । पुस्तकं वेष्टयित्वा राज्ञः समीपे कुसुमवतीं याचते, राजाऽपि प्रतिज्ञातत्वेन ददाति, तस्मिन् विवाहे न कस्यापि प्रमोदः कोऽपि न मङ्गलं ददाति । ता एव स्वस्वप्रियशुद्धिपरिज्ञानाय तत्र धवलान् ददाति । हस्तमोचनके

१. मीलितं नयना प२ छ । २. यतः प१ छ । ३. वादयति प२ छ । ४. कोरङ्कपत्राणि प२ छ ।

वामनेन याचितम्, शालकः प्राह फूत्कुर्वन्तं सर्पं लाहि, स[१] प्राह सर्प एव ममागच्छतु ततः कुतोऽप्यागत्य सर्पेण दष्टः कुमारः पतितो भूमौ, ताश्चिन्तयन्ति यद्येष मरिष्यति ततः प्रियतमशुद्धिं कः कथयिष्यति, ततस्ताः स्वहृदयं क्षुरिकया यावद् विदारयन्ति तावता कुमारो दिव्यरूपधारी स्वरूपावस्थः संजातः । नागः प्रत्यक्षीभूय कुमारपूर्वभवम्[२]चे धनपुरे धनञ्जयश्रेष्ठी, धनवतीभार्या, धनदेव-धनदत्तौ सुतौ, ग्रीष्मे शर्करायुतं दुग्धं मुनिभ्यो विहारयति, सोऽहं मृत्वा देवो जातः, धनदत्तोऽन्यदा इक्षुरसभृतं घटं मुनिभ्यो दत्[३]वा वारत्रयं भावः खण्डितः स मृत्वा कुमार ! त्वं जातः, दानप्रभावेन भार्याचतुष्टयप्राप्तिः, खण्डनात्रयेण वियोगो वारत्रयं जातः, जलधिपतितो मयैवोत्पाट्य तापसाश्रमे मुक्तस्त्वां मयैवं त्वं कृतः, यतस्तव शत्रुर्मन्त्री वर्ततेऽत्र मयैव त्वं कुरूपीचक्रे पुनः इत्युक्त्वा देवो जगाम । कुमारस्य जातं जातिस्मरणम् । मन्त्री देशान्निष्काशितः । भार्याचतुष्टययुतो गगनमार्गेण खड्डायामारुह्य सिंहलद्वीपे[४] प्राप्तः । पित्रा राज्ये स्थापितः, कन्याप्रभावेन विश्वमदरिद्रमस्राक्षीत्, देवलोकं यातः[५] ।।१३९-१४१।।

अथ वसतिदानविधयो कुरुचन्द्रादिदृष्टान्ताः वङ्कचूलदृष्टान्तश्च ।

वसही सयणासण- भत्त-पाण-भेसज्ज-वत्थ-पत्ताइ । दाणेसु वंकचूलो, कुरुचंदाइण दिट्ठंता ।।१४२।।

तत्र वसतिः शय्यादानात् तरतीति शय्यातरस्तेन हेतुना तेन कारणेनेति निरुक्तिः । तत्रोदाहरणं च । स धन्यो वङ्कचूलस्तथा उपलक्षणात्

१. स आह प, छ । २. भवं ब्रूते प, छ । ३. दत्तः प, छ । ४. द्वीपं प, छ । ५. गतः प ।

कुरुचन्द्रादीनां दृष्टान्ताः जयन्ती शय्यातरी च । तत्र वङ्कचूलसंबन्धो यथा –

शय्यादातुर्गुणख्यात्री, संवेगरसकूपिका । सप्तव्यसननिन्दित्री, वङ्कचूलकथोच्यते ।।१।।

श्रीपुरे विमलयशाः, भूपो भार्या सुमङ्गला । पुष्पचूलः सुतः पुत्री, पुष्पचूला च युग्मजा ।।२।।

तस्मिन् गुणाकरे द्यूतव्यसनं शशिकलङ्कवत् । तद्वत्सः सो निचिक्रीड, द्यूतकृद्भिर्दिवानिशम् ।।३।।

भूपो ज्ञात्वा तमेकान्ते, गुरुः शिष्यमिवाशिषत् । द्यूतं सर्वापदां धामेत्यादिभिर्वचनैर्भृशम् ।।४।।[1]

स शिक्षां नैव तां मेने, शृणिं मत्त इव द्विपः । दीव्यतोऽथाभवन् दोषाः, कुराज्येव नवा कराः ।।५।।

पुष्पचूलस्य तस्यैवं, कुर्वतो दुर्नयान् बहून् । वङ्कचूलेति सान्वर्थामाख्यां पुरजनो व्यधात् ।।६।।

उपालब्धोऽन्यदा पौरैः[2], राजा तं निरवासयत् । छिद्यते किं न धीमद्भिर्देहोत्थो हि दुर्व्रणः ।।७।।

सान्तःपुरपरीवारः, सोऽथ स्वस्रान्वितः क्वचित् । स्वदेशान्निर्गतः शैले, पल्लीं सिंहगुहामगात्[3] ।।८।।

ततः पल्लीपतित्वेन, तत्रस्थैः स्थापितोऽभवत् । सपक्षोऽहिरिवाशङ्को, भृशं पापेष्ववर्तत ।।९।।

१. पदमित्यादि प१ छ । २. परैः प१ छ । ३. मगुः प१ प२ छ ।

तदासन्नपथेनेयुरुन्यदा केऽपि सूरयः । वर्षासु नोचितं गन्तुं, यतेर्जीवाकुले पथि ।।१०।।

एवं विमृश्य ते पल्लीं, गत्वा पल्लीपतेः पुरः । आश्रमं (यं) याचयामासुः, सोऽप्यदादिति तान् ब्रुवन् ।।११।।

अत्रस्थैर्नैव वाच्यानि धर्म इत्यक्षराण्यपि । प्रतिज्ञामिति कुर्वीत, तिष्ठत स्वेच्छया ततः ।।१२।।

प्रतिज्ञायेति ते तत्र, चातुर्मासीमपूरयन् । पल्लीशं तमथोचुस्ते, वहते समयो हि नः ।।१३।।

निष्पन्नस्तुम्बिकास्तुम्ब्यो, लङ्घते वृत्तिमीक्षवः । जातस्थामान उक्षाणो, ग्रामाः प्रम्लानकर्दमाः ।।१४।।

पन्थानः स्वल्पपाथस्काः, पृथिव्यः स्वच्छमृत्तिकाः । लोकाक्रान्ताश्च मार्गास्तद् विहर्तुमुचितं यतः ।।१५।।

श्रमणानां शकुनानां, भ्रमरकुलानां च यत् । अनियतकालावासाद्, शरदि भवानां च मेघानाम् ।।१६।।

एवमापृच्छ्य पल्लीशं, गुरवोऽथ प्रतस्थिरे । तानननुव्रजितुं राजपुत्रोऽपि मुदितोऽचलन् ।।१७।।

स्वसीमान्तान् नमस्कृत्य, प्रत्यायान्तं च तं जगुः । वचो नः श्रूयतामेकं, धर्म्यं सीमा यतो न ते ।।१८।।

उत्पाटितपदा ह्येते, कथयिष्यन्ति मे कियत् । विचिन्त्येति गुरुन् नत्वा, राजपुत्रोऽब्रवीदिदम् ।।१९।।

निःकृपो भगवन्नस्मि, निःशीलो निस्त्रपोऽपि वा । वह्निवत् सर्वभक्षी च, यन्मे योग्यं तदादिश ।।२०।।

तदायुधो तदाहन्ता, भवान् जीवान् यदा तदा । पदानि खलु सप्ताष्टौ, निवर्तेत प्रतीपतः ।।२१।।
नाद्यादज्ञातनामानि, फलानि नृपते ! त्वया । न सेवेत महादेवीं, काकमांसं च वर्जयेत् ।।२२।।
राजपुत्रोऽवदत् प्रीतश्चतुरोऽमूनभिग्रहान् । स्वजीवितवदामृत्योः, पालयिष्याम्यहं प्रभो ! ।।२३।।
पल्लीपतेस्ततस्तस्य, प्राग्वत् पापानि कुर्वतः । इहामुत्रानपेक्षस्य, वासराः कतिचिद् ययुः ।।२४।।
अथान्यदा स पल्लीशो, नरैः सार्थं निभालयन् । आयातमवगत्याथो, संरुद्ध्वाऽध्वानमास्थितः ।।२५।।
चिरं स्थित्वाथ पल्लीशोऽवेत्य सार्थं च दूरगम् । द्वीपीव विफलस्फालो, वीक्षापन्नो न्यवर्तत ।।२६।।
प्रत्यायात् क्षुत्तृषार्तोऽथ, विशश्राम तरोस्तले । फलान्यानिन्यिरे भिल्लैः, किम्पाकस्य तरोस्तदा ।।२७।।
किं नामानि बतैतानि, नाम न ज्ञायते प्रभो ! । किं नाम्नाऽज्ञातनामानि, विश्रोतस्सु विशन्ति किम् ।।२८।।
अज्ञातानां फलानां मे, नियमोऽतो न लाम्यहम् । प्राणान्तेऽपि यतः सन्तो, न त्यजन्ति निजं वचः ।।२९।।
इत्युदित्वा स सुष्वाप, पटीं प्रावृत्य सन्मनाः । आकण्ठमथ भुक्त्वा, ते सुप्तास्तस्थुस्तथैव हि ।।३०।।

चन्द्रोदये प्रबुद्धस्तान्, शब्दादानवशान्मृतान् । ज्ञात्वा स नियमस्यान्ते, फलं ध्यायन्नदोऽवदत्[१] ।।३१।।
जगज्जीवातुभूतानां, तेषां स्यामनृणः कथम् । व्रतव्याजेन दत्तं यैर्गुरुभिर्जीवितं मम ।।३२।।
ततोऽल्पपरिवारत्वात्, प्रच्छन्नं त्रपयैत्य च । स्वपल्ल्यामर्धरात्रेऽसौ, विवेकी स्वगृहं विशन् ।।३३।।
वासागारे नरं सुप्तं, समं पत्न्या सपक्षतः । क्रुद्धो भ्रकुटिभीमास्यो, हन्म्येनौ पापिनावुभौ ।।३४।।
आकृष्टे मण्डलाग्रेऽथ, सस्माराभिग्रहं निजम् । ततः पदानि सप्ताष्टौ, प्राक् चक्राम प्रतीपतः ।।३५।।
प्रतीपं क्रामतः खड्गदण्डः पट्टे स्मास्फलत् । प्रबुद्धा तस्य शब्देन, पुष्पचूलेत्यवोचत ।।३६।।
वङ्कचूलो मम भ्राता, चिरकालं हि जीवतात् । श्रुत्वेति भगिनीवाक्यं, शङ्कमानो व्यचिन्तयत् ।।३७।।
याति स्नेहान्मया सार्धं, विदेशगमनं व्यधात् । हत्वा तामधुनाऽकार्षं, किमकृत्यमहं किल ।।३८।।
स्वं स किमिदमित्युक्तो, वृत्तं प्राच्यं जगाद सा । त्वद्वेषनाटकं वीक्ष्य, यावत् सुप्तोत्थिताऽस्मि तत् ।।३९।।
ततश्चिन्तयतः स्वान्ते, द्वितीयं नियमं मम । ददद्भिर्गुरुभिर्दत्तं, कुटुम्बस्यापि जीवितम् ।।४०।।

१. ध्यायन्नथा प, छ ।

मिलिष्यन्ति कदा मे ते, सूरयो गुणराशयः । इति ध्यायन्नसौ घस्रान्, अतिचक्राम कानपि ।।४१।।
सोऽघारम्भे यमारम्भं, व्यधाद् यं स वृथाऽभवत् । अनीषद्भाविभद्रस्य, प्रायः पापं फलेन्नहि ।।४२।।
अत्रान्तरे तस्य चिन्ता
"द्वाविमौ पुरुषौ लोके, शिरःशूलकरौ परौ । गृहमेधी निरारम्भो, यतिश्च सपरिग्रहः ।।४३।।
इतश्चोज्जयिनीपुर्यां, श्रीमत्यकस्यनेकशः । ....★खड्गव्यग्रकरो ययौ ।।४४।।"
कल्पपालगृहे पूर्वं, प्राविशत् तत्र मद्यपान् । विसंस्थुलान् विरुद्धोक्तीन् वीक्ष्य चित्ते व्यचिन्तयत् ।।४५।।
विगोप्यैवं य आत्मानं, धनमर्जति मूढधीः । तस्यैतेन धनेनालं, पापमूलेन पापिनः ।।४६।।
ततो निर्गत्य सौधेऽगात्, स्वर्णकृद्विश्वनन्दिनः । रैकणान् भस्मगान् घस्रहतान् संमील्य सादरम् ।।४७।।
ध्मात्वा ध्मात्वा हेम कुर्वन्, सावधानोऽनिमेषदृग् । तं वीक्ष्य चिन्तयामास, चेतस्येवं स तस्करः ।।४८।।
अपश्यतामहं चौरः, किञ्चायं पश्यतोहरः । ततोऽपेतो❑ धनं गृह्णन्, भिक्षां भिक्षाचरादिव ।।४९।।

★ त्रुटितमस्ति । ❑ यथा भिक्षाचराद् भिक्षां जिघृक्षुः ततः=भिक्षाचरादपगच्छति, तथैव स्वर्णकृद्गृहाद् धनं गृह्णन् जिधृक्षन्, ततः सुवर्णकारगृहादपगतः इत्यर्थः ।

किञ्च,

"श्रूयते स्वर्णकृत् स्वर्णं, दृष्ट्वा जीवन्मृतः सकृत् । तद् यद् हरिष्ये तत्, नूनमेष मरिष्यति ।।५०।।
ततः कामध्वजा वेश्या, सौधेऽगात् कुष्टिना समम् । पल्यङ्के संस्थितां वीक्ष्योद्यौवनां स व्यचिन्तयत् ।।५१।।
चिन्तितुं युज्यते यन्नो, तत्तत्कृत्यं धनाशया । तनुते या स्वेऽनपेक्षा, धिगमूं धिग् धनमप्यदः ।।५२।।
ततोऽगाद् देवदत्तस्य, श्रेष्ठिनो वरवेश्मनि । सपुत्रं तत्रकुर्वाणं, लेख्यकं तं समैक्षत ।।५३।।
द्विविशोपकृते स्त्रीयं, पुत्रं घ्नतं रुषारुणम् । वीक्ष्य धिग् धनमेतस्य, धिगमूं धनलोलुपम् ।।५४।।
विशोपगणना घृष्टाङ्गुलीकवणिजोऽस्य हि । पुत्रादपीष्टा द्रव्यस्य, धनेनालं ममाधुना ।।५५।।
पक्कदाडिमवन्मैष, हृदयस्फोटमाप्नुयात् । हतेऽर्थेऽस्येति संचिन्त्य, निर्ययौ मन्दिरात् ततः ।।५६।।
दध्यौ राजकुलोल्लापि, लक्ष्मीं किं सोऽपि दोष्यति । नह्येकपादभङ्गेन, खञ्जा शतपदी भवेत् ।।५७।।
सालमुल्लङ्घ्य राजौको, विवेशार्थयतेऽथ सः । रुष्टा राज्ञी तदोत्तीर्योपरि भूमे रुषा गता ।।५८।।
वीक्ष्याभरणकान्त्या तं, त्वं कोऽसीति तयोदिते । चौर्यार्थं वङ्कचूलेति, नाम्ना यातोऽस्मि तस्करः ।।५९।।
तद्रूपमोहिता सोचे, सत्यं चौरोऽसि यन्मम । मनो जहार पश्यन्त्या, बद्धस्नेहगुणैस्ततः ।।६०।।

हास्योक्तया धनेन मे, क्षुधार्त्तस्येव वीणया । स्मरार्त्ता सा पुनः प्राह, स्वं दास्ये भजस्व माम् ।।६१।।
ततः पप्रच्छ तां भद्रे, काऽसि त्वं किमिह स्थिता । सोचे विचारधवलभूपपत्नी रुषागता ।।६२।।
राजपुत्रोऽवदत् तन्मे, वार्त्तयाऽप्यलमेतया । माता मे त्वं सुतस्याग्रे, नोचितं वक्तुमप्यदः ।।६३।।
राजानुपदिकस्तस्यास्तत्कुट्यन्तरस्थितः । तयोर्वृत्तमवेत्यैवं, रुष्टस्तुष्टश्च ह्यद्यधात् ।।६४।।
इतश्च देवी निश्चित्य, चित्तं चौरस्य निश्चलम् । पूच्चक्रे कोऽपि चौरोऽयमत्र चञ्चूर्यते चिरम् ।।६५।।
श्रुत्वेतद् यामिकाः क्षिप्रमुद्दधावुरुदायुधाः । राज्ञाऽथ ते समादिष्टाः, चौरं रक्षत यत्नतः ।।६६।।
प्रोचुरारक्षकास्तेऽपि, मुञ्च मुञ्चायुधं करात् । मुञ्चे शत्रुवपुष्येव पुरो भवतु सोऽधुना ।।६७।।
राज्ञा निषिद्धास्तस्थुस्ते, प्रातः सदसि भूपतिः । उपविष्टस्तमाहूय, प्रीत्यार्धासनमर्पयत् ।।६८।।
रुष्टेन रजनिवृत्तान्ते, देव्या अभयपूर्वकम् । सर्वं निवेदयामास, स्वरूपं चात्मनोऽपि हि ।।६९।।
राजोपदेशतश्चौर्यं, व्यसनं त्यक्तवानसि । पासिते रङ्गकमिव, सर्वं हि समये शुभम् ।।७०।।
ततः संस्थापयामास, सेनानीत्वे नृपो मुदा । अदाच्चात्मसुतस्येव, तस्य देशादिकं महत् ।।७१।।

सोऽथ स्वजनयुक् तत्र, सुस्थिताचार्यसंनिधौ । श्राद्धधर्मं प्रपद्यातीयाय कालं कियत् ततः ।।७२।।
श्राद्धेन जिनदासेन, निकटग्रामवासिना । मैत्रीं विधाय संतुष्टोऽन्यदाऽचालीच्चमूवृतः ।।७३।।
कामरूपपुराधीशं, जित्वा युद्धेन भूपतिम् । प्रहारविधुरं पुर्यां, विशालायां समाविशत् ।।७४।।
चिकित्सा क्रियते वैद्यैर्गुणः कोऽपि न जायते । प्रत्युत क्षीयते गात्रं, पथ्यं चापि न रोचते ।।७५।।
आघोषणीकृता पूर्वं, दत्ते राजा यथेप्सितम् । वैद्याः विचार्य भूपाग्रे, प्रोचुः काकामिषौषधम् ।।७६।।
भूपः काकामिषं प्राह, कुमाराग्रे स ऊचिवान् । अभक्ष्यं मांसमप्यन्यत्, काकमांसं विशेषतः ।।७७।।
निषिध्य काकमांसं तु, संपूर्याभिग्रहं निजम् । उत्तमार्थविधिं कृत्वा, च्युते चूलीगतः सुधीः ।।७८।।
जयन्ती शय्यातरी श्राविकासंबन्धस्तु भगवत्यामस्ति, शय्यादातारोऽन्येऽपि वाच्याः । यथा
जयन्ती वङ्कचूलाद्याः कोशा चाश्रयदानतः । अवन्तीसुकुमालश्चोत्तीर्णाः संसारसागरम् ।।१।।१४२।।
अथ भावविशुद्धस्वरूपं दानं दर्शयति -
जाणह भावविसुद्धं, विवेगमुग्गारेहिं वयणहरिसेहिं । दाणं रहकारेण व, राममुणिस्सेह जो दिज्जा ।।१४३।।

भो भव्याः ! भावविशुद्धं दानमिति ज्ञेयम् । यो भव्यो विवेकवचनैर्मधुरवचनैः हर्षेण राममुनिप्रमुखपात्रेषु रथकारवत् यो दानं दद्यात् तद्भावविशुद्धं दानं तत्र विवेकमधुरवचनैरिति न तु कर्कशवचनैरिति, अत्र मधुरवचनं दानविषये पुराणोक्तसंबन्धो यथा –

अष्टादशसहस्राणि, तापसानां दिने दिने । भुञ्जन्ति हेमपात्रेषु, युधिष्ठिरनिकेतने ।।१।।

यत् तद्वचोभिराक्रुश्यन्, गदामुत्पाट्य दुर्धरः । सर्वान् कारयति त्रस्तान्, भीमस्तान् भीमविक्रमः ।।२।।

अथैकदा धर्मपुत्रस्तानालोक्य कृशाङ्गकान् । भुञ्जतोऽप्येवमेते किं, दुर्बला इत्यचिन्तयत् ।।३।।

भीमो ह्यविज्ञा मा कार्षीदित्याप्तं प्राहिणोन्नरम् । भीमसार्थेन तद्रूपं, संवीक्ष्याख्यत् तदग्रतः ।।४।।

ततो भीमं नृपो दुर्वाक्फलं ज्ञापयितुं स्वयम् । निमन्त्रणार्थं यक्षस्य, प्राहिणोद् गन्धमादनः ।।५।।

तं दृष्ट्वा मुखमाच्छाद्य, तस्थौ यक्षो निजाश्रये । भीमोऽप्युत्पाटय तस्यास्यं विस्मेरमिदमूचिवान् ।।६।।

एकाकी वससे नित्यं, पर्वते गन्धमादने । किमियं काञ्चनी काया, किमिदं शौकरं मुखम् ।।७।।

यक्ष उवाच –

"अर्थदानं रत्नदानं, मुखे नाभूत् सुभाषितम् । तेनेयं काया [काञ्चनी] तेनैवं शूकरं मुखम् ।।८।।
तद् भीम ! प्रियवाक्दानं, दानं देयं विवेकिना । यक्षशिक्षां प्रपद्येति, भीमः स्वस्थानमागमत् ।।९।।
अथ रथकारदानस्वरूपं –
अस्ति तुङ्गीति विख्यातः, शृङ्गैरुल्लेखिताम्बरः । पर्वतो सर्वतो वृक्षैरलक्षीकृतभास्करः ।।१०।।
तत्रासीद् बलभद्राख्यः, पुरा मुनिमतल्लिका । स बाह्याभ्यन्तरेणापि, स्वरूपेण जितस्मरः ।।२।।
अन्यदा [१]तं पुरे क्वापि, पश्यन्ती कापि कूपगा । कुम्भस्थाने स्वपुत्रस्य, ग्रीवायां पाशमक्षिप[२]त् ।।३।।
आलोक्यैवं बलो निन्दन्, निजरूपातिशायिताम् । तदादिनगरग्रामाग(दि)त्यभिग्रहमग्रहीत् ।।४।।
सदा मासोपवासी स, वन एव स्थितः कृती । तृणकाष्ठादिकारिभ्यो, भिक्षया पारणं व्यधात् ।।५।।
अथ सिंहादयोऽप्यस्मिन्, बलदेशनया वने । निवृत्तपिशिताहाराः, श्रावकत्वं प्रपेदिरे ।।६।।
प्राक्संबन्धी मुनेरस्य, कोऽपि जातिस्मरो मृगः । वनेऽशंसज्जनं सान्नमागतं मौलिसंज्ञया ।।७।।

१. ते प, प२ छ । २. पत्रम० प, छ ।

रथकारोऽन्यदा कोऽपि, दारुभ्यस्तद्वनं गतः । मृगेण मुनिरानीतस्तत्र भिक्षाकृते कृती ।।८।।
तदा भोक्तुं निविष्टोऽथ, रथकृद् वीक्ष्य तं मुनिम्[१] । धन्योऽहं यदिहायातः, साधुरित्युत्थितो मुनिः ।।९।।
पञ्चाङ्गस्पृष्टभूर्नत्वा, गत्वा च सम्मुखं मुनेः । आनन्दाश्रुभरोऽवोचद्, विवेकमधुरं वचः ।।१०।।
अहोऽनभ्रा सुधावृष्टिर्जायतेऽद्य ममोपरि । लब्धो मरण्णितः (ममारंण्ये नीतः), कल्पवृक्षो ममालये ।।११।।
ममोपरि कृपां कुर्वन्, गृहाणान्नं यथेप्सितम् । रथीति कथयन् भक्त्या, तं मुनिं प्रत्यलाभयत् ।।१२।।
भाग्यभागी भवत्वेष, भिक्षामित्यग्रहीन्मुनिः । स मृगोऽपि तदा ध्यायन्, धिग् मां तिर्यक्त्वमागतः ।।१३।।
अशक्तोऽस्मि तपः कर्तुं, दानं दातुं च न क्षमः । इति त्रयोऽपि सद्भावा, वायुना वृक्षपाततः ।।१४।।
समकालं मृता धन्या, ब्रह्मलोकं गतास्तदा । सुराणां सुखभोक्तारो, जाता हि ते त्रयो बुधाः ।।१५।।१४३।।

अथ देहेन्द्रियभोग्यार्थान् दर्शयति –

तणु-मण-इंदियसुह, - दुह कज्जे दीसंति सव्वजगभावा । तणु-मण-करणाणि य, नो हुंति विणाहारमंगीणं ।।१४४।।

१. वीक्ष्यते मुनिम् प, छ ।

पडु-तणु-इंदियनाणी, बहुप्पयारं करेइ उवयारं । तेणं तदवट्ठंभो, किज्जइ पूयाइ देवुव्व ।।१४५।।

व्याख्या – तनु च मनश्च इन्द्रियाणि च तनु-मन-इन्द्रियाणि तेषां सुख-दुःखकृते सुखदुःखनिमित्तं प्रायः सर्वजगद्भावाः जगत्पदार्था दृश्यन्ते तनु-मन-इन्द्रियाणि च प्रायो विनाहारं आहारादिना विना आधारं विना च अङ्गिनां प्राणिनां न हुंतित्ति न भवन्ति न तिष्ठन्तीति ज्ञेयम् ।।१४४।। तेन तद् दर्शयति -

व्याख्या – पटूनि नीरोगाणि तन्विन्द्रियाणि येषां यस्य वा ते पटुतन्विन्द्रियाः पटुतन्विन्द्रियाश्च ये ज्ञानिनो ज्ञानवन्तो बहुप्रकारं शासने प्रवचने उपकारं कुर्वन्ति, किमुपकारं कुर्वन्ति ? यतः ज्ञानी मति-श्रुतावधिज्ञानवान् शासनं प्रवर्तयति, विना ज्ञानिनमाचार्यादिकं तीर्थं न तिष्ठति, ज्ञानी प्रवचनी परतीर्थिकान् निराकरोति, तं विना परतीर्थिका शासनपराभवं कुर्वन्ति तथा च ज्ञानी गीतार्थ एव धर्मकथकत्वेन तीर्थं प्रभावयति, ज्ञानी च संशयान् छिनत्ति, अबोधान् जीवान् बोधयति, ऊर्ध्वाधस्तिर्यग्लोकद्वीपसमुद्रादिद्रव्य-क्षेत्र-काल-भावस्वरूपं ज्ञापयति, अशुद्धान् जीवान् प्रायश्चित्तादिदानेन शुद्धान् करोति, ज्ञान-वैराग्यं तु ज्ञान्येव धरति, दुर्गतिप्रवर्तमानान् पापिजीवान् निवार्य सुगतिमार्गे प्रवर्तयति, क्रियादिहीनोऽपि ज्ञानी प्रवचनं प्रभावयति इत्यादि बहुप्रकारमुपकारं ज्ञानिनः कुर्वन्ति, तेन हेतुना कारणेन **तदवट्ठंभत्ति**-तेषां ज्ञानिनामुपष्टम्भात्, ज्ञान-दर्शन-चारित्रादिधर्मोपष्टम्भदानात् अशनादिना वा ज्ञानोपकरणदानादिना वा तेषां प्रत्यनीकनिराकरणादिना वा भक्तिबहुमानगौरवेण वा देवतावत् पूजा कार्या, यतः उक्तं च –

"पुण्णेहिं चोइया पुरक्खडेहिं सिरिभायणं भवियसत्ता । गुरुमागमेसिभद्दा, देवयमिव पज्जुवासंति ।।१।।" [उप.माला. १०१]

तथा -

"जस्स गुरुम्मि न भत्ती, न य बहुमाणं न गोरवं न भयं । न वि लज्जा न वि नेहो, गुरुकुलवासेण किं तस्स ।।२।।" ।।१४५।। [उप.माला. ७५]

अथ जीवशरीरेन्द्रियाणामविनाभावित्वं दर्शयति -

तणुकरणाणि विणा, नो जीवो जीवं विणा न तनुकरणं । विणु देहकरणणाणं, मुणिणो (भविणो) सिद्धिं न साहंति ।।१४६।।

जीवः संसारी आत्मा, तनुकरणानि विना शरीरेन्द्रियाणि विना न स्यात्, विग्रहगतावपि कार्मणतेजस्कशरीरसहितत्वात्, विना जीवं शरीरेन्द्रियाणि कोऽपि न बध्नाति । आहारशरीरेन्द्रियादिपर्याप्तिं जीव एव करोति, नान्यः, तेन **विणु देहकरणनाणं भविणो सिद्धिं न सोहंति त्ति** - विना देहकरणं विना ज्ञानं भविनो भव्यजन्तवः सिद्धिं न साधयन्ति, यतः शरीरमेव प्रथमं धर्मसाधनम्, यतः उक्तं -

जीवा सुहेसिणा तं, सिवं संजमेण सो देहे । सो पिंडेण सदोसो, सो पडिकुट्ठो इमे ते य ति ।।१।।" [पिंडविशुद्धि-२]

तथा श्रीस्थानाङ्गेऽपि-धर्मिणो जीवस्य पञ्चनिश्रास्थानकेषु शरीरनिश्रा धर्मकर्तुर्विलोक्यते, यत उक्तं च -

"धम्मण्णमाणस्स पंच निस्साठाणा पन्नत्ता तं "छकाया[१] गणो[२] राया[३] गाहा[४]वईसरीरं[५] च ।"

तेन शरीरे सति धर्मोद्यमो भवति, सर्वधर्मकृत्यानि शरीरे सति क्रियन्ते, सर्वेऽपि मोक्षसाधकाः साधवः शरीरेन्द्रियं विना नैव सिद्धिं साधयन्तीति इति गाथार्थः । तस्मात् धर्मिणां धर्मोपष्टम्भः कार्यः, यतः उक्तं च –

"तम्हा विहीए सम्मं, नाणीणमुवग्गहं कुणंतेण । भवजलहिजाणवत्तं, पवत्तियं होइ तित्थंपि ।।१।।" [पुष्पमाला-४४]

यतः श्रेयांसेन संवत्सरतपस्वी ऋषभो भगवान् इक्षुरसदानेनोपष्टम्भितस्ततस्तेन भगवता तीर्थं प्रवर्तितम् । अन्नादिदानोपष्टम्भं विना च,

'नवि ताव जणो जाणइ, का भिक्खा केरिसा य भिक्खयरा । ते भिक्खमलभमाणा वणमज्झे तावसा जाया ।।१।।"

तथा गजपुरे बाहुबलेः सोमयशासुतः । श्रेयांसस्तत्सुतः स्वप्ने, मेरुं सुधोज्ज्वलं व्यधात् ।।१।।

कोऽपि श्रेयांससहाय्यात्, शत्रुकान्तो महाभटः । जयी जात इति स्वप्नेऽपश्यत् (स) सोमयशासुतः[१] ।।२।।

रविमण्डलतः श्रस्तः, करौघः घटितः पुनः । श्रीश्रेयांसकुमारेण, स्वप्नं श्रेष्ठीति लब्धवान् ।।३।।

एवं तीर्थकराणां तपःपारणकदानोपष्टम्भकर्तारः केचित् तस्मिन्नेव भवे निर्वृतिपदं प्राप्ताः । उक्तं च –

उसभस्स उ पारणए, इक्खुरसो आसि लोगनाहस्स । सेसाणं परमान्नं, अमीआरससोवमं आसि ।।१।। [विचारसार-१३५]

१. यशानृपः प, छ ।

तेषां दातारस्ते तु श्रेयांसादयः, यतः उक्तं च –

"सिज्झंस-[२]बंभदत्ते [३]सुरिंददत्ते य [४]इंददत्ते य । [५]पउमे य [६]सोमदेवे [७]महिंद तह [८]सोमदत्ते य ।।१।।

[९]पुस्से [१०]पुण्णवसू [११]नंद-[१२]सुनंद [१३]जये य [१४]विजए य । तत्तो य [१५]धम्मसीहे [१६]सुमित्त तह [१७]वग्घसीहे [१८] ।।२।।

[१९]अपराजिय वि [२०]विससेणे वीसइमे होइ [२१]बंभदत्ते य । [२२]दिन्ने [२३]वरदिन्ने पुण धन्ने [२४]बहुले य बोधव्वे ।।३।।

[विचारसार गा. १३८-१४०]

सव्वेसिंपि जिणाणं, जेहिं दिन्नाउ पढमभिक्खाओ । न हि अंबसुहाराओ, वुड्ढीउ पुप्फवुड्ढीओ ।।४।।

सव्वेसिंपि जिणाणं, जेहिं दिन्नाउ पढमसिक्खाओ । ते पयणुपिज्जदोसा, दिव्व वरपरक्कमा जाया ।।५।।

केई तेणेव भवेण, निव्वुआ सव्वकम्मउम्मुक्का । केई तइयभवेणं, सिज्झिसंति जिणसगासे ।।६।। (शतपञ्चाशिका-४८-५३)

अथ ज्ञानादिगुणिनामुपष्टम्भदानादिकृपणानां दोषान् दर्शयति, अस्यां संबन्धविस्तरस्तु ज्ञाताधर्मकथातो ज्ञेयः ।।१४६।।

इति तपागच्छेन्द्रश्रीहीरविजयसूरिराज्ये उपाध्यायसकलचन्द्रगणिविरचिते श्रीहिताचरणग्रन्थे धर्मभेदस्वरूपो विंशोऽधिकारः

।। अभयदानस्वरूपः एकविंशोऽधिकारः ।।

अथ अभयदानस्वरूपं च –

नाणीण तेण विहिणा, कज्जेमुवग्गहं सया सम्मं । जिणतित्था रंहा तुरो, नियजियसंसारतरणत्थं ।।१४७।।

के नाणिदायगाणं, गुणा य दोसा अदायगाणं च । भत्तिबहुण हरिसा, दिंताण अणेग रिद्धीओ ।।१४८।। सुगमा ।।

दाऊण जिणदाणं, तम्मि भवे के निव्वुआ भविया । अन्ने तइयभवेणं ति, सिज्झिसति सुरा होऊ ।।१४९।।

दासं च दासा असुहा, दरिद्दा दीणा सरोगा दुहगा । कुरूवाहीणिंदिया, हीणकुलोववन्ना अदिन्नदाणस्स फलं च एअं ।।१५०।।

कुणइ को असुहं दीहमाऊअं दिंति जे असुहं असणाइअं । सुमुणिणो कडुतुंबयदाइणी जह नागसिरी दुहभाईणी ।।१५१।।

पुढवि-दग-अगणि-मारुअ-वणस्सईकाइआण जीवाणं । बेइंदिय-तेइंदिय-चउरो पंचिंदिआणं च ।।१५२।।

तत्र पृथिवीकायिका द्विधा भवन्ति, सूक्ष्मा बादराश्च, तेऽपि द्विधा पर्याप्ता अपर्याप्ताश्च, तत्र ये बादरपर्याप्तास्तेऽपि द्विधा श्लक्ष्णाः खराश्च, तत्र श्लक्ष्णाः कृष्ण-नील-रक्त-पीत-शुक्ल-पाण्डु-पनक-रूपमृत्तिकारूपाः सप्तविधाः, खरा पृथिवी शर्करा-वालुकाद्या षड्त्रिंशद्भेदाः, तथा

उदकजीवा अपि द्विधा सूक्ष्मा बादराश्च । तेऽपि प्रत्येकं द्विधा पर्याप्ता अपर्याप्ताश्च । तत्र ये बादरापर्याप्तास्ते शुद्धोदका अवश्यायः, अवश्यायः 'हरितणुअमहिका' हिमरूपाः । अग्निजीवा अपि द्विधा-सूक्ष्मा बादराश्च, तेऽपि प्रत्येकं द्विधा-पर्याप्ता अपर्याप्ताश्च, तत्र ये बादरापर्याप्तास्ते बहुभेदाः - अङ्गाला मम्मुरा अग्रयः अर्चिषः ज्वाला उल्का विद्युतादयः । तथा वायुजीवा द्विधा, सूक्ष्मा बादरास्तेऽपि पर्याप्ता अपर्याप्ताश्च, तत्र बादरापर्याप्ताः पञ्चधा, उत्कलिका वाताः, मण्डलिका वाताः, घणवाताः, गुञ्जवाताः शुद्धवाताः, संवर्तवातादयः । वनस्पतिजीवा अपि द्विधा सूक्ष्मा बादराश्च । तत्र ये बादरापर्याप्तास्ते द्विधा साधारणशरीराः प्रत्येकशरीराश्च, तत्र प्रत्येकशरीरा अपि ते वृक्ष-गुल्म-लतादयोऽनेकधा । साधारणशरीरादयोऽपि आलु-मूलक-शृङ्गबेरादयः । द्वीन्द्रिया अपि जीवाः द्विधा पर्याप्ता अपर्याप्ताः, तत्र पर्याप्तास्ते चानेकविधाः कृमि-शङ्ख-शुक्ति-पूतर-जलूका अलसादयः । त्रीन्द्रिया जीवा द्विधा, पर्याप्तापर्याप्तास्ते च कुन्थू-कीटिका-उदंसा-उत्कलि-उद्देहिका-गर्दभ-मत्कूण-यूकादयः । चतुरिन्द्रिया अपि पर्याप्तापर्याप्तभेदाद् द्विविधा, ते च कोलिक-मशक-वृश्चिक-पतङ्ग-भ्रमर- भ्रमरी प्रमुखाः । अथ पञ्चेन्द्रियाः जीवाः नारकाः, सप्तविधा तथा तिर्यक्पञ्चेन्द्रिया द्विधा संमूर्च्छिमाः गर्भजाश्च । तत्र गर्भजा अपि त्रिविधा जलचराः स्थलचराः खेचराश्च, तत्र जलचरा अनेकधा-मत्स्य-कच्छपाः गाहाः मगराः सुंसमाराः । अथ स्थलचराः द्विविधा - चतुःपदा परिसर्पाश्च। तत्र चतुःपदा अनेकधा-एकक्षुरास्तुरङ्गमादयः, द्विक्षुरा वृषभादयः, गण्डीपदा गजादयः, सनखपदाः व्याघ्र-सिंहादयः । अथ परिसर्पाः द्विधा-भुजपरिसर्पाः उरःपरिसर्पाश्च, तत्र भुजपरिसर्पाः नकुलादयः, उरःपरिसर्पाः भुजङ्गमादयः, खेचराः चर्मपक्षि-रोमपक्षि-समुद्गकपक्षिप्रमुखाः ।

अथ मनुजा द्विधा - सम्मूर्च्छनजाः गर्भजाः, संमूर्च्छनजा मंनुष्या मल-शोणित-शुक्र-वात-पित्तादिषु ये संमूर्च्छन्ति । गर्भजाश्च त्रिविधा - अकर्मभूमिजाः कर्मभूमिजा अन्तरद्वीपजाः, तत्र अकर्मभूमिजाः त्रिंशत्भेदाः, कर्मभूमिजाः पञ्चदशभेदाः अन्तरद्वीपजा अष्टाविंशतिभेदाः । अथ पञ्चेन्द्रिया देवा अपि उच्यन्ते ते तु चतुर्विधा भवनपति-व्यन्तर-ज्योतिष्क-वैमानिकभेदात्, तत्र असुरकुमारादयो दशधा भवनपतयः, तथा पिशाच-भूत-यक्ष-राक्षस-किंनर-किंपुरुष-महोरगगान्धर्वरूपा अष्ट व्यन्तराः, तथा चन्द्र-सूर्य-नक्षत्र-ग्रह-तारारूपाः पञ्च ज्योतिष्काः, तथा वैमानिका द्विधा कल्पोपपन्नाः कल्पातीताश्च । तत्र सौधर्माद्या द्वादश कल्पोपपन्नाः तथा कल्पातीताः द्विधा, ग्रैवेयका नवधा, पञ्चानुत्तरविमानस्थाश्च ।।१४७-१५२।।

अथ यथासंभवं एतेषामभयदानमाह –

जा एआणमहिंसा, सम्मं मण-वयण-कायजोएहिं । तं होइ अभयदाणं, सुसाहुजणसेहिअं पवरं ।।१५३।।

इच्छंति सव्वजीवा, निब्भदुहिया वि जीविऊं जम्हा । तम्हा तं चेव पिअं, तेसिं कुसलेहिं दायव्वं ।।१५४।।

मिच्छंतेण दायव्वं, जम्हा य णरवरिंदा मरणम्मि । उवट्ठियंमि रज्जंपि, देइ सजीवियहेऊं तम्हा तं चेव इट्ठयं ।।१५५।।

दीहो कओ सुरूवो, ना रोगो होइ अभयदाणेणं । जम्मंतरे वि जीवो, संतिव्व महड्ढिओ होई ।।१५६।।

एतेषां जीवानां मध्ये हिंसागोचराणां पृथिवी-जलाग्नि-वायु-वनस्पति-द्वि-त्रि-चतुरिन्द्रिय-पञ्चेन्द्रियजीवानां या अहिंसा मनो-वाक्-कायायोगैर्वध-मारणपरिहारस्तदभयदानम्, तत्र अभयदानं सुसाधुजनस्योचितमस्ति, यतः –

"सव्वे जीवा वि इच्छंति, जीविऊं न मरिज्जउं । तम्हा पाणवहं घोरं - निग्गंथा वज्जयंति णं ।।" [दशवैका. अध्य. ६ गाथा ११]

तथा च-

"दायव्वं च मइमया, जं इट्ठं होइ गाहगाणं च । तं दाणं परलोए, सुहं अभयदानफलं यथा ।।१।।"

तथा चोक्तं –

"आयुर्दीर्घतरं वपुर्वरतरं गोत्रं गरीयस्तरं, वित्तं भूरितलं बलं बहुतरं स्वामित्वमुच्चैस्तराम् ।
आरोग्यं विगतान्तरं त्रिजगतः लाघ्यत्वमल्पेतरं, संसाराम्बुनिधिं करोति सुतरं चेतः कृपासंकुलम् ।।२।।" ।।१५३-१५६।।

[सिन्दूरप्र.गा.२८, सुक्तमुक्ता. २८]

एअं अभयदाणं, तियसिंदणरिंदमहियचलणेहिं । सव्वजिणेहिं मुणीअहिं वि सुसेविअं भासि अन्नो ए ।।१५७।।

जीवाण रक्खणेणं, अणुकंपाए य सव्वजीवाणं । सुरसुक्खमुक्खसुक्खं, मंतिदासी व्व पाविंति ।।१५८।।

तत्कथा च –

"जीवरक्षावशाद् भव्यः, प्राप्नोतीष्टपदं भुवि । निर्वाणसंपदोऽमुत्र, मन्त्रिदासीव तद् यथा ।।१।।"

"अस्त्येलानगरं तत्र, राजाऽस्ति रिपुमर्दनः । यद्दानपद्मे राजत्श्रीर्यशोहंसश्च खेलने ।।१।।

तस्य राज्ञः सुताऽस्त्येका, कामलेखेति नामतः । तन्मन्त्रिमन्त्रसारस्य, पुत्री चास्त्यबलाऽभिधा ।।२।।

बाल्यादपि तयोः स्नेह, एकात्मप्रतिभूरभूत् । भुञ्जाते च रमेते च, शयाते च सहैव ते ।।३।।

सारिद्यूतेन खेलत्योरन्यदा ह्यनयोस्ततः । आकाशादबलादास्युत्सङ्गे कङ्कणमापतत् ।।४।।

तदुत्थाय तदुत्सङ्गाद्, गृहीतं कामलेखया । ततो जहास दैवज्ञः, पुरासीनस्तदन्तिके ।।५।।

राजपुत्र्या ततः पृष्टो, हासकारणमाह सः । कङ्कणं परिधाता[१] या, तद्दासीत्वं भविष्यति ।।६।।

परिधास्यति का त्वेनमिति राजसुतोदिते । एषा मन्त्रिसुता दासीत्याख्यत् तच्छ्रवणे स तु ।।७।।

तद्वाक्यप्रत्ययात् कामलेखाऽभूच्चिन्तयाकुला । क्रीडां मुमोच किञ्चोच्चैः, शुशोचात्मानमात्मना ।।८।।

१. परिधानायास्त प्, छ ।

धिङ् मां या राजपुत्रीति, व्यपदेशमवाप्य हि । स्वदुष्कर्मपरीणामाद्, दासी दासी तु भाविनी ।।९।।
अहो ! असारता कीदृक्, संसारस्य दुरात्मनः । आत्मानो यत्र पच्यन्ते, मुहुर्दुःखहताग्निना ।।१०।।
इति चिन्तापरां राजपुत्रीं विज्ञाय कारणात् । ऊचे मन्त्रिसुता मा स्म, शोचस्त्वं शृणु मद्वचः ।।११।।
दासीमेनामुपायेन, विघास्ये दोषदानतः । पश्चात् त्वं कथमेतस्याः, दास्याः दासी भविष्यसि ।।१२।।
इत्यनुज्ञाप्य तां गेहे, ययौ दासीयुताऽऽबला । दास्यानयाऽत्र वस्त्वेतदात्तं स्यादित्यचिन्तयत् ।।१३।।
त्वयैतदात्तमित्येनां, घटसर्पमकर्षयत् । दोषवत्वादहिर्दार्सी, ददंश सा ततोऽपतत् ।।१४।।
सा तामत्याजयन्नद्यां, नरात् सोऽपि कृपापरः । निम्बभारकमध्यस्थां, प्रावाहयदिमां जले ।।१५।।
पुण्यान्निम्बाम्बयोगेन, सा जाता निर्विषा क्रमात् । भग्ना[१] तीरस्मशाने च, निःसृता निम्बभारकात् ।।१६।।
ततश्च राक्षसः कश्चिद्, दधावेऽत्तुमिमां द्रुतम् । प्राणभीत्या ननाशाशु, सा त्वेलानगरं प्रति ।।१७।।
किलाद्यापि रक्षस्तान्मामन्वेतीति भीतिभाक् । व्याघुट्येलापुरप्रान्तर्वनेऽगाद्यक्षमन्दिरम् ।।१८।।

१. लग्ना प्र० । २. गतम् प्र० छ ।

यक्षोऽद्य सर्वभक्ष्याख्यः, शुषिरः पक्वमृन्मयः । ततस्तन्मूर्तिमुत्पाट्य, तदन्तः साऽविशद्भयात् ।।१९।।
अरुणोदयवेलायामथैका राजवल्लभा । दुग्धकुम्भानसौ स्नाने, यक्षमूर्ध्नि व्यलोठयत् ।।२०।।
यक्षाङ्गच्छिद्रैः परितः, क्षीरमन्तः पतत्तु सा । पायं पायमभूत् तृप्ता, दासी मध्येऽस्ति या भयात् ।।२१।।
राजपत्नी च यक्षस्य, विलिप्तपूजितस्य सा । पुरतो महिषाजादीन्निहन्तुमादिशत् नरान् ।।२२।।
अथ सान्तः स्थिता दासी, दध्यौ मेऽभूद् यथा व्यथा । घातकाद् राक्षसात् तद्वत्स्यादेषां प्राणिनामपि ।।२३।।
तत् किलाहमेव यक्षीभूता निवारयाम्यमूम् । इत्यूचे प्रोच्चैः सा राज्ञीं, न वध्या मत्पुरोऽङ्गिनः ।।२४।।
अतः परं च चेत् केऽपि, मदग्रे प्राणिनः खलु । हनिष्यति हनिष्यामि सकुटुम्बं तमाश्वहम् ।।२५।।
यतो मयाऽद्य विज्ञातं, तत्त्वं जीवदयैव हि । दुग्धस्नानार्चनाद्यैश्च, प्रीतः कर्ताऽस्मि वः प्रियम् ।।२६।।
किल यक्षः स्वयं वक्ति, मत्त्वेति राजगेहिनी । भीता व्यसर्जयद् वध्यान्, यक्षं नत्वा च सा ययौ ।।२७।।
नित्यमभ्येत्य सा राज्ञी, दुग्धेन स्नपयत्यमुम् । तद्वल्लोकः किलान्योऽपि, दासी सा त्वपिबत् पयः ।।२८।।
सर्वदर्शनसंगीता, जीवरक्षा कृताऽमुना । यक्षेणेति मुदा लोकस्तदर्चातत्परोऽभवत् ।।२९।।

इतश्च राजपुत्री सा, दैवज्ञवचनाकुला । मन्त्रिपुत्र्या ततः प्रोचे, बुद्धिं मे शृणु हे सखि ! ।।३०।।
सर्वभक्षाख्ययक्षोऽयं, कङ्कणं परिधाप्यते । तद्दासीत्वं तु दुःखाय, न स्याद्यद्देवता ह्यसौ ।।३१।।
इति मन्त्रिसुतावाचं, कामलेखाभिनन्द्य सा । तया सार्धं ययौ सायं, यक्षवेश्म सकङ्कणा ।।३२।।
द्रागेव मण्ड्यतां यक्षकङ्कणेनेति तद्वचः । दासी निशम्य विज्ञाय, राज-मन्त्रिसुते उभे ।।३३।।
स्वे[१] हस्ते बन्धयिष्यामि, कङ्कणं त्विति दास्यथ । अन्तः शुषिरयक्षाग्रहस्तं भङ्क्त्वा, प्रयोगतः ।।३४।।
यक्षदोर्मध्यगं स्वं तु कराग्रं निरसारयत् । बबन्धे तत्करे राजपुत्री च कङ्कणं स्वयम् ।।३५।।
भूयास्त्वमेव मे स्वामीत्युक्त्वा सा ससखी ययौ । यक्षाग्रहस्तं दासी च, तथैव समयोजयत् ।।३६।।
ततो विद्याधरौ द्वौ च, यक्षवेश्माग्रमेत्य तौ । बहिर्मुक्त्वा विमानं च, यक्षोपान्ते ह्यथेयतुः ।।३७।।
एकः प्राह सखे ! कुन्दप्रभ ! त्वं वेत्सि वा नवा । कङ्कणाख्यानमाहत्यो, रत्नाङ्गद ! न वेद्म्यहम् ।।३८।।३९।।
ततो रत्नाङ्गदश्चख्यौ, किलैषा[२], कङ्कणद्वयी । विद्याधरपतेर्दत्ता, तुष्टेनोरगभर्तृणा ।।४०।।
प्रभावश्चास्या य एते, द्वे अलंकुरुते पुमान् । दक्षिणोत्तरश्रेण्योः स, वैताढ्ये प्रभुतां व्रजेत् ।।४१।।

१. स्वहस्ते प, छ । २. किलैव प, छ ।

अथैकं तत्पुरः श्रेणेरेकस्याः स प्रभुर्भवेत् । तद्वशेन च सर्वर्द्धिस्तस्य संपद्यतेऽचिरम् ।।४२।।
ततो विद्याधरौ व्योम्नो, गच्छतः स्वप्रियां प्रति । चपेटाप्रेरिताद्धस्तात्, पपातैकं हि कङ्कणम् ।।४३।।
वीक्षितं बहुशोऽप्येतन्नाप[1] विद्या धरेश्वरः । य एतत् लप्स्यते भावी, स एकश्रेणिभूपतिः ।।४४।
श्रुत्वेति तद्वचो दासी, सस्मार कङ्कणं हि तत् । राजपुत्र्यन्तिके मेऽङ्के, तदेतत् पतितं किल ।।४५।।
अहो ! मे जीवरक्षायाः, फलं जातमिहैव यत् । प्राप्तं कङ्कणमस्माच्च, विद्याधरर्द्धिराप्स्यते ।।४६।।
ध्यात्वेति साऽब्रवीद् रत्नाङ्गदं तवेदमर्पये । वर्तसे चेन्ममादेशात्, ततो रत्नाङ्गदोऽवदत् ।।४७।।
स्वामिन् यक्ष ! यद्भूषे त्वं, करिष्ये तदहं सदा । इत्युक्ते तेन सा प्राह, शृणु तर्हि वचो मम ।।४८।।
स्वं स्वस्थानं गतः स्वस्मिन्, विमाने द्रक्ष्यसि स्त्रियम् । सकङ्कणां ततस्त्वं तां, कुर्या भार्यां सदा प्रियाम् ।।४९।।
नापमान्या त्वया सैषा, वर्तितव्यं तदाज्ञया । इत्युक्त्वा शनकैः साऽथ, निर्ययौ यक्षमध्यतः ।।५०।।
ध्वान्ते ताभ्यामदृष्टा सा तद्विमानं समेत्य हि । निलीयाऽस्थात् क्वचित्, स्तम्भान्तरे न दृश्यते यथा ।।५१।।
ततो रत्नाङ्गदः किञ्चित्, स्थित्वा विमानमासदत् । यक्षेणोक्तं तथैवेति, स मत्वा तदतत्वरत् ।।५२।।

१. प्येत्य तावद्यावद् प, प२ छ ।

स स्वस्थानं क्षणात् प्राप, दासी प्रादुर्बभूव सा । स तां सकङ्कणां वीक्ष्य, यक्षोक्ते विस्मितोऽभवत् ।।५३।।
एह्येहि तन्वि ! यक्षेण, त्वं मे दत्ताऽसि वल्लभा । इत्याश्लिष्य स तां रेमे, यक्षादेशात् ततोऽभवत् ।।५४।।
प्राप्तः कङ्कणमाहात्म्यादेकात्मश्रेणिरात्मना । एत्य रत्नाङ्गदयुतां, तां दासीं स्वामिनीं व्यधात् ।।५५।।
जीवरक्षाकृतं पुण्यं, दासी चेतसि कुर्वती । आधिपत्यं गताऽप्येषा, दयाधर्मपराऽभवत् ।।५६।।
दासीत्वापगमात् स्वाम्याधिगमान्मुदमीयुषी । अन्यदा निशि पल्यङ्के, सैषा सुष्वाप निर्भरम् ।।५७।।
क्षणेन गतनिद्रेयमथैकां स्त्रियमैक्षत । संवाहन्ती चरणौ दासीमिव क्रमागताम् ।।५८।।
तया प्रोचे हले ! का त्वं, सा प्राह तेऽस्मि दास्यहम् । त्रायस्व स्वामिनि त्वं मां, गतिस्त्वं मेऽत्र नापरः ।।५९।।
मन्त्रिदासी बभाषे तां कन्याऽस्यत्रागताऽसि किम् । त्रातव्यासि कुतो ब्रूहि, कान्दिशीके बिभेः स्म मा ।।६०।।
ततः सा रुदती प्राह सा शृणु देवि ! प्रसादतः । रिपुमर्दनस्य राज्ञः, सुताऽस्म्येलापुरेशितुः ।।६१।।
कामलेखाऽभिधा साहमेकदाऽगां सखीयुता । नद्यां हि जलकेल्यर्थमारुढा नावमायताम् ।।६२।।
ततोऽभून्मरुदुद्दण्डो, नौः पुस्फोटामुना हता । मदीयः स सखीवर्गः क्वाप्यगात् तन्न वेद्म्यहम् ।।६३।।
अहं फलकमेकं च, प्राप्यारूढाऽस्मि तद्दृढम् । विद्याधरेण केनापि, दृष्टा तेन हृताऽपि च ।।६४।।
आनीय ह्यस्तनदिने, मुक्ताऽस्म्यस्मिन् गृहेऽन्तिके । हरिष्यति स मे शीलमिति भीस्त्वामिहागमम् ।।६५।।

यतः –

"सीलं उत्तमं वित्तं, सीलं जीवाणं मंगलं परमं । सीलं दोहग्गहरं, सीलं सुखाण कुलभवणं ।।६६।।"

सव्वेसिं पि वयाणं, भग्गाणं कोइ अत्थि पडियारो । पक्कघडस्स व कन्ना, न होइ सीलं पुणो भग्गं ।।६७।। (शीलकुलक-२-१८)

तुच्छा वि रमणीजाई, पसंसणिज्जा सरासुरनराणं । विहिआ महासईहिं, कहि वि अईविमलसीलाहिं ।।६८।।

परपुरिससेवणीउ, कुलरमणीउ हवंति जइ लोए । ता वेसादासीणं, पढमा रेहा कुलवहूसु ।।६९।। (शील उव. ५०-४९)

तद्रक्ष रक्ष मां तस्मादेषा दास्यस्मि ते ध्रुवम् । मन्त्रिदासी ततः प्राह, मा भैषीस्तेऽस्मि रक्षिका ।।७०।।

तां सोपलक्ष्य दध्यौ, यज्जीवरक्षाफलं कियत् । प्राप्तं विद्याधरैश्वर्यमेषा दासी च मेऽभवत् ।।७१।।

इति जीवदयातत्त्वे, तस्याः संलीनचेतसः । भवितारः क्रमात् स्वर्गमोक्षसौख्यानि निश्चितम् ।।७२।।

इति श्रीचन्द्रप्रभजिनचरित्रगता जीवरक्षायां मन्त्रिदासीकथा श्रीदेवेन्द्राचार्यविरचिते ।।१५७-१५८।।

इति तपागच्छेन्द्रश्रीहीरविजयसूरिराज्ये उपाध्यायश्रीसकलचन्द्रगणिविरचिते श्रीहिताचरणग्रन्थे अभयदानस्वरूप एकविंशतितमोऽधिकारः ।

। धर्मोपष्टाम्भदानस्वरूपो द्वाविंशोऽधिकारः ।

अथ धर्मोपष्टम्भदानस्वरूपं दर्शयति –

धम्मोऽवग्गहदाणं, भण्णइ सयमेव जं च निद्दोसं । दिज्जइ धम्मिजणाणं, जं तं धम्मस्स वुड्ढिकरं ।।१५९।।

के धम्मिजणा मुणिणो, सुसावगा सम्मदिट्ठितवविहवा । संविग्गपक्खिया वि य, जिणधम्मपभावगा जे य ।।१६०।।

दायव्वं पुण तेसिं, धम्माहारं करेइ जं दव्वं । तेणं सीअंता ते, धम्मिजणा लिंति धम्मधुरं ।।१६१।।

व्याख्या – धर्मोपग्रहदानं धर्मोपष्टम्भदानं किं भवति ? यद्धर्मिजनानां धर्मवासिनोऽन्तःकरणानां साधु-साध्वी-श्रावक-श्राविकाणां यन्निर्दोषं दीयते तद्धर्मोपष्टम्भदानं धर्मवृद्धिकरं भवति ।।१५९।।

व्याख्या – भगवन् ! धर्मिजनाः के ? धर्मो दुर्गतिपतनधारणसमर्थो येषां ते धार्मिकाः. मुख्यवृत्त्या मुनयो ज्ञानवन्तः साधवः, तथा सुश्रावका उपलक्षणतः सुश्रावका अपि, तथा सम्यग्दृष्टयोऽपि, तथा तपोविभवा महातपस्विनस्तथा शुद्धप्ररूपकाः संविग्नपाक्षिकास्तथा ये च जिनधर्मप्रभावकाः एते धार्मिका इति ।।१६०।।

व्याख्या – तेषां धर्मिजनानां यद् द्रव्यं यदन्नपानादिद्रव्यं धर्माधारकरं भवति तद् दातव्यम्, तेन दत्तेन द्रव्येण ते धर्मिजनाः सीदन्तः

धर्मे शिथिलाः सन्तः पुनरपि धर्मे धुरं लान्ति, एतद् धर्मोपष्टम्भदानं तु सम्यक्त्वाचारत्वात् **उववूहथिरीकरणेति** वचनात् । धर्मिजनेषु मुनयः सुपात्रमुत्तमपात्रं तत्तु यानपात्रमिव ।।१६१।। तदाह -

सुपत्तं जाणवत्तं व्व, परमप्पाणं च तारए । कुप्पत्तं छिद्दसंजुत्तं, परमप्पाणं पि बोलइ ।।१६२।।

दायव्वं तं चउहिं, विसुद्धहेऊहिं पत्तदाणं च । दायग-गाहगसुद्धं, सुद्धं तं काल-भावेहिं ।।१६३।।

दायगसुद्धं भण्णइ, जो दाया देइ दोसगुणनिउणो । पत्ताण मुहादाइं, देइ य असणाइउवगरणं ।।१६४।।

णाओवगयं दव्वं, फासुगमविरुद्धं च जो देई । इहपरलोगासंसं, मुत्तूणं निज्झरट्ठिओ ।।१६५।।

काऊण यं पाणिवहं, दाणं जो देई वा कुपत्ताणं । दहिऊण चंदणं, सो करेइ अंगारवाणिज्झं ।।१६६।।

मूढो लोगविरुद्धं, धम्मविरुद्धं च देइ जो दाणं । सो अप्पाणं गाहगं च, पाडेइ संसारे[१] ।।१६७।।

गाहगसुद्धं जाणह, पंचमहव्वयधरो अ जो साहू । तह चरणकरणसत्तरि-कलिओ य सया मुहाजीवी ।।१६८।।

१. संसारं प, छ ।

सुपात्रं तु यानपात्रवत् परमात्मानं च तारयति, कुपात्रं तु छिद्रसंयुतत्वात्, परमात्मानं च न तारयति, यत उक्तं सूत्रकृदङ्गे -

"जहा आसाविणीनावं, जायअंधो दुरुहिआ । इच्छइ पारमागंतु, अंतरायविसेसयं ।।१।।" [सूयडांग अध्य. १ उ० २ गा. ३१]

तथा हरिकेसिअध्ययने -

"कोहो य माणो य वहो य जेसिं, मोसं अदत्तं च परिग्गहं च । ते माहणा जाइविज्जाविहीणा, ताइं तु खित्ताइं सुपावगाइं ।।१६२।।"

[उत्त.अध्य. १२ गा. १४]

व्याख्या – तत् सुपात्रदानं तु चतुर्भिः हेतुभिः प्रायः शुद्धं दातव्यम्, चतुर्हेतवो यथा-दायकशुद्धं ग्राहकशुद्धं कालशुद्धं भावशुद्धं च ।।१६३।।

व्याख्या – दायकशुद्धदानं तु यः कश्चिद् दाता आहारादीनां षोडशाधाकर्माद्युद्गमदोषज्ञाननिपुणः, तथा च अल्पपापबहुनिर्जरादि साधुदानगुणफलनिपुणश्च पात्रेभ्योऽन्नादि मुधादायी सन् ददाति, उपकरणमपि तथैव ददाति ।।१६३।।

व्याख्या – णाउवगयं दव्वं ति - न्यायोपगतं द्रव्यं न्यायार्जितं द्रव्यं ददाति, यतः उक्तं च -

अतिथिसंविभागो नाम नायागयाणं कप्पणिज्जाणं अन्न-पाणाईणं दव्वाणं देसकालसद्धासक्कारकसंजुत्तं परमाए भत्तीए आयाणुग्गहट्ठयाए संजयाणं दाणं तथा प्रासुकं च तदपि अविरुद्धं साधूनां यद् दानार्हं तत्र दीयते । इहलोगपरलोगासंसं मुत्तूणं ति-इहलोकपरलोकार्थं मुक्ता निर्जरार्थमेव दीयते ।। इति दायकशुद्धम् ।।१६४-१६८।।

मेरु व्व जो न तीरइ, उवसग्गपरीसहेहिं चालेऊं । इय एरिसंमि दाणं, गाहगसुद्धं च णेयव्वं ।।१६९।।

आयारविमुक्काणं, दिज्जइ दाणं च जं कुपत्ताणं । तं खलु धोवइ वत्थं, रुहिरकयं सोणिएणं च ।।१७०।।

दिज्जइ सुहं पि दाणं, होइ कुपत्तम्मि असुहफलमेव । सप्पस्स मुहे पडिअं, खीरं पि विसत्तणमुवेइ ।।१७१।। सुगमा ।

तुच्छं पि सुपत्तम्मि य दाणं, नियमेण सुहफलं होइ । जह गावीए दिन्नं, तिणं पि खीरत्तणं होइ ।।१७२।।

इति गाहगसुद्धं । सुगमा ।।१६९-१७२।।

कालविसुद्धं जाणह, उत्तरपारणगिलाणसमयम्मि । पहसंततवस्सीणं, रिऊजुग्गं दिज्जइ काले ।।१७३।।

कालम्मि कीरमाणं, किसिकम्मं बहुफलं जहा होइ । इह कालोचियदाणे, णायं धणदेव-धणमित्ता ।।१७४।।

व्याख्या – कालविशुद्धं तु तत्र ऋतुयोग्यं शीतोष्णवसन्तशरत्कालयोग्यं तपस्विजनशरीरसमाधिकरं कालोचितं देयम्, यत एताभ्यां तु ग्रीष्मकालयोग्यमिक्षुरसदुग्धादिकं दत्तम्, एतत्संबन्धस्तु पूर्वमुक्तोऽस्ति, तथा उक्तं च –

"काले सुपत्तदाणं, चरणे सुगुरूण बोहिलाभं च । अंते समाहिमरणं, अभव्वजीवा न पाविंति ।।" [पुष्पमाला-४८१]

तथा मुनयोऽपि सर्वं भिक्षाभ्रमणादिधर्मानुष्ठानं यथोक्तकाल एव कुर्वन्ति । तथा -

पढमं पोरसिसज्झायं, बीअं झाणं झियायइ । तइआए भिक्खायरिअं, पुणो चउत्थी वि सज्झायं ।। रात्रौ च –

"पढमं पोरसि सज्झायं, बीअं झाणं झियायइ । तइयाए निद्दसुक्खं तु, पुणो चउत्थीइ सज्झायं ।।१।।"

[उत्त.अध्य. २६, गा. १२-१८]

दशवैकालिके तु –

"संपत्ते भिक्खकालम्मि, असंभंतो अमुच्छिओ । इमेण कमजोएण, भत्तपाणं गवेसए ।।१।।"

"कालेण निक्खमे भिक्खू, कालेण य पडिक्कमे । अकालं च विवज्जित्ता, काले कालं समायरे ।।२।।"

"अकाले चरसि भिक्खू, कालं न पडिलेहसे । अप्पाणं च किलामेसि, संनिवेसं च गरिहसि ।।३।।"

"सइ काले चरसि भिक्खू, कुज्जापुरिसकारियं । अलाभुत्ति न सोइज्जा, तवु त्ति अहियासए ।।४।।" [दशवैका.अ.पू.उ.२ गा. ६]

एवं साधवो यथोक्तकाले च ग्रीष्म-शीतादौ जिनकल्पिस्थविरकल्पिककल्पातीतादयोऽपि विचरन्तो यथायोग्यां वसतिमिच्छन्ति ।।१७३-१७४।। तद्वायकाश्च शय्यातरा उच्यन्ते, तदाह –

नवकप्पविहारेण वि, विहरंता साहवो वि जइ वसहि । पावइ सुत्ताइ य, मंडलिओ कओ हुंति ।।१७५।।

"सुत्ते अत्थे भोअण-काले आवस्सए य सज्झाए । संथारए वि य तहा, सत्तेआ मंडली हुंति ।।१।। [प्रव. सारो. ६९२] ।।१७५।।"

अणुवम व सुद्धं, मुणीण दाऊण जं तरे तेणं । सिज्झायरो त्ति भण्णइ, स जयंतीवंकचूल्ल व्व ।।१७६।।

वङ्कचूलसंबन्धस्तूक्तः ।।१७६।।

जाणह भवि तिसुद्धं, थोवाथोवं पि देइ । हेऊ भत्तिभावपीणो, सवंदणा जिणसिद्धि व्व ।।१७७।।

तत्र भावशुद्धं दानं तु नवकोटिशुद्धम् ।।१७७।।

नवकोडिपरिविसुद्धं, दसदोसविवज्जियं च जं देयं । एयं भावविसुद्धं, पण्णत्तं वीयराएहिं ।।१७८।।

[समरादित्य तृतीये भवे ५२ गाथा]

तत्थ नवकोडिविसुद्धं जहा –

न हणइ न पयइ, न किणइ कारावण अणुमइहिं नव हुंति । आइल्लत्थअसुद्धा, तिन्नि विसुद्धा य कोडी य ।।१७९।।

तत्थ दसदोसविवज्जियं ति, दस दोसा जहा –

संकियमक्खियइ निक्खित्त, पिहिय साहरिय दायगुम्मीसे । अपरिणयइ लित्तउ छडिय एसणदोसा दहविति ।।१८०।।

अट्टवसट्टोवगओ, अवि सुद्धं देइ कलुसियमणओ । जं सनियाणं दाणं, भावाविसुद्धं भवइ नेयं ।।१।।

मुक्खत्थं जं दाणं, तं पइ एसो विही मुणेयव्वो । अणुकंपादाणं, पुण जिणेहिं ण कहं पि पडिसिद्धं ।।२।।

[समरादित्य० तृतीये भवे ५३-५४]

एसो उ दाणमईओ, धम्मो संखेवओ समक्खाओ । इत्तो उ सीलमईओ भणमाणो सो मुणेयव्वो ।।१८१।।

[सम. कथा तृतीये भवे ५५]

वय समणधम्म[१०] संजम[१७] वेयावच्चं[१०] च बंभगुत्तीओ[९] । णाणाइ तियं[३] तव[१२] कोहनिग्गहाइ[४] चरणमेयं ।।१८२।।

अत्र विचारो यथा न चतुर्थव्रतान्तर्गतत्वाद् ब्रह्मगुप्तिः पृथग् न वाच्या गुप्तिभणने वा न चतुर्थव्रतम्, तथा चारित्रस्य व्रतैरेव गृहीतत्वात् ज्ञान-दर्शने एव वाच्यम् । (नहुयं) । तथा श्रमणधर्मग्रहणेन संयमतपसी न वाच्ये, वैयावृत्यं च तपोऽन्तर्गतत्वात् पृथग् न वाच्यम्, तथा क्षान्त्यादि श्रमणधर्मग्रहणात् क्रोधादिग्रहणं न कार्यम्, तदियं दो गाथा विचार्यमाणा लूना शीर्णा च । अत्रोच्यते-चतुर्थव्रतस्य निरपवादत्वं दर्शयितुं ब्रह्मगुप्तयः पृथगुक्ताः, यदुक्तं –

"न वि किंचि अणुन्नायं, पडिसिद्धं वा जिणवरिंदेहिं । मुत्तुण मेहुणभावं, न तं विणा राग-दोसेहिं ।।" [उपदेशपद-७८०]

अथवा प्रथमान्तिमतीर्थकृतां परिग्रहव्रताद् भिन्नमेतद् व्रतं स्यादिति ज्ञापनार्थं भेदेनोपन्यासः, तथा व्रतग्रहणेऽपि ज्ञानादित्रिकस्यापि ग्रहणं विधेयम्, यतो यद् व्रतचारित्रं ससामायिकादिः पञ्चविधचारित्रस्यैकशः चतुर्विधमप्यगृहीतमास्ते तदर्थं ज्ञानत्रयमुपन्यस्तं तथा श्रमणधर्मस्य ग्रहणेऽपि संयमस्यापूर्वकर्माश्रवसंवरहेतुत्वेन तपश्च पूर्वकर्मक्षयहेतुत्वेन प्रधानमोक्षाङ्गत्वात् पृथगुपादानम्, यथा ब्राह्मणा आयाता वशिष्ठोऽप्यायात इति प्राधान्यत्वेन विशिष्टः पृथग् ग्रहीतः, तपोग्रहणेऽपि वैयावृत्त्यस्य पृथगुपादानं आचारस्य स्वपरोपकारित्वेन

प्राधान्यं तथाऽशेषतपोभेदानामिति ख्यापनार्थम्, यच्च क्षान्त्यादिश्रमणधर्मग्रहणेऽपि क्रोधादिनिग्रहस्य पृथगुपादानम्, द्विधा क्रोधादय उदीर्णा अनुदीर्णाश्च । तत्रोदीर्णानां निग्रहः क्रोधादिनिग्रहः, अनुदीर्णानां तु उदयनिरोधनम्, क्षान्ति-मार्दवार्जव-मुक्तय इति ख्यापनार्थम्, अथवा त्रिधा वस्तु ग्राह्यं हेयमुपेक्ष्यं च, तत्र क्षान्त्यादयो ग्राह्याः, क्रोधादयो हेया अतस्ते निग्राह्या इत्यर्थं पृथगुपादानम् ।

"पिंडविसोही[४] समिई[५] भावणा[१२] पडिमा[१२] इंदियनिरोहो[५] । पडिलेहण[२५] गुत्तीओ[३] अभिग्गहं[४] चेव करणं ।।"

न त्वेषणासमितौ ग्रहीतायां पिण्डविशोधिरपि गृहीता, सत्यम्, पिण्डव्यतिरेकेणाऽप्येषणा विद्यते, वसत्यादिरूपा तदर्थं एषणासमितिग्रहणं पिण्डविशुद्धेस्तु भेदेनोपादानं कारणे ग्रहणं कार्यं नाकारणे इति ज्ञापनार्थम्, नित्यानुष्ठानं चरणम्, यत्तु प्रयोजने आपन्ने चर्यते तत्करणं तथा व्रतादि सर्वकालमेव चर्यते, न पुनर्व्रतशून्यः कश्चित् काल इति । पिण्डविशुद्ध्यादयस्तु प्रयोजने आपन्ने एवानुष्ठीयन्ते । इति चरणकरणयोर्विशेषाः ।।१७८-१८२।। तथा च –

सिरिजंबु-थूलभद्द-पमुहानुमुणिणो सुसीलया सद्दा । झायल्लायं सुदंस-पमुहा तह पभावगोवाला ।।१८३।।
एयं च सेविऊणं, धम्मं जिणदेसियं सुसीलमयं । सुगतिं पावंति णरा, उवेति ण य दोग्गइदुवारं ।।१८४।।
खंडिय सीलायारा, धूली व्व नरा निराकुंति । तम्हा सीलायारा, हुंति नरा संजमवित्थारा ।।१८५।।
भण्णइ य तवो मईउ, बारसब्भंतरस्स य तवस्स । जमणुट्ठाण कीरइ, असेसकम्मक्खयनिमित्तं ।।१८६।।

अणसणमूणोयरिया, वित्तीसंखेवणं रसच्चाओ । कायकिलेसो संलीणया य, बज्झो तवो होइ ।।१८७।।

पायच्छित्तं विणओ, वेयावच्चं तहेव सज्झाओ । झाणं उस्सग्गो वि य अब्भिंतरओ तवो होइ ।।१८८।।

होइ तवो कहमतवो, पावसुयाण पसंगओ । तह य अन्नाणीण च, कोहेहि तपो वा कोहेण अगणिसम्मस्स ।।१८९।।

भगवन् ! तपोऽपि अतपः कथं भवतीति प्रश्नः ।।१८७-१८९।। पापश्रुतप्रसङ्गतः, यत उक्तं च –

"जोइस-निमिअ-अक्खर-कोउयआएसभइकम्मेहिं। करणाणुमोअणेहि अ, साहुस्स तवक्खओ होइ ।। [उप.माला-११५]

इति पापश्रुतप्रसङ्गः, **'एगूणतीसाए पावसुयपसंगेहिं'** त्ति वचनत्वात् । कोपेन वा तपोऽतपः स्यात् । यथाग्निशर्मतापसस्येति ।

"सदयं चरिऊण तवं, जीवा इह-परभवम्मि सुक्खाइ । पाविंति य लद्धीओ, करेंति दुक्खक्खयं तेणं ।।१९०।।"

एसो उ तवो मईओ, धम्मो इह जे तवस्सिणो [१]जाया । तेसिं नामग्गहणं, देई सुलद्धिं च सिद्धिं वा ।।१९१।।

इति तपागच्छेन्द्रश्रीहीरविजयसूरिराज्ये उपाध्यायसकलचन्द्रगणिविरचिते श्रीहिताचरणग्रन्थे धर्मोपष्टम्भदानस्वरूपो द्वाविंशोऽधिकारः

१. जायं प, छ ।

।। भावनास्वरूपस्त्रयोविंशोऽधिकारः।।

अथ भावना धर्मो यथा षट्कं –

का भवे भणिया भवणासिणी, भावणा भविकम्मविणासिणी ।

भावणा भरहाइमणासिणी, भावणा भयणागिणिपासिणी ।।१९२।। दीपकम् ।

भगवन् ! जिनैर्भवनाशनी का प्रोक्ता ? भावनेति गुरूत्तरः । किं लक्षणा ? भविकर्मविनाशिनी, पुनः किं भावना ? भरतादि-सार्वभूमोत्तमपुरुषाणां मानसाशिनी चेतः संध्वासिनी, पुनः किं भावना ? **भयनागिणिपासिणी** त्ति भया सुसर्पिणीव भयङ्करास्तेषां पाशिका, बन्धकारिणी ।।१९२।।

सयलनाणसुभाणुपयासिणी सयलधम्मपमाणपभासिणी । भावणा धुवयाइपयासिणी भावणा मिगयाइय वासिणी ।।१९३।।

सकलज्ञानं केवलज्ञानं तदेव सुष्ठु भानुर्भास्करस्तस्य प्रकाशकारिणी इलापुत्रादीनां वंशाग्रेऽपि केवलप्रकाशिनी तथा समस्त-धर्मप्रमाणप्रभाषिणी, विना भावनां समस्तधर्मकृत्याप्रमत्वात् शून्यचित्तत्वाच्च, पुनः किं भावना ? अध्रुवतादिभावनां प्रकाशितुं शीलमस्या इति, अनित्यादिभावनाप्रकाशनशीलेत्यर्थः । पुनः किं ? मृगादिमनःस्वपि वसनशीला, यत उक्तं च –

"अप्पहियमायरंतो अणुमोयंतो य सुग्गइं लहइ । रहकारदाणअणुमोअगो य मिगो अ जह बलदेवो ।।१।।" [उप.माला. १०८] ।।१९३।।

अणिच्चा सुराणं सुहाणं, अवत्था अणिच्चा अणत्थिञ्जिया सव्व अत्था ।
अणिच्चा य रायाण राया, समत्था अणिच्चा हु उप्पत्तिजुत्ता पयत्था ।।१९४।।

सुराणां सुखानां च अवस्था पर्याया अनित्याः, तथा अनघाद्यर्जिताः सर्वे अर्था अनित्याः, तथा राजाराजानोऽपि समस्ता सर्वेऽपि अनित्याः, तथा उत्पत्तियुक्ता उत्पन्नाः पदार्थाः सर्वेऽपि अनित्याः ।।१९४।।

अणिच्चा जए चक्कवट्टीण रिद्धी, अणिच्चा णहोचारिविज्जाण सिद्धी ।
अणिच्चा य केसिं मुणीणं पि लद्धी, अणिच्चा सुराणां तितीरूवरिद्धी ।।१९५।।
को रूवाइयरिद्धिं, दट्ठूणमणिच्चयं च पडिबुद्धो । वसहस्स य करकंडूं, कलिंगदेसाहिवो बुद्धो ।।१९६।।

भगवन् ! रूपादिकर्द्धिमनित्यकां दृष्ट्वा कोऽपि प्रतिबुद्धः ? स्वयमेव प्रतिबोधं प्राप्त ? इति प्रश्नः, गुरुनिर्वचनं यथा वृषभस्य गोणस्य रूपयौवनशरीरबलादिऋद्धेरऋद्धिं दृष्ट्वा करकण्डुः प्रतिबुद्धः, कः करकण्डुः ? कलिङ्गदेशाधिपः प्रत्येकबुद्धः एतत्संबन्धस्तु विस्तरतः प्रत्येकबुद्धचतुष्टयसंबन्धतोऽवसेयः, संक्षेपतो यथा –

"करकण्डुः स च क्ष्माभृत्, प्रायोऽभूद् गोकुलप्रियः । दृष्ट्वाऽन्यदा शरद्येकं, तर्णकं शुभ्रवर्णकम् ।।१।।"
ऊचे दोह्या न माताऽस्य, पयः पाय्योऽन्यदऽप्यसौ । तैस्तथानुष्ठिते जातो, मनोज्ञः सोऽतिदुर्द्धरः ।।२।।
[आ.नि.तिलकाचार्यवृत्तौ गा. २०९]

दृष्ट्वा तुष्टो नृपः पश्चात्, प्राप्तः कालेन दुर्धरः ।।४।। यथा उक्तं च –

"सेयं सुजायं सुविभत्तसिंगं, जो पासिआ वसहं गुट्ठमज्झे । रिद्धिं अरिद्धिं समुपेहिआणं, कलिंगराया विसमिक्ख धम्मं ।।
गुट्ठंगणस्स मज्झे, ढक्कियं सद्देण जस्स भज्जंति । दिता विदरियवसहा, सुतिक्खसिंगा समत्था वि ।।२।।
पोराण य गयदप्पो, गलंतनयणो चलंत विसमुट्ठो । सो चेव इमो वसहो, पडुअपरिघट्टणं सहइ ।।३।। ।।१९५-१९६।।
[आ.नि.भा. २०७-२०९]

इति ।।१९६-१९७।। तथा च –

इह जं जं संसारे, रमणिज्जं जाणिऊण तमणिज्जं । निज्जंपि उज्जमिज्जसु, धम्मे ज्जिय बलिनरिंदुव्व ।।१९७।। [भव भा. २५]

जहा पच्छिमविदेहे गंधिलावईविजयो इन्द्रपुरीनगरी, तत्थ सिरिअंकदेवो राया, तस्स भारिया सुदंसणा । तेसिं पुत्तो बलिराया, सो वीसं पुव्वलक्खाणि कुमारत्ते जाओ, चत्तालीसं पुव्वलक्खाणि महाराया जाओ । गिहिधम्मे अणेगभोगाइं भुंजमाणो अणेगपोढपुण्णकिच्चाइणा

जिणधम्मं प्पभाविंतो सुसावगत्तणं पालेमाणो य चिट्ठइ । अन्नया चाउद्दसि दिणे अहोरत्ति पोसहिओ सुहभावणापरो सव्वं धणकणयाइवत्थु अणिच्चं भावेमाणो पत्तो वेरग्गं, सिरिकुवलयचंदकेवलिसमीवे पव्वज्जं पडिवन्नो, कमेण सो वि उप्पन्नकेवलो आदेज्जवक्को अणेगभव्वजणे पडिबोहंतो विहरेहि, लोगेहिं कयभुवणभाणु त्ति । तत्थेव विजये चंदमूलिमहरायस्स परओ अंतरंगोवएसेहिं सयमणुभूयं चरियमुवदिसिय तं चंदरायं पडिबोहिय परिनिव्वुडोत्ति । इति अनित्यभावना ।।१९७।।

बहुविहमोसहकरणं, कयंतभयओ य कुणउ वणचरणं । मरणभयसत्थधरणं, तह वि हु मरणे न को सरणं ।।१९८।।

अरिहाइसरणकरणं, सल्लुद्धरणं च पावपरिहरणं । अणसणविहिणा मरणं, एवं मरणे वि भवतरणं ।।१९९।।

पुज्जाणं पि न सरणं, खणं पि इंदज्झउ व्व महयाणं । इय चिंतिऊण बुद्धो, दुमुहो पंचालभूमिवई ।।२००।।

कोऽपि मरणभयभीतः सन् कुलदेवतागोत्रदेवीशरणं स्मरणं वा करोतु । कोऽपि च जननीजनकादिकं वाऽनुसरणं तदादि अनुसरतु । आदिशब्दात् पितामह-सहोदर-पुत्र-पौत्र-भगिनी-भार्या महद्गोत्रिणं वा अनुसरतु । तथा च सबलं च चतुरङ्गिनीसेनादल-शरणकरणं करोतु, तथापि मरणे सति कोऽपि शरणं न स्यात् तथा बहुविधानामौषधानां करणं भवतु तथा कृतान्तभयतः यमबिभीतिकातो वा वनचरणं कान्तारप्लवनं करोतु अथवा मरणभयतः शस्त्रधरणं शस्त्राणि वहतु तथापि मरणे कोऽपि शरणं न स्यात् ।।१९८।। अथ मरणे यच्छरणं क्रियते,

तदाह.....★ पूज्यानामपि महतामपि न कृतान्तकाले कोऽपि शरणमिन्द्रध्वजवत्, यथा इन्द्रकेतुः लोकैर्महितः पूजितोऽपि अलंकृतोऽपि तथास्वरूपो द्वितीयदिने न रक्षितः । एवं पूज्यानां महतामपि न शरणमिति विचिन्त्य द्विमुखो नृपः पञ्चालदेशाधिपतिः प्रतिबुद्धः, यथा

इतः पञ्चालविषये, काम्पिल्यपुरपत्तने । द्विमुखो भूभृदन्येद्युरिन्द्रकेतुं निरीक्षितः ।।१।।
लोकैर्महीयमानं तं, नानापुष्पादिभूषणम् । पतितं च क्षणान्मूत्रोच्चारदुर्गन्धभूतले[१] ।।२।।
प्रतिबुद्धस्ततः सोऽपि, व्रतमादाय भूपतिः । संजातजातिस्मरणो, विजहार महीतले ।।३।। [आ.नि.तिलकाचार्यवृत्तौ गा. २१२]

उक्तं च –

जो इंदकेऊं सुअलंकियं, तं दट्ठुं पडंतं पविलुप्पमाणं । रिद्धिं अरिद्धिं समुपेहिआणं, पंचालराया वि समिक्ख धम्मं ।।

[आ.नि.भा. २१३]

तथा चोक्तं – **तह रज्जं तह विहवो, तह चउरंगबलं तहा सयणा । कोसंबिपुरी राया, न रक्खिओ तह वि रोगाणं ।।२।।**

[भवभावना-३१]

कोशाम्ब्यां चन्द्रसेनो राजा सुलोचनः पुत्रः अन्यदा वसन्तक्रीडायां कृतलक्षसुवर्णव्ययः सुलोचनो राज्ञाऽपमानितो देशान्तरं गतः, तत्र

१. महीतलम् प, छ । ★ २०० तमी गाथाया अर्थस्त्रुटितः ।

तत्सानिध्यात् धातुवादिना सुवर्णसिद्धिः, तैः कुमारस्यापि सुवर्णं दत्तम् । कुमारः कुरुदेशं गतः, हेमन्ते कञ्चिन्नरं शीतार्थं निश्चेष्टं दृष्ट्वा कृपया सद्यो ज्वालिताग्नितापादिना सचैतन्यं चक्रे, तेनोक्तमहं गजपुरवासिपुरुषदत्तराज्ञः सूराख्यः पुत्रोऽश्वपातोऽत्रागतो रात्रौ शीतपीडितस्त्वया सञ्जीकृतः, तेनापि स्वस्वरूपमुक्तम्, द्वावपि प्रीतौ गजपुरे गतौ, सूरसंसर्गात् सोऽपि दृढजिनधर्मी जातः । अन्यदा विरक्तः सूरः सुलोचनमित्रं पुत्रस्थाने पित्रोः समर्प्य प्राव्रजत् । नृपोऽपि सुलोचनं राज्ये न्यस्य धर्ममाराध्य स्वर्गतः । अन्यदा कौशाम्ब्यागतमन्त्री सुलोचनमाह – राजन् तव पिता चन्द्रसेनः क्वापिरुग्पीडितस्त्वां द्रष्टुमिच्छति इति श्रुत्वा नृपोऽथ तान् वैद्यमन्त्रिकादींल्लात्वा कौशाम्ब्यां गत्वा चिकित्सामकारयत् तथाप्यनुपशान्तरोगोऽशरणो मृतः । सुलोचनः पितुर्बहुरोगार्त्तस्याशरणतां ज्ञात्वा द्वे राज्ये त्यक्त्वा निर्विण्णः प्रव्रज्य मुक्तः ।। इति अशरणभावना **।।१९८-२००।।**

एगो य पावाइं करेइ जीवो, अन्नस्स अट्ठा अइनिव्विवेगो । भुंजेइ कम्माइं सयं स एगो, सो णरयाई बहुदुक्खवेगो ।।२०१।।

संवेगहीणो इह कोवि एगो, भेगो जहा नो सहियमिच्छगो । जत्थेव तत्थेव मरेइ एगो, रक्खेइ एगो न य तं अणेगो ।।२०२।।

जीवो जन्तुः पापानि अन्यस्यार्थे स्वामिकुटुम्बाङ्गनादिप्रेरितोऽप्रेरितो वा एक एव पापानि ग्रामभङ्गदेशभङ्गबालस्त्री पशुवधादिरूपपातकानि करोति । किंविशिष्टो जीवः ? अतिनिर्विवेकः पशुवत् पापनिरपेक्षः, स तु नारकादिः नारकादिजातः सन् सत्पापोत्पन्नकर्माणि दुःखतया जालानि अतिदुःखवेगाक्रान्तः एक एव भुनक्ति ।।२०१।।

इह जगति कोऽपि एको जीवः संवेगहीनः, यथा भेकः पशुविशेषो यत्रापि तत्रापि मरति दीनः, यत्रापि तत्रापि मार्यमाणो मरति, तथा संवेगहीनः सम्यक्त्वादिधर्महीनो हीनः धर्मरहितो जीव एक एव मरति म्रियते । किं विशिष्टः ? स्वहिते भेकवदनिपुणः, तं च एकमेव मरन्तं कोऽपि एकोऽप्यनेकोऽपि न रक्षति रक्षितुं न समर्थो भवतीति ।।२०२।। जुयलं ।

केण वि केण वि दीणो, पुरिसो एगो भमेइ संसारे । परिणामेण मणेण य, संकप्पेणं परिणाए ।।२०३।।

सीलेण दंसणेण य, आयारेणं परक्कमेणं च । वयणववहारओ वि य, सेवावित्तीई जाईए ।।२०४।।

भगवन् ! पुरुषो जीवो मनुष्यो वा केन केन प्रकारेण संसारे एक एव दीनो भ्रमति प्रश्नः । प्रतिवचनं यथा परिणामेन अध्यवसायेन क्वचिदेकत्र स्थानोपविष्ट एक एवार्त्तरौद्रध्यानं दीनो ध्यायति तथा दीनहीनसंकल्पेन कोऽपि प्रज्ञया दीनः बुद्ध्या दीनो हीनो वा । तथा कोऽपि एकः शीलेन आचारेण दीनः अब्रह्मसेवी वा कुत्सितकर्मचेष्टी, कोऽपि दर्शनेन हीनो दीनदर्शनी लोकविरुद्धवेषी नग्नकुत्सितमिथ्यादर्शनीति । तथा आचारेण आकारेण वा दीनः नास्तिकादिः, तथा पराक्रमेण दीनः हीनसत्त्वः सर्वत्र धर्मसंसारकार्यादिषु निःसत्त्वः, तथा वचनतो वचनेन दीनः दीनवचनः, अयुक्तान्यायतुच्छवाक्यवक्ता, तथा च व्यवहारेण दीनः व्यवहारशुद्धिरहितः, व्यवहारसूत्रग्रन्थजाज्ञानेन हीनो दीनः, तथा सेवातो दीनः दीनसेवी हीनाचारपुरुषसेवीति, तथा जात्या दीनो दीनजातिः धीवरसौनिकचाण्डालादिजातिः, तथा वृत्त्या आजीविकया दीनो दीनवृत्तिः याचकवनीपकादिवृत्तिः इत्यादि बहुप्रकारैर्दीनः कोऽपि एक एव परिभ्रमति संसारे नरके च मधुराजवदेक एव याति,।।२०३-२०४।।

तद् यथा - वाराणस्यां मधुराजा, तस्य परबलो धीरो नाम पत्तिर्लक्षयोधी, तस्य वर्षं प्रति जीवनं लक्षसुवर्णम् । अन्यदा कुरुदेशेशो बहुसैन्यस्तत्रागतः । मधुनृपोऽल्पबलोप्यभिमुखं निर्गतः, तेन सह युद्धं चकार, युद्धे भग्नो मधुः । इतश्च परबलधीरेण तथा युध्यता यथा भग्नं कुरुदेशबलम्, निगृहीतस्तन्नृपः, मधुना सपरबलधीरः सत्कृतः, पुरे प्राप्तः, नृपोऽपि चिन्तयति, चतुरङ्गसैन्ये पत्तय एव सारमङ्गम्, ततो बहुजीवनदानेन संगृहीतम् । घनाः पत्तिकोटयः सदा तद्वेष्टितस्तिष्ठति, अन्यदा मृत्युकाले बहुकोटिपत्तिपरिवृतोऽपि गतत्राणो मृतो नरके गतः ।

'यथा-मिथिलायां विदेहेषु, नमिर्नाम्ना नरेश्वरः । महादाहोऽन्यदाऽस्यासीद्, देव्यो दाहोपशान्तये ।।१।।"

घर्षन्ती चन्दनं तत्र, वलयानां खलत्कृतिः । स्याद् दुःसहा महीभर्त्तुरुतार्य वलयान्यथ ।।२।।

दधुर्देव्यस्तदैकैकं, खलत्कारोऽथ नाभवत् । पृष्टे राज्ञा तदाख्यातं, तत्कृत्वाऽबोधि भूपतिः ।।३।।

भावयन्मिथिलाधीशो, नमिरेकत्वभावनाम् । संबुद्धो व्रतमादाय, व्यहार्षीदवनीतले ।।४।। [आ.नि.तिलकाचार्यवृत्तौ गा. २१३]

तथा चोक्तं -

"बहुआण सद्दयं सोच्चा, एगस्स य असद्दयं । वलयाण नमी राया, निक्खंतो मिहिलाहि तो ।।१।।

[आ.नि.भा. २१४] इति एकत्वभावना ।।२०४-२०५।।

जीव ! तुमं मणसुन्नो, अन्नो देहो य जीव अन्नो य । इय जइ तए न णायं, तयट्ठपावेण तो छिन्नो ।।२०५।।

व्याख्या – रे जीव ! त्वं कथं मनःशून्यः, कथं रे त्वं हृदयशून्यः इति सुमत्या उक्तः, स उवाच - कथमिति, यतस्त्वया ससंज्ञिनाऽपि इति न ज्ञातम्, इति किं ? यदन्यो जीवः अन्यो देहो यतो गते जीवे यदौदारिकं शरीरं तत् तु प्रत्यक्षं दृश्यते इहैव तिष्ठति परं जीवेन सह नो याति, अत एवान्यो देहः अन्यो जीवः यदि त्वया इति न ज्ञातम्, अज्ञात्वैव तदर्थं परप्राणहत्यादिभिर्मांसाद्यभक्षभक्षणपञ्चेन्द्रिय-पोषणपापादिभिस्त्वं छिन्नः, नरकादिगतिषु बहुशः छेदनभेदनं प्राप्तः ।।२०५।।

भिन्नेण असारेणं, धणजुव्वणसयणरूवदेहेणं । जाणंतेण तए किं, मूढेण मलो समाइन्नो ।।२०६।।
न तवो न दमो न जमो, चिन्नो देहट्ठसंवरो छिन्नो । उवओगो य न दिन्नो, अन्नो अंगी घणो अन्नो ।।२०७।।

व्याख्या – भिन्नेण आत्मनोऽन्येन धनयौवनस्वजनरूपशरीरेण जीवतः एतेन सर्वथाऽपि पृथग्भूतेन त्वया ज्ञानवता मूढेन वा किमेतेषामर्थे पापेन मलः कर्मरजः समाचीर्ण आवरितः । जानताऽपि सम्यग्दृशाऽपि मूढेन मिथ्यादृशापि च । एतेष्वर्थेषु पापानि क्रियते[१] इति ।।२०६।।

१. क्रियन्ते प्र ।

व्याख्या – देहार्थं देहपालनार्थं देहसुखार्थं देहपोषणार्थं च न तप द्वादशादिभेदरूपस्तथा दमो वा इन्द्रियदमनरूपः,तथा न यमः पञ्चमहाव्रतरूपो न चीर्णः नाङ्गीकृतः, इति कियदङ्गी प्राणी अन्यः घनो देहः, प्राणितोऽन्यः इति उपयोगोऽपि न प्रयुक्तः ।।२०७।।

जो चूयरुक्खं तु मणाभिरामं, समंजरीपल्लवपुप्फचित्तं । रिद्धिमरिद्धिं समुपेहिआणं, गंधाररायाविसमिक्खधम्मं ।।२०८।।

व्याख्या – जीवाद् ऋद्धिः शरीररूपं लावण्यादिऋद्धिरन्या पृथक्, कस्येव भूतवत् सहकारस्येव यथाऽस्याम्रस्य इति संचिन्त्य प्रतिबुद्धः गन्धारनृपः गन्धारदेशराजा तथा च कलत्राद्यन्यत्वे सति धनो बुद्धः । तत्र गन्धारनृपो यथा –

"इतो गन्धारदेशस्योत्तंसे सिंहपुरे पुरे । राजा नगगती राजपाटिकां सोऽन्यदागमत् ।।१।।

दृष्ट्वा कुसुमितं चूतमेकां मञ्जरिमाददे । गृह्णद्भिस्तज्जनैरेवं, काष्ठशेषः कृतोऽथ सः ।।२।।

प्रत्यावृत्तेन भूभर्त्राऽपृच्छत् चूतद्रुमः क्व सः । मन्व्यूचे देव ! न केन, गृहीतैकास्य मञ्जरी ।।३।।

गृह्णद्भिरपरैरेवमयमीदृग्दशः कृतः । दध्यौ राजाऽपि राजश्रीरप्यन्या जीवतः सदा ।।४।।

सोऽपि व्रतं समादाय निर्ममो व्यहरद् भुवि ।।५।। [आ.नि.तिलकाचार्यवृत्तौ २१४]

अथ तेषां चतुर्णां स्वरूपं च –

क्षितिप्रतिष्ठितपुरे, चत्वारोऽपि महर्षयः । चतुर्द्वारे देवकुलेऽन्योऽन्यद्वारेषु तेऽविशन् ।।१।।

विमुखः कथमेषां स्यां, ततः सोऽभूच्चतुर्मुखः । आशैशवात् करकण्डोः, कण्डूतिरभवत् ततः ।।२।।

कृत्वा स कर्णे कण्डूयां, कण्डूयनमगोपयत् । तं दृष्ट्वा द्विमुखः स्माह, करकण्डुं मुनिं प्रति ।।३।।

जया रज्जं च रट्ठं च, पुरं अंतेउरं तहा । सव्वमेयं परिचज्ज, संचयं किं करेसिमं ।।४।।

करकण्डुर्यावन्नोत्तरं दत्ते तावन्नमिराह –

"जया ते पेइए रज्जे, कया किच्चकरा बहू । तेसिं किच्चं परिचज्ज, अप्पकज्जपरो भव ।।५।।

अथ गन्धारः स्माह –

जया सव्वं परिचज्ज, मुक्खाय घडसी भवं । परं गरिहसी कीस अत्तनी सेसकारये ।।६।। [उत्त. ५४१]

अथ करकण्डुरुवाच –

मुक्खमग्गं पवन्नेसु, साहूसु बंभयारिसु । अहियत्थं निवारंते, न दोसं वत्तुमरिहसि ।।७।। [उत्त.नि. २७९]

रूसउ वा परो वा मा, विसं वा परिवत्तओ । भासियव्वा हिया भासा, सपरत्थगुणकारिया ।।८।। [श्रा.दि. २१७ साध.वात्स. १३]

एवं तं अनित्यादिभावप्रतिबुद्धाः प्रत्येकबुद्धाः केवलं निर्वृतिं प्राप्ताः । अथ अन्यत्वभावनया धनः प्रतिबुद्धो । तद्यथा – दशपुरपुरे धनेश्वरश्रेष्ठिसुतो धनः, तज्ञाया यशोमती, भर्तुर्विनयादि तथा कुरुते यथा लोकोऽपि तां सतीं मन्यते । धनस्तस्यां भृशमनुरक्तोऽपि विमलसुश्रावकसुसंगत्या धनः सुश्रावको जातः । अन्यदा विमलेन धन उक्तः हे धन ! त्वत्भार्याया उत्तरीयं कस्यापि विट्पार्श्वे दृष्टम्, ततो धनेन भार्यासमीपे उत्तरीयकमानय कार्यमस्ति । मार्गितं सा प्राह सख्या गृहीतमस्ति, नूनमसतीयम्, अहो ! अन्यासक्तायामपि महास्नेहः मज्जीवादेषा अन्या एव, अहमपि अस्या जीवतोऽन्य एव तर्हि केयम्, कोऽहमिति अन्यत्वभावनया बुद्धः, वैराग्यात् प्रव्रज्य नदीसमीपवने शीततौ रात्रौ कायोत्सर्गे स्थितः । दंश-मशक-शीतादिपीडितोऽपि शुभभावोऽन्तकृत् केवली जातः ।। इति अन्यत्वभावना ।।२०७-२०८।।

नरयतिरिमणुअसुरगइ-रूवो णेओ हु एसो संसारो । नीरनिहि व्व अपारो, एसो रोगाइ य णेगहा मारो ।।२०९।।

एसो दुहभंडारो, कारागारु व्व पाविजीवाणं । एयम्मि पाणिवहगा, भीमु व्व य जंति नरयम्मि ।।२१०।।

व्याख्या – नरक-तिर्यग्-मनुज-सुरगतिरूपः एष संसारो ज्ञेयः, हुर्निश्चितं नीरनिधिवत् अपारः स्वयंभूरमणसमुद्रवदपारः, किं विशिष्टः ? रोगादिभिरनेकधा मारो मरणं यत्र, सरोगाद्यनेकधा मारः, तत्रानेकधा मरणानि यथा – केचित् स्वयमेवात्मघातं कुर्वन्ति मरन्ति,

कमलपूजां कुर्वन्ति, केचिद् गलपाशेन, केचिद् विषभक्षणेन, केचित् कूपादिजलपातेन, केचिदग्निप्रवेशेन, केचिद् गिरिशृङ्गतः पतनेन, केचित् स्वयमेव स्वोदरादिषु शस्त्रक्षेपेण, केचित् तु राजादिना शूलाग्रे रोपणं मस्तकच्छेदादिना, केचित् तु दुर्भिक्षादौ क्षुधा-तृषापीडया, केचित् तु रोगाक्रान्तादिना सप्तदशविधमरणैश्च । एवं संसारोऽनेकधा मार इति ।।२१०।। तथा च -

व्याख्या – एष संसारः कारागारः दुःखभण्डारः केषां दुःखकोशः ? सोऽपि जीवानां पापिष्ठानां न तु पुण्यवताम् । पुण्यवतां तु यथोक्तं च –

"आरोग्यभाग्याभ्युदयप्रभुत्वं, [सुखदं] शरीरे जने महत्त्वम् । तत्त्वं च चित्ते सदने च संपत्, संपद्यते पुण्यवशेन पुसाम् ।।१।।

पापिनां तु –

"अनाज्ये भोज्यमप्राज्यं, विप्रयोगः प्रियैः सह । अप्रियैः संप्रभोगश्च, सर्वं पापविजृम्भितम् ।।१।।"

अथ एवमिति एतस्मिन् संसारे प्राणिवधकाः जीवघातकाः भीमनृपवद् नरकं यान्ति । यत उक्तं च –

"पाणिवहेण भीमो, कुणिमाहारेण कुंजरनरिंदो । आरंभेहिं अ अयलो, नरयगइए उदाहरणा ।।१।। [भवभावना-१७७]

अत्र भीमदृष्टान्तो यथा – कम्पिल्यपुरे श्रीमदामनृपः, पद्मावती राज्ञी तनयो भीमपुत्रः क्रौर्यलोल्यादिदोषाकरः, तस्य राज्ञो द्वितीया राज्ञी कमला, तस्याः सुताः भानु-राम-पद्मकीर्तिनामानः कलावन्तो गुणिनश्च तत्र मतिसागरमन्त्री, वसु श्राद्धः, तस्य श्राद्धस्य पुत्राः सुमतिः

विमलः बृहस्पतिः मतिधना गुणिनः । इतश्च भीमो दुर्दान्तो भान्वादिबन्धून् सुमतिं विना मन्त्रिसुतांश्च कुट्टयति । मन्त्रिणा भीमान्याये राज्ञो ज्ञापितेऽपि राज्ञीभीतो राजा भीमस्य वक्तुं न शक्नोति । अन्यदा भीमेनोद्वेजिता जनाः रावां कुर्वन्ति । ततः समातृको भीमः कुमारभुक्त्या दत्ते देशे प्रेष्यमाणः यः मन्त्रिपुत्रं सहाकारयति । मन्त्र्यपि वत्स ! यदा कदाचिद् भीमो नृपो भवति स चास्मद्दोषी मां नृपं च गृह्णाति तदा त्वया रक्षा कार्या इति सुमतिं सुतमशिक्षयत् । तथा च मन्त्रिबुद्ध्या राजापि विमलादिपुत्रान् अवदत् वत्साः ! यदा कदाचिद् भीमोऽस्मान् गृह्णाति तदा रक्षा कार्येति कथयित्वा भानु-विमलं बहुरत्नादियुतं राजा देशान्तरे प्रैषीत् । भीमश्च देशान् वशीकृत्य काम्पिल्ये आगत्य राजानं पितरं मन्त्रिणं च काष्ठपञ्जरे प्रक्षिप्य स्वयं नृपोऽभूत्, सुमतिर्मन्त्री कृतः, भीमो नृपामात्यादिधक्षुः, सुमतिरुवाच सकाष्ठपञ्जरौ भूमिमध्ये चिक्षेप । सुमतिः सुरङ्गया स्वगृहे निन्ये रहः । भीमश्च शश्वद् मृगयारतो मृगादिजीवान् चौरादीन् मारयन् अल्पेऽप्यपराधे हस्तादि छिन्दन् शत्रुग्रामादिज्वालनादिना अतिदुष्टोऽभूत् । इतश्च भानु-विमलौ भुवि भ्रमन्तौ अटव्यां कञ्चन योगिनं विद्यां साधयन्तं विलोक्य तं प्रति किमेतदिति पप्रच्छतुः, भद्र ! मे गुरुदत्तविद्यां साधयतो बहुकालो गतः, विद्यां जपित्वा बिल्वमग्नौ विक्षिप्यते । त्रिः पश्चात् स्वयं जम्पो दीयते परं तादृक् सत्त्वं मे नास्ति । ततो भानुना विद्या मार्गिता, दत्ता च तेन, भानुरविलम्बमग्निकुण्डे झम्पो ददौ । पृष्ठतो विमलोऽपि, ततो विमानारूढां प्रज्ञप्तिदेवीं पश्यतः स्म, तुष्टा देवी रत्नभृतं विमानमर्पयत् । नृपमन्त्रिकाष्ठपञ्जरक्षेपादि च ऊचे । देव्या भीमो निगृहीतः । भानुना योगिने रत्नानि दत्तानि, विमानेन काम्पिल्ये गत्वा विद्याभृत् चक्री जातः । अन्यदा भानु-विमलौ विरक्तौ जनकाद्यनुज्ञया प्रव्रजितौ ।

भानुश्चतुर्ज्ञानी काम्पिल्ये श्रीदामजनकाग्रे धर्मान् दिदेश । नृपं आह भीमस्य मयि मन्त्रिणि द्वेषः सुमतौ प्रीतिश्च कुतः ? ज्ञान्याह-मगधेषु धनालयग्रामेशः सिंहः, दत्तस्तस्य सेवकः, ऋद्धौ कौटुम्बिकौ नन्दवत्सौ अन्योऽन्यं प्रीतौ । अन्यदा दत्तगिरा सिंहेनाभ्याख्यानं दत्त्वा नन्दस्य सर्वा श्रीर्गृहीता, पुनर्वत्सवचसा प्रत्यर्पिता । सिंहो दत्तश्च महापापेन नरकं गत्वा भवं भ्रान्त्वा त्वं राजा दत्तश्च मन्त्री जाताः । नन्दो भीमः वत्सश्च सुमतिः इति श्रुत्वा राजा मन्त्री अन्येऽपि च प्रव्रज्य शिवमापुः, भीमस्तु प्राणिवधेन सप्तम्यां भुवि परमायुर्नारकस्ततश्च भूरिभवम् ।।२०९-२१०।।

अथ मांसभोगेऽपि नरकं –

महामंसभोईण किं वा, नराणं गई नारगाणं जहा कुंजरस्स ।

महारम्भकारीण किं वा, गिहीणं गई नारगाणंऽचलस्स व केसि ।।२११।।

व्याख्या – भगवन् ! महामांसभोजिनां नराणां स्त्रीणां वा उपलक्षणत्वात् तिरश्चां वा किं स्यादिति प्रश्नः ? तेषां प्रायो नारकाणां गतिः स्यात् । नरकगमनमेव भवति, प्रायो ग्रहणात् सोदासस्येव, कस्यचित् ततः प्रतिनिवृत्तस्य न भवत्यपि, यस्यानिवृत्तस्य भवति तस्य कुञ्जरनृपस्येव भवति, यथा सिंहपुरे सिंहगिरिर्नृपः, तस्य विजया राज्ञी चित्रमतिर्मन्त्री परमश्राद्धः, तस्य संगत्या नृपोऽपि परमजैनोऽजनि । अन्यदा राज्ञाऽचिन्ति यदि मे पुत्रः स्यात् तदा तस्य राज्ये न्यस्य प्रव्रजामि । इत राज्ञी स्वोदरात् सर्प निर्गतं गजं दशन्तं स्वप्ने ददर्श, सा

भीता सती राज्ञे कथयति, राज्ञा पृष्टो मन्त्री किमेतदिति, मन्त्री आह राजन् ! ते पुत्रो भावी उद्वेगकृत् । ततो जातमात्रे पुत्रे सुन्दरं भागिनेयं राज्ये न्यस्य समन्त्री राजा प्रव्रज्यां जग्राह । जाते पुत्रे कुञ्जर इति नाम दत्तम्, कालेन कुञ्जरं राज्ये न्यस्य सुन्दरोऽपि प्राव्रजत् । स च मृगयारतो महामांसादिगृद्धः, महामांसं तु नरमांसमिति, तत्रादौ गृद्धः सिरीयकरूपकृता नानाजीवमांसानि संस्कृत्य तस्य दीयते, नृपः सूपकृच्च षष्ठपृथिव्यां गतः । सिंहगिरिचित्रमतिसुन्दराः सिद्धाः । **महारंभकारीण वा किं गिहीणमिति** महारम्भकारिणां गृहिणामिति गृहादिमहापरिग्रहिणां किमिति प्रश्नः ? तेषामपि नारकाणां गतिः स्यादिति, कस्येव अचलस्येव, यथा अचलस्य प्रपापलातुरेव, तत्संबन्धो यथा – छगलपुरे छगलिको वणिक् मिथ्यादृष्टिः स्वप्नेप्यश्रुतधर्मो महारम्भी ।

"जो सद्धम्मग्गहणं काऊं, अरई सया परेसिं पि । विक्केइ छालिआउ, लक्खंगुलिअं व दंते अ ।।१।।

उक्खल-मुसल-लोहं, घरट्टनिस्सायसयलसत्थाइं । चित्तयम्मं कट्ठं, महुमयणतिलाइ धन्नाइं ।।२।।

गिह्णइ विक्किणइ, सया करेइ तं मज्जविक्कयं निच्चं । करेइं उच्छुवाडे, विढवावइ, पोसि इत्थीओ ।।३।।

विक्कइ गो-मणुआइ, वणसंडे खंडिऊण तह चेव । खित्तेसु हलसयाइं, वहंति तह वणियपुत्तेहिं ।।४।।

सगडाइ पवहणाइं, वाहावइ विक्किणइ य इंगाले । चमरीकेसे मत्थाइआइं विक्किणइ निच्चं पि ।।५।।

एवं महारम्भेणं परिग्रह-लोभाभ्यां पापतत्परं तं विलोक्य लोकेन अचल इति तस्य नाम कृतम्, ततो महारम्भपापेन तृतीयनरके उत्कृष्टायुर्नारकोऽजनि ।। इति नरकगतिरूपसंसारो दर्शितः ।

व्याख्या – ये नरा मनुष्या धनस्वजनादिमोहिताः आर्तध्याना मरन्ति म्रियन्ते **किं विणा** विना धर्मं धर्मरहितास्ते पुरुषा दमघोषश्रेष्ठिवत् बहुभेदां तिर्यग्गतिं यान्ति, तद्यथा-धर्मपुरं नाम नगरं तत्र दमघोषनाम व्यवहारी अष्टकोट्यधिपतिः अष्टगोकुलस्वामी, अष्ट पुत्राः महारम्भी धनार्जनार्तध्यानवान् यौवनवया एव मृत्वा स्वशरीरे एव कृमिः कीटो जातः, स तु मृतो गृहे पतितोऽस्ति, असंपन्नपाणि-ग्रहणानामष्टपुत्राणां तन्मातुश्च महान् शोकावतारः, अत्रान्तरे सुनामा आचार्यश्चतुर्ज्ञानी महत्तरमृत्युं लोकतः श्रुत्वा महालाभं च विज्ञाय तद्गृहे प्राप्ताः, भो भो मा शोकं कुरुत इति प्राहुः । जीवति दमघोषः स्वभावान् ब्रूते गृहमध्य एवास्ते । सर्वरोगविमुक्तत्वाच्च शीतलवपुः दीर्घश्च अमङ्गलं रोदनादि न कार्यम्, सर्वेऽपि मङ्गलवचनं श्रुत्वा हृष्टाः । आचार्योऽपि मङ्गलध्वनिना मधुररागमयेन गायति-

"धी धी धी संसारं, जुवाणओ परमरूवगव्विओ सिद्धी । मरिऊं जाओ य किमी, तत्थेव कलेवरे नियस्स ।।१।।"

"जह दमघोसो एस, अट्ठतियं पयहिऊण सेट्ठिवरो । अट्टज्झाणोवगओ, आसालुद्धो महामुद्धो ।।२।।"

पुत्रैर्भार्यादिभिश्च भावार्थं पृष्टः, आचार्याः सत्यार्थकथने प्रतिबुद्धाः पुत्राः, तैरचिन्ति, अकृतपुण्यानामस्माकमपि संसारदुर्गतेर्महद्भयं

१. एवास्ति प्, छ ।

भावीति वैराग्यात् तेषामाचार्याणां समीपे दीक्षाग्रहम्, पक्षक्षपणमध्ये तेषामशनादिनिषेधः, चारित्रमाराध्य निर्मोहानां तेषां सर्वेषां सर्वार्थसिद्धविमाने उत्पत्तिः । धनस्वजनादिमोहितो जीवो मृत्वा धनप्रियवणिग्वद् एकेन्द्रियो भवेत् । प्रमादाच्च प्रियङ्गुवणिग्वत् विकलेन्द्रियो भवेत् । यत उक्तं च –

'जिणधम्मुवहासेणं, कामासत्तीइ हिययसढयाए । उम्मग्गदेसणाए, सया वि केलीकिलत्तेणं ।।१।।"

कूडक्कयअलीएणं, परपरिवाएण पिसुणयाए विंगलिंदिएसु जीवा, वच्चंति पिंगुवणिओ व्व ।।२।। [भव० भा० १८७-१८८]

तथा प्रमादतः क्षुल्लकवत् महिषो जीवो भवतीति गाथार्थः❖ । एतेषां संक्षेपसंबन्धा यथा – तत्र धनप्रियसंबन्धो यथा – कुशावर्तदेशे शौर्यपुरे धनप्रिय इभ्यस्तस्य जाया धनवती । तयोर्जम्बूदेवताराधनेन पुत्रो जातः परं सर्परूपः । धनप्रियः पुनर्देवीमाराध्य प्राह किमेतदिति । साऽऽह तव भार्यया प्राग्भवे सपत्न्याः रत्नमपहृतम् चतुर्विंशतिप्रहरान्ते प्रत्यर्पितं च तत्कर्मणा व्यन्तर्या सर्पीकृतः । विंशतिवर्षान्ते पुरुषो भावी । श्रेष्ठी दुग्धपानकरण्डप्रक्षेपादिना पालयतो जम्बूवद् इति पुत्रस्य नाम कृतम्, सञ्जो जातः पुरुषः । धनप्रियस्य पुत्रधनादिषु अतिमोहः । अन्यदा पुत्रादिसर्वकुटुम्बं धर्ममाराध्य स्वर्गं जगाम । धनप्रियस्तु तद्वियोगार्त्तः धर्ममजानन्नश्रद्दधानो महामोहमूढः ।

❖ मूलगाथा नास्ति ।

"महपुत्ता महलच्छी, महगेहणि गेहमाइअं सव्वं । इयं अट्टवसट्टमणो मरिऊ एगिंदिओ जाओ ।।१।।"

ततो भवभ्रान्तः । इति धनप्रियसंबन्धः ।

अथ प्रियङ्गुवणिग् संबन्धो यथा – पोतनपुरे प्रियङ्गुवणिग् मिथ्यात्वदग्, जिनधर्मेऽपि हासकारी, तस्य भार्या प्रियमती, स तस्यामत्यासक्तः असत्यवादित्वे पैशून्यादिदोषो नास्तिकमताश्रितः, तत्पुत्रो देवदत्तः, सुरसुन्दरश्रेष्ठिसुता सरस्वती अन्येऽपि व्यवहारिपुत्रादयो लेखशालायां पठन्ति । अन्यदा पण्डितं स्वभार्यां कुट्टयन्तं विलोक्य छात्रा वारयन्ति । सरस्वती न वारयति, त्वं किमुदासीनेति देवदत्तेन पृष्टा, सरस्वत्याह सा किं महिला भण्यते, यस्याः पादौ भर्ता दासवत् न घट्टयतीति । आपद्गते भर्तृश्च साहाय्यं विधत्ते इति श्रुत्वा देवदत्तेनाचिन्ति नूनमियमतिगर्विता दृश्यते, तदिमां विवाह्य त्यक्ष्यामि येन गर्वफलं लभते, तदभिप्रायस्तयाऽपि ज्ञातः, समये तेन सा विवाह्य त्यक्ता । अन्यदा धनार्जनाय देवदत्तः परद्वीपे गतः, तत्रैका परिव्राजिका कूटबुद्धिनिपुणा वैदेशिकेभ्यो वञ्चनेन बहुस्वर्णकोटिमती राजमान्याऽस्ति । तद्बुद्ध्या राजाऽप्यरीन् जयति । एकदा तया भोजनार्थं निमन्त्रितो देवदत्तस्तद्गृहे गतः । तया च स्वजनपार्श्वात् प्रच्छन्नं तदुत्तारके स्वर्णकुम्भः स्थापितः, देवदत्ते भुक्त्वा स्वस्थानं गते पृष्ठौ तया स्वजनः प्रहितः स गत्वा प्राह स्वर्णकुम्भो नष्टोऽस्ति त्वज्ञनैर्गृहीतस्तव स्थानेऽस्ति स समर्प्यताम्, स प्राह नास्त्यत्र, विवादे सा प्राह यदि त्वत्स्थाने न स्यात् तदाहं सर्वं ते समर्थयामि, ते दासी भवामि, यदि च त्वत्स्थाने स्यात् तदा त्वत्सर्वस्वं गृह्णामि, त्वां दासीं करोमि । अत्रार्थे नृपाद्याः साक्षिणः, प्राप्ते स्वर्णकुम्भे तत्

सर्वस्वं गृहीतं कृतश्च दासत्वे । अथ दुःखितेन तेन प्रियङ्गुपितुः स्वस्वरूपं ज्ञापितम्, सोऽपि तत्सामाचारेण दुःखी, सरस्वत्या पृष्टो दुःखहेतुः, स प्राह यथास्थितम् । सा प्राह मा विषादीः । मां पुरुषवेषेण तत्र प्रेषय यथा सर्वं स्वस्थं स्यात्, प्रतिपन्नं श्वसुरेण बहुपण्यभृतपोतं लात्वा सा नृवेषेण गता तत्र । गृहीत उत्तारः, करोति व्यापारं न जानाति देवदत्तम्, तया परिव्राजकया तथैव भोजनाय निमन्त्रितस्तथैव तया स्वर्णकुम्भः स्वजनैः स्थापितस्तदुत्तारके तद्विलोक्य सरस्वत्या स्वनियुक्तनरैः प्रच्छन्नं तस्याः गृहे स स्थापितः । तथैव विवादे जाते, शोधनेऽलपच्च परिव्राजिकागृहे । गृहीतं सरस्वत्या तस्याः सर्वस्वम्, दासोऽपि देवदत्तः, परिव्राजिका नृपोपरोधाच्च मुक्ता । परिव्राजिका देवदत्तेन सह गता स्वपुरम् । देवदत्तस्तु दासत्वेन सरस्वतीपादतलघट्टनाय गतः, तया तु निजरूपं प्रकाश्य सा पादलग्ना क्षामयते स्म स्वापराधम्, स्वामिन् ! अनुजानाहि मां दीक्षां गृह्णामि । पूर्णो मेऽवधिर्बाल्यादपि विरक्ताऽहम्, अनादिभवाभ्यस्तेन स्त्रीत्वसुलभेन वा चापलेन मयैव तत्कृतं तद्वचसा देवदत्तोऽपि विरक्तः पित्रा निवार्यमाणोऽपि सजायः प्रव्रज्य स्वर्गे देवोऽभूत् । प्रियङ्गुपिता तु जिनधर्महासादिदोषदुष्टो मृत्वा विकलेन्द्रियेषु जातः । पमायओ खुड्डगो जाओ त्ति ।

क्षुल्लकसंबन्धो यथा – वसन्तपुरे देवप्रियः श्रेष्ठी, यौवने भार्या मृता, पुत्रेणाष्टवार्षिकेण समं प्रव्रजितः । इतश्च स क्षुल्लकः परीषहैर्बाध्यमानो वक्ति तात ! न शक्नोमि उपानहौ विना व्रजितुम्, मोहेन पिता ते अनुजानाति । पुनर्वक्ति तात ! न शक्नोमि शीर्षे आतपं सोढुम्, मोहेन पिता शीर्षे छत्रिकामनुजानाति, पुनर्वक्ति तात ! न शक्नोमि भिक्षाटनं कर्तुम् । ततः पिता आनीय दत्ते । एवं भूमौ

संस्तारयितुम्, ततः पिता काष्ठफलकमर्पयति, एवं लोचस्थाने क्षौरं कारयति, प्रासुकनीरेणाङ्गं प्रक्षालयति । पुनर्वक्ति तात ! न शक्नोमि ब्रह्मव्रतं पालयितुमयोग्योऽयमिति पित्रा निष्कासितो मृत्वा महिषो जातः । पित्रा चारित्रमाराध्य देवो जातः । अवधिना महिषं पश्यति । सार्थवाहरूपं कृत्वा तं महिषं गुरुभारं वाहयत्, तात ! न शक्नोमीत्यादि क्षुल्लुकोक्तं पुनः पुनः कथयन् स्मारयति, तस्य जातिस्मरणमुत्पन्नम्, गृहीतानशनो महिषो मृत्वा वैमानिको देवो जातः ।। इति क्षुल्लकसंबन्धः ।।

महिसो समुद्दत्तु व । कुटुम्बाद्यर्थं पापानि विधाय जीवः समुद्रदत्तवत् महिषो भवति, तथा अङ्गारमर्दः अङ्गारमर्दकाचार्यः करभो जातः, मधुविप्रोऽजो मेषो जातः, तथा दृढरथवत् शूकरः स्यादिति लुप्तविभक्तिकम्, तथा जीवः सुमित्रपुत्रवत् पापात् मत्स्यो भवति । तत्र समुद्रदत्तो यथा – ताम्रलिप्त्यां समुद्रवणिग् महारम्भी महापरिग्रहेच्छुः । तस्य बहुलाभार्या महेश्वरदत्तः पुत्रः, गङ्गिला भार्या । समुद्रवणिक् पापानि कृत्वा महिषो जातः, बहुला मृत्वा तत्रैव गृहे शुनी जाता, गङ्गिला स्वच्छन्दचारिणी कुशला[१] । अन्यदा तां भुक्त्वा कश्चिद् विटो रात्रौ गच्छन् महेश्वरदत्तेन हतः । मृत्वा गङ्गिलायाः सुतो जातः, जातो वार्षिकः । अन्यदा पितुः संवत्सरदिने महेश्वरदत्तेन पितृजीव एव महिषो विनाशितः, स भोजनायोपविष्टः उत्सङ्गे सुतः स्थापितः, शुनी गृहद्वारे तिष्ठति । इतश्च कश्चिद् ज्ञानी मुनिस्तत्र भिक्षार्थमागतः, तत्स्वरूपं ज्ञात्वा भिक्षामलात्वा च निर्गतः । महेश्वरदत्तः पृष्ठे याति । पृच्छति च मुने ! भिक्षां किं न लासि । स आह असमञ्जसं दृश्यते,

१. कुशीला प, छ ।

तेन पृष्टं किं तदिति, ज्ञान्याह-पितुर्मांसं त्वया भक्ष्यते, माता ते शुनी, उत्सङ्गे वैरी निवेशितः । स प्राह कथमेतत् ? ज्ञानी यथास्थितं प्रोवाच । महेश्वरदत्तो दीक्षां लात्वा देवलोकं गतः ।। इति समुद्रदत्त-महिषसंबन्धः ।

अङ्गारमर्दको यथा –

"जिणमयमसद्दहंता, दंभपरा परधणेक्कलुद्धमणा । अंगारसूरिपमुहा, लहंति करहत्तणं बहुसो ।।१।।" [भव.भा.२०१]

अस्य संबन्धः प्रसिद्धः । अथ मधुसंबन्धो यथा – राजगृहे मधुविप्रो यज्ञकर्मपरः मृत्वा नरकं गतः, पुनरजो जातः, यज्ञे हतो मृतः, पुनरजो यज्ञे हतः । एवं भवाः प्रभूता जाताः । एकदा यज्ञे हन्यमानः केवलिना पूर्वभवाः स्मारिताः, अनशनेन देवोऽजनि ।। अथ **दृढरहो व्व सूयरो** त्ति – ऋषभपुरे भानुराजा, इतश्च-तत्रैको राजपुत्रः सूरनामा गोत्रनिःकाशितश्चन्द्रवदनाभार्यायुतस्तत्रागत्य तं नृपमवलगति, राजा तु तस्य कृपणत्वेन ग्रासं न दत्ते । सूरो भार्यां प्राह प्रिये ! कृपणोऽयं नृपस्ततस्त्वमिहैव तिष्ठ, अहमयोध्यायां राजानं सेविष्ये तमत्युदारतरम् । सा प्राह नैवं त्वं तत्र गतोऽन्यमहिलासु रक्तः सन् मां त्यक्ष्यसि, ततोऽहं सहैवागमिष्यामि, अनेकधा प्रत्याय्यमानाऽपि सा न प्रत्येति । सूरेण गोत्रदेवी आराधिता तया सुरभिपुष्पमालाद्वयमर्पितम्, प्रोक्तं च कण्ठे स्थाप्यमेतत्, यस्य कण्ठस्थिता माला म्लास्यति तेन ज्ञातव्यमितरोऽन्यासक्तो जात इति । गृहीता द्वाभ्यामपि माला, क्षिप्ता स्वस्वकण्ठे, जातोऽस्याः प्रत्ययः । ततोऽन्यदा भार्यां क्वापि सुस्थाने धवलगृहे स्थापयित्वा सूरोऽयोध्यायां गतः, तत्र नृपस्तं च प्राभृतं द्रव्यम्, (सः) भार्यायाः प्रेषयति । अन्यदा पुष्पाणि त्रूटितानि, द्रव्येणापि

न लभ्यन्ते । राजा पुष्पगन्धमाघ्राय स्वसेवकान् पृच्छति स्म, सूरसमीपे सन्तीति वदति, राज्ञा तत्स्वरूपं पृष्टः, सूरो यथास्थितं प्राह, राज्ञा तस्य भार्यायाः सतीत्वमश्रद्दधानेन किन्नरगन्धर्वकोकिलनामानस्त्रयो गायना मधुरस्वरा दिव्यरूपाः प्रच्छन्नं प्रहिताः । ते च गायन्तो लोकान् रञ्जयन्ति । विरहनिबद्धगीतैः सूरभार्यामाक्षेपयन्ति स्वविरूपाभिः प्रायं ज्ञापयन्ति । ततस्तयोक्तं कल्ये रात्रौ पृथक् पृथक् प्रहरान्ते त्रिभिरप्यागन्तव्यम्, भूमीगृहोपरितनभूमौ आमतन्तुस्यूताः पल्यङ्का स्त्रयो गर्ताद्वारोपरि स्थापिताः । ते कृतशृङ्गारा आगतास्तत्र निवेशिताः पेतुर्भूमिगृहे, भोजनवेलायां त्रयाणामप्यर्धमात्रया कोद्रवकूरं जलगरिकां च प्रक्षिपति, ततः षण्मासान्ते कर्पासपूणिकेव तनुकृशाः पाण्डुराश्च जाताः । अन्यदा तेषां बहुविलम्बं सहेतुकं विभाव्य राजा सूरं प्राह तव प्रियां शीलवतीं द्रष्टुमिच्छामि । ओमित्युक्ते राजा तेन युतस्तत्र प्रच्छन्नं गतः । राजानमन्यत्र स्थापयित्वा सूरो गृहे गतः । सर्वं स्वरूपं प्रोक्तम् । तयाऽपि सर्वं प्रोक्तम्, तयाऽपि सर्वं प्रोक्तम्, राजा भोजनायामन्त्रितः, ते त्रयोऽपि भूमिगृहान्निःसारिताः । देवालये पट्टोपरि उपवेशिताः । सर्वाङ्गं पुष्पैर्वेष्टिताः, राजा आगतः, देवतात्रयमिदमिति विचिन्त्य यावत् तेषां पादेषु पतति तावत् तैरुक्तं स्वामिन् ! वयं तव भृत्याः किन्नरादय ईदृशीं दशां प्राप्ताः, मा पादेषु पत, उत्थायोत्थाय प्रणमन्ति, सर्वं स्वरूपं प्रोक्तम्, राजा तुष्टः, सतीं प्रशंसयति । पवित्रीक्रियतां मत्पुरं युवाभ्यामिति सूरश्चन्द्रवदनायुतः प्राप्तोऽयोध्याम् । राज्ञा अर्पितः सप्तसप्तभूमः प्रासादः । सूरस्य कृतो महाप्रसादः । अन्यदा सूरः शूकरपृष्ठमांसानि भुञ्जानोऽतिशयज्ञानिना वारितः किं पितृमांसान्यास्वाद्यते इति तेन पृष्टं किमेतदिति, ज्ञानी प्राह-तव पिता दृढरथो मृत्वा शूकरो जातः । सूरो जातवैराग्यो निजभार्यायुतो दीक्षां लात्वा तपः कृत्वा शिवं गतः ।। इति सूरस्य पितुः शूकरदृष्टान्तः ।

अथ सुमित्तपुत्तुव्व मच्छो य त्ति – पद्मसरग्रामे सुमित्रो गृहपतिः, तस्यापुत्रस्य वृद्धत्वे पुत्रो जातः प्राणप्रियः, तं विना पिता क्षणमपि न तिष्ठति, सदैव लालयति । षोडशे वर्षे पुत्रो मृत्वा मत्स्यो जातः । अन्यदा सुमित्रेण स एव मत्स्यो बिडिशेन गले गृहीतः । अतिशयज्ञानिना सम्यक्स्वरूपं ज्ञापितः, मोचितः । प्रतिबुद्धो वैराग्येण प्रव्रजितः । विधिना मृतो गतो देवलोकम् । उक्तं च –

"पियपुत्तो वि हु मच्छ-त्तणम्मि जाओ सुमित्तगिहवइणा । बिडिसेन गले गहिओ, मुणिणा मोआविओ कह वि ।।१।।" [भव भा. २३४]

इति सुमित्रसंबन्धः । एतेषां संबन्धो यथा – काञ्चनपुरे वसुदत्तः सार्थवाहः, वसुमती भार्या, तयोर्वरुणः पुत्रः, अत्यन्तं प्राणप्रियः । अन्यदा वरुणो देशान्तरं गत्वा प्रभूतधनकोटीरुपार्ज्य चलितोऽटव्यां शूलेन मृत्वा राजशुको जातः । धनं कियद् गतं कियच्च पितुः प्राप्तम्, तस्य शोकाद् हृदयसंघट्टेन वसुमती मृत्वा तत्रैव गृहे मार्जारी जाता । अन्यदा वसुदत्तो देशान्तरं गत्वाऽर्जितप्रभूतधनस्तस्यामटव्यामायातो यत्र स राजशुकोऽस्ति सुतजीवः । भवितव्यतावशात् सहकारशाखायां तं राजशुकं विलोक्य पाशेन सार्थवाहो गृह्णाति । स्वगृहे नीत्वा पञ्जरे क्षिपति, अतिस्नेहेन तं लालयति, पाठयति । अन्यदा रात्रौ पञ्जरद्वारं विवृतं दृष्ट्वा तया मार्जार्या गृहीतो विनाशितश्च । इतश्च तत्र पुरे केवली प्राप्तः । सार्थेशः पृच्छति किं मम शुकोपरि मोहः ? ज्ञानी सर्वं वक्ति । ततौ वैराग्याद् वसुदत्तः प्रव्रजितो मोक्षं गतश्च ।

"तह सावत्थी वणिया, निरियाय अणेगसो जाया" त्ति । यत उक्तं च –

"मुद्धजणवंचणेण कूडतूला-कूडमाणकरणेणं । अट्टवसट्टोवगमेण देहघरसयणचिंताहिं ।
कूडकहाकहणेणं अणंतसो निअडिवित्ति चित्तेहिं । सावत्थीवणिएहिं व, तिरिआउं बंधइ जीवो ।।१।।"

[भवभावना-२४८-२४९]

तत्संबन्धो यथा – श्रावस्त्यां नगर्यां सोम-वरुण-महेश्वरास्त्रयो वणिजो मैत्रीमापन्नाः कूडतुलादिकारिणः, अन्यदा देशान्तरे त्रयोऽपि धनार्जनाय गताः मुग्धजनवञ्चनादिभिस्तैः पञ्चरत्नानि पञ्चलक्षमूल्यानि अर्जितानि गृहीत्वा स्वपुरमायान्ति, किञ्चिन्मिथः कूटप्रपञ्चेन वञ्चनं चिकीर्षवो भवन्ति । रत्नानि बहिरत्र निधाय संप्रति पुरमध्ये गम्यते, रात्रौ रत्नानि गृहिष्यन्ते । रत्नानि यथा शौल्किका न पश्यन्तीति विमृश्य तैस्तथाकृतम् । केनाप्यन्येन तानि निहितानि ज्ञातानि, तेन पञ्चपाषाणखण्डानि क्षिप्त्वा रत्नानि गृहीतानि, रात्रौ सोमेन समायात्यान्धकारे रत्नसदृश पञ्चपाषाणखण्डानि क्षिप्त्वाऽग्रेतनपाषाणखण्डानि रत्नबुद्ध्या गृहीतानि । एवमपरैरपि क्रमेण तस्यामेव रात्रौ कृतम् । प्रातर्विलोकन्ते पश्यन्ति पाषाणखण्डानि । जाता विलक्षाः मिथः कलहायन्ते, रत्नान्येव ध्यायन्तो मृत्वा तिर्यक्षु अनन्तकालं च भ्रान्ताः । इति श्रावस्तीवणिग् दृष्टान्तः ।

नन्दिषेणसंबन्धः – पूर्वभवे यागकारकविप्रभोजी जीवो विप्रोऽपि सेचनकहस्तीति ।।२११।।

इय पावेहिं तिरिया, अणेगवहमरणदुक्खिया निच्चं । अकयं तवनियमपुण्णा, भाविज्जंतीहि साहूहिं ।।२१२।।

अह नरगइ संसारो, भाविज्जइ विविहमणुअभेएहिं । अंतर दीवयमणुआ, अकम्मभूमा य तीसा य ।।२१३।।

अंतरदीवयमणुआ, अकम्मभूमा य देवसमसुक्खा । अह कम्मभूमिय पुणा, थोवा सुहिआ य बहुदुहिआ ।।२१४।।

व्याख्या – इति पूर्वोक्तपापैस्तिर्यञ्चः पूर्वजन्मार्जिताशुभकर्माणः तिर्यञ्चः खर-वृषभ-तुरग-मेष- महिष-मृगादयोऽनेकवधमरणदुःखिता नित्यं सन्तः करुणापरमुनिप्रमुखभव्यात्मभिस्तिर्यग्गतिः भाव्यते ।। इति तिर्यग्गतिसंसारभावना ।। अथ नरगतिसंसारो भाव्यते- कैर्विभाव्यते ? विविधमनुजभेदैः, तत्र संसारे विविधभेदा अनेकभेदा मनुष्या भाव्यन्ते, ते भेदा यथा अन्तरद्वीपजाश्च ते मनुजाश्च ते षट्पञ्चाशद्भेदा अन्तरद्वीपजमनुष्याः, तथा अकर्मजाः त्रिंशदकर्मभूमिजाः युगलधर्माणः कर्मभूमिजाः पञ्चदशभेदाः । तत्र अन्तरद्वीपजा मनुष्याः, अकर्मभूमिजाश्च मनुष्या देवतासमानसुखभोक्तारः । कर्मभूमिजाः पुनः स्तोकाः एव शालिभद्रादयः संसारसुखभाजो देवतार्पितचिन्तामणिपूरितसमस्तसुखाश्चक्रवर्ति-वासुदेव-बलदेवपुण्यद्धर्या[1] राजोत्तमनरश्रेष्ठिसंतोषभाजो मुनिवरादिवत् स्तोका एव सुखिनोऽभूवन्, सुषमाकालाद्युत्पन्नाश्च पञ्चमकालाद्युत्पन्ना प्रायो बाहुल्येन बहुदुःखिता विभाव्यन्ते[2], ये जीवाः दुर्गतिएकेन्द्रियाः किञ्च विकलेन्द्रियादितिर्यञ्चदुर्गतिनारकाश्च[3] च उक्तपुण्येन शुभकर्मप्रकृतिरूपपुण्योदयेन दुर्लभं मानुषत्वं प्राप्ताः, तं प्राप्तदुर्लभमानुष्यतामपि आर्यक्षेत्रं दुर्लभम् । प्राप्तेऽपि आर्यक्षेत्रनरत्वे सुदुर्लभं अतिशयेन सुदुष्प्राप्यं शुद्धगोत्रं क्षत्रियकुलं यत्र कुले मद्य-मांसभक्षणादिविरुद्धाचारो

१. पुण्याढ्या प१ छ । २. विभाव्यते प१। ३. नारकत्वं च प१ प२ छ ।

न दृश्यन्ते । एवंविधं जीवदयाविभूषितं सुदेव-गुरुकुलं दुर्लभम्, शुद्धगोत्रप्राप्तेऽपि अरोगगात्रं नीरोगपिण्डो दुर्लभ्यं यतो नरत्वं प्राप्तं आर्यक्षेत्रमपि प्राप्तं शुद्धगोत्रमपि लब्धं यदि मृगापुत्रवत् शरीरं रोगवत् स्यात् तदा सर्वं प्राप्तमप्यप्राप्तं स्यात्, सर्वत्र कार्ये शरीरेणैव सर्वं साध्यते तेन नीरोगशरीरगात्रं दुर्लभम्, तथा च गात्रमपि पुण्येन सुसत्त्वं सुष्ठुवीर्यं सुपराक्रमं सोद्यमम् । श्रीस्थानाङ्गोक्ताष्टस्थानकेषु उद्यमपराक्रमत्वं यथा – **अट्ठहिं ठाणेहिं सम्मं घडियव्वं जतितव्वं परक्कमियव्वं अस्सिं च णं अट्ठे नो पमाएयव्वं भवति, तं जहा असुयाणं धम्माणं सम्मं सुणणयाए अब्भुट्ठेयव्वं भवति । सुआणं धम्माणं उगिण्हयाते अवधारणयाते अब्भुट्ठेयव्वं भवति २ । नवाणं कम्माणं संजमेणं अकरणयाते अब्भुट्ठे ३ । पोराणाणं कम्माणं तवसा विगिंचणयाते विसोहणयाते अब्भु० असंगिहीतस्स संगिन्हणयाए अब्भु० सेहं आयारगोयरं ग्गाहणयाते अब्भु० गिलाणस्स अगिलाते वेयावच्चे करणयाते अब्भु० साहम्मियाणं अहिगरणंसिओप्पन्नंसि, तत्थ अनिस्सितो अपक्खग्गाही मज्झत्थभावभूते कहणु साहम्मिआ अप्पसद्दा अप्पझंझा अप्पतुमंतुमा उवसामणताए अब्भट्ठेअव्वं भवइ ।** (ठाणाङ्ग सू. ६४९) इत्यादिविना सुसत्त्वं न भवति । तथा शरीरसुसत्त्वमपि सुन्दरं वरं प्रधानं तर्हि यदि मनसि तत्त्वं भवति जीवाजीवादिज्ञानं देव-गुरुरूपं वा भवति । तत्त्वेषु भगवन् ! उत्तमत्वं कस्य तत्त्वस्येति प्रश्नः । उत्तरं सम्मस्सेति सम्यक्त्वस्य येन सर्वमपि धर्मानुष्ठानानि प्रमाणीभवन्ति यत उक्तं च –

"दानानि शीलानि तपांसि पूजा, सत्तीर्थयात्रा प्रवरा दया च । सुश्रावकत्व-व्रतपालनं च, सम्यक्त्वपूर्वाणि महाफलानि ।।१।।"

तथा च,

"दंसणभट्ठो भट्ठो, दंसणभट्ठस्स नत्थि निव्वाणं । सिज्झंति चरणरहिया, दंसणरहिआ न सिज्झंति ।।२।।" [संग्रहशतक-१३]

तेन तत् सम्यक्त्वं येन न त्यक्तम् नोज्झितम् । 'हरिव्व भो तेण लहे जिणत्तं' ति स सम्यग्दृष्टिर्हरिवत् कृष्णमहाराजवत् जिनत्वं तीर्थकरत्वं लभते । सो विक्कमस्सेव लहेइ सुहित्तं - स विक्रमराजवत् सुखित्वं सिद्धत्वं लभते सर्वसुखावस्थां सिद्धिं लभते । तत्संबन्धो यथा – पाडलीपुरे हरितिलको राजा, गोरी राजी(ज्ञी), नृपविक्रमपुत्रः द्वात्रिंशल्लक्षणलक्षितगात्रः सुवर्णकान्तिः सौभाग्यनिधिश्चन्द्रमण्डलवत् सकलजनाह्लादकरः यौवनं प्राप्तः । इतश्च पित्रा द्वात्रिंशद्राजवरकन्या एकस्मिन् दिने परिणायितः, भार्यायोग्या द्वात्रिंशत् प्रासादाः कारिताः । तेषां मध्ये नृपविक्रमयोग्यं सप्तभूमधवलगृहं कारितम्, कुमारो यावद् भोगसमर्थः संजातस्तावता अकस्मादेव तस्य शरीरे सर्वाङ्गप्रसृतो गलकुष्ठरोगो जातः. जाता तीव्रशीर्षाक्षिवेदना, उदीर्णा तीव्रदन्तपीडा, जातो गलरोगसमुदयः उच्छूना जिह्वा, स्फुटितं ओष्ठयुगलम्, वहति कर्णयोः पूयप्रवाहः, प्रवृद्धा गरुमाला, जातः हस्तपादयोः स्तम्भः, गलिता अङ्गुल्यः, स्फुटितं नखजालम्, प्रवृद्धा श्वासकासादयो रोगाः, उत्पन्नं कुक्षिशूलं प्रवृद्धं जलोदरम्, प्रवृद्धः सर्वाङ्गे महादाहः, न जायते केनाप्युपायेन गुणः, गता जीविताशा । इतश्च धनञ्जययक्षस्य रोगशान्त्यर्थं महिषशतं कुमारो मानयति । अत्रान्तरे तत्र केवली(लि)समागमो जातः । राजा कुमाररोगहेतुं पप्रच्छ, ज्ञानी स्माह अपरे विदेहे रत्नस्थलपुरे पद्माख्यभूपेन कायोत्सर्गस्थः सुयशोमुनिर्बाणेन हतः सर्वार्थसिद्धिं गतः । सामन्तादिभिः पापोऽयमिति राजा

उत्थापितः । पुत्रस्य राज्यं दत्तम् । राजा एकाकी विदेशे भ्रमति, पुनरन्यं साधुं विलोक्य उपसर्गं कुर्वन् नाहं सुयशा इति भणित्वा तेजोलेश्यादग्धो गतः सप्तमनरके । ततः उद्धृत्य मत्स्यः पुनः सप्तमनरके । एवमेकनरको वारद्वयं तिर्यग्भवान्तरितो भ्रान्त्वा अनन्ते काले च ततो नरकभवं प्राप्य तापसव्रतमाराध्यायं तव पुत्रो जातो भुक्तं बहुकर्मस्तोकैरेव दिनैर्जिनधर्मप्रभावान्नीरोगो भावीति कुमारः श्रुत्वा शुद्धसम्यग्दृष्टिर्जातः नीरोगो जातः । महिषशतयाचनादिना क्षोभितः, बहूपसर्गितोऽपि पीडितोऽपि न क्षुब्धः क्रमेण राजा जातः शुद्धसम्यक्त्ववान्, देवैरपि सम्यक्त्वतो न चाल्यते, समये प्रव्रज्य सिद्धः इति गाथार्थः । तत्सम्यक्त्वमणिं सम्यक्त्वरत्नं प्राप्तमपि नन्दमणिकारेण त्यक्तम्, ततः स वरसम्यक्त्वं हार्यं परिहृत्य स किं जलदर्दुरत्वं मण्डुकत्वं किं न प्राप्तः ? अपि तु प्राप्त एव ।।२१२-२१४।।

जेसिं न भोगाउ मणो विरत्तं, ते बंभदत्तु य एगछत्तं । रज्जं पमुत्तूण य नारयत्तं, पावेइ किं नो बहुमारजुत्तं ।।२१५।।

मूढेण मुत्तूण सुमाणुसत्तं, पत्तं च पावेहिं य नारयत्तं । तं होइ निच्चं बहुदुक्खजुत्तं, चंदो न सूरो न तहिं च मित्तं ।।२१६।।

गइसु सव्वासु जिणेहिमुत्तं, समत्ततत्तं न पुणो चरित्तं । विणा नरत्तेण य नो चरित्तं, विणा चरित्तेण न साहुसुत्तं ।।२१७।।

येषां नराणां भोगाद् उपलक्षणात् कामभोगान्मनोऽन्तःकरणं न विरक्तं न पश्चान्निवर्तितं ते मनुष्याः किं ब्रह्मदत्तवदेकच्छत्रं राज्यं विमुच्य विहाय किं नारकत्वं न प्राप्नोति ? किं विशिष्टं ? बहुस्मरयुक्तं अनेकविधमारपीडायुक्तम् ।।२१५।।

येन मूढेन मनुष्येण मनुष्यत्वं मुक्त्वा पापैर्महापातकैर्नारकत्वं प्राप्तं गृहीतं तन्नारकत्वं तस्य बहुक्लेशयुक्तं द्रव्य-क्षेत्र-काल-भावासुरकृतबहुविधदुःखयुक्तं भवति । तत्र न चन्द्रोदयो न सूर्योदयः, न तत्र कोऽपि मित्रम्, सर्वेऽपि परस्परं द्वेषिणः ।।२१७।। सर्वास्वपि गतिषु जिनैः सम्यक्त्वमुक्तं सर्वगतिषु सम्यग्दृष्टयो भवन्ति न पुनश्चरित्रं सर्वविरतिरूपं चारित्रमिति, तत्तु मनुजगतावेव भवति नान्यत्रेति, विना चारित्रेण साधुसूत्रं न भवति, साधुयोग्यसूत्राणि चारित्रं विना न पाठ्यन्ते यतः –

"तिवासपरियायस्स निगच्छंतस्स आयारो । चउवासपरियायस्स सूअगडं" इत्यादि । **समणोवासगस्स वयजोगस्स उक्कोसं छज्जीवणिआ सुत्तओ पिंडेसणा उण अत्थओ दिज्जइ न सुत्तओ त्ति,** साधुयोग्यं तु उत्कालिकं दशवैकालिकादि । कालिकमनङ्गप्रविष्टं तु उत्तराध्ययनादि कालिकमङ्गप्रविष्टं त्वाचाराङ्गादिकं द्वादशाङ्गीरूपं दीयते ।।२१७।।

सुत्तं वरं तस्स जमत्थजुत्तं, सुत्तत्थओ गीयगुरू सुनेत्तं । चरित्तसुत्तत्थजुओ सुपत्तं, वुत्तं सुपत्तेण सुसत्तखित्तं ।।२१८।।

सुपत्तपोसेण अकम्मखित्तं, खित्तं न तं होइ सुहेहिं रित्तं । रित्तं दुहेहिं सुरसिद्धखित्तं, सिद्धा विणा हुंति न केवलित्तं ।।२१९।।

सिद्धाण रूवं न जियत्तरित्तं, सिद्धाण भेआण भवे विचित्तं । सुत्थित्थसिद्धाइय सासयत्तं असिद्धपुंसाण बहुदुहित्तं ।।२२०।।

तस्य पूर्वोक्तसूत्र-पाठकसाधोः सूत्रं अधीतश्रुतं तद्वरं तत् प्रधानं स्यात् यदर्थयुक्तं स्यात् विनार्थं ज्ञानं सूत्रं निःसारम् । अर्थसिद्धये न भवति । यत उक्तं च –

"अपरिच्छियसुयनियस्स, केवलमभिन्नसुत्तचारिस्स । सव्वुज्जमेण वि कयं, अन्नाणतवे बहुं पडइ ।।१।।" [उप.माला-४१५]

तथा च,

"संवत्सरं वावि परं पमाणं, बीअं च वासं न तहिं वसिज्जा । सुत्तस्स मग्गेण चरिज्ज भिक्खू, सुत्तस्स अत्थो जह आणवेई ।।१।।"

[दशवैका. चू. २ गा. ११]

सूत्र-सूत्रार्थदः सूत्रार्थदानं गीतार्थगुरुस्तु सुनेत्रं भव्यात्मनां शिष्यादीनां नेत्रं तद्दृष्ट्वा एव सर्वे शिष्यादयः प्रवर्तयन्तीति । स सूत्रार्थज्ञगीतार्थश्चारित्रसूत्रार्थयुक्तः ज्ञानक्रियावान् सुपात्रं स्यात् तेन ज्ञानक्रियावता पात्रेण शासने सुसप्तक्षेत्रमुक्तम्, तानि क्षेत्राणि यथा – **'जिणभवण-बिंब-पुत्थय- संघसरूवाइं सत्तखित्ताइं' ति** ।।२१८।।

सुपात्रपोषेण[१] भव्यानामकर्मक्षेत्रं भोगभूमिः स्यादिति अथवा अकर्मक्षेत्रं कृष्यादिकर्मरहितं स्वर्गभवनं भवति अथवा अकर्मक्षेत्रं सर्वकर्मक्लेशमुक्तं सिद्धक्षेत्रमपि स्यात् । यत उक्तं च भगवत्यां – **"समणोवासएणं भंते तहारूवं समणं वा माहणं वा पडिलाभेमाणे किं चयइ, गोयमा ! जीवियं चयति दुच्चयं चयइ दुक्करं करेइ, दुल्लभं लहइ बोहिं बुज्झइ, ततो जाव पच्छा सिज्झइ बुज्झइ सव्वदुक्खाणमंतं करेइ त्ति"** तदकर्मक्षेत्रं त्रिविधमपि सुखेन रिक्तं शून्यः सुखरहितं न स्यात्, रिक्तं दुःखेन सुरसुसिद्धक्षेत्रं समस्तमपि

१. पोषणेन प, छ ।

सिद्धक्षेत्रं दुःखेन रिक्तं भवति ते तत्र सिद्धाः केवलित्वं विना न स्युः ।।२१९।।

सिद्धानां स्वरूपं जीवत्वरिक्तं न स्यात्, कदापि पर्यायपरावर्तत्वं न गच्छति परं सिद्धानां तीर्थसिद्धादिभेदतो विचित्रत्वं तु भवति, शाश्वतत्वं च सदैव विभाव्यते इति मनुष्यसंसारभावनायामनुक्रमेण एवं सिद्धानां सिद्धसुखपर्यन्तं विभाव्यम्, असिद्धनराणां बहुदुःखित्वं विभाव्येति ।।२२०।।

पढमं गब्भगयाणं, मणुआणं दुक्खेन पासिऊं बुद्धो । सिरितिलयसिट्ठिपुत्तो, बाला मुणीसुखमणुपुत्तो ।।२२१।।

तत्तो अबालभावे, बालस्स दुहं च पासिऊं विविहं । बलसार पुहविपालो, निव्विण्णो सो सिवं पत्तो ।।२२२।।

प्रथमगर्भगतमनुजानां[१] नराणामसमानं दुःखं पश्य विलोक्य प्रतिबुद्धः स तिलकश्रेष्ठिसुतः गर्भस्थो गर्भमध्यस्थित एव वैराग्यं प्राप्तः । ततः प्रव्रज्य शिवं गतः, तत्संबन्धो यथा – मगधदेसे कुल्लागसंनिवेसे सिरिदत्तो वणिग् धनवान् जिनधर्मरतः ज्ञातसंसारपरमार्थः, तस्यान्यदा भार्या मृता, वैराग्यात् श्रीदत्तो दीक्षां प्रपद्याधीतसूत्रः दुष्करतपःपरो द्वाविंशतिपरीषहसहनपरः जितेन्द्रियकषायः निःप्रतिकर्मशरीरोऽन्यदा स्मशाने प्रतिमया स्थितः, इतस्तस्य ध्याननिश्चलतां दृष्ट्वा शक्रः प्रशसंस । एकः सुरोऽश्रद्दधानस्तत्रागत्य तं मुनिं अट्टहासकरणेन करि-व्याघ्र-भीमभुजङ्गसर्वतोमुखदवानलज्वालाप्रचण्डपवनधूलीपुत्रवज्रमुखकीटिकावृश्चिकादिभिः प्रतिकूलोपसर्गैः क्षोभयामास परं स न चुक्षोभ । तुष्टो

१. प्रथमं गर्भगतानां मनुजानां-नराणां समान दुःखं प, छ ।

देवः क्षमयित्वा स्वर्गं गतः । श्रीदत्तोऽपि चिरं चारित्रमाराध्य सप्तमस्वर्गं गतः । ततश्च साकेते नगरे श्रीतिलकव्यवहारिणो जैनधर्मरतस्य भार्याया यशोमत्याः कुक्षौ सप्तमस्वर्गतः सन् पुत्रत्वेनोत्पन्नः, अष्टममासे गर्भस्थ एव जनन्या धर्मं शृण्वन्त्या सोऽपि धर्मं शृणोति स्म । तत्र जातिस्मृतिर्जाता । जातमात्रे मया प्रव्रज्या ग्राह्या इत्यभिग्रही जातः । तस्य पद्म इति नाम कृतम्, अष्टवार्षिको जातः कलाकुशलः मातापितरावापृच्छ्य गुरुपार्श्वे प्रव्रज्य शिवं गतः ।।२२१।। तत्संबन्धो यथा – ललितपुरे बलसारो जातः, तस्य ललिताङ्गी राज्ञी, तयोरनपत्ययोर्महद् दुःखम् । अन्यदा निशीथे वेणुवीणारवमधुरं गीतं श्रुत्वा तदनुसारेण वने प्राप्तः प्रेक्षते स्म, तत्र विद्याधरान् जिनालये संगीतं कुर्वन्तो ददर्श, राजा पश्यतीति सः, ते च खेचरा संगीतं कृत्वा निर्गताः, इतश्चापरे खेचराः समायाताः, लग्नं द्वयोरपि युद्धम्, तानि बालानि युद्ध्यमानानि दूरं गतानि । स्थिता एका खेचरी, इतश्च एकः खेचरस्तस्या अपहाराय गतः, तया पुत्कारः कृतः, राजा प्रधावितः। खेचरेण सह युद्धं चक्रे । निहतः खेचरः, भूपोऽपि प्रहारजर्जरो जातः । इतश्च खेचरीभर्ता समायातः, तेन राजा संरोहिण्या औषध्या सज्जीकृतः। वैताढ्ये सुवर्णकेतुखेचरेन्द्रस्य चन्द्रशेखरनामा पुत्रोऽहं वैरिणा समं युद्धे व्यापृते असौ मम भार्या द्विषाऽपहियमाणा त्वया रक्षिता, ततो मनश्चिन्तितदायिनीमौषधिमर्पयित्वा गतः खेचरः, राजा स्वगृहमायातः । औषधिप्रभावात् पुत्रो जातः भुवनसारनामा, एकमासः संजातः, ज्वरशिरोऽर्तिशूलमूत्रोच्चारनिरोधाध्यानदाहशोषकाशश्वासादिरोगैः पीडितः, प्रभूताः कृता उपचाराः, न जातो गुणः, मत्स्य इव स्थले सबालको महार्तिग्रस्तः तद्गलो वेल्लिं कुर्वन् मृतः, राजा महद्दुःखपीडितः, स्वपुत्रस्य जीवितत्वहेतुं ज्ञानिपार्श्वे पृच्छति । ज्ञानी स्माह प्राग्भवे तव पुत्रेण मिथ्यादृशाऽज्ञानतपः कृतम्, बालजीवहत्यादिना हवनादि कृतं च तेनाल्पायुर्जातः इति श्रुत्वा बलसारः प्रव्रज्य शिवं गतः ।। इति बलसारकथा ।।२२२।।

निद्धणगेहे दुक्खं, छुहा पिवाइपीडिआणं च । निच्चं चलं घणेहिं, केसिं दुक्खं दुकालम्मि ।।२२३।।

बहुरोगवाहिदुक्खं, जीवंताणं पि मरणसदुःखं । विक्कमनिवु व्व केसिं, वादगाईणि दुक्खाइ ।।२२४।।

विक्रमनृपसंबन्धस्तु पूर्वमुक्तोऽस्ति ।।२२४-२२५।।

केसिं कुपुत्तदुक्खं, कुपुत्ति-बहुपुत्तिदुक्खं[१] य केसिं च । केसिमपुत्तदुक्खं[२], पुत्तीविहवत्तणे दुक्खं ।।२२५।।

केसिं दरिद्दत्तदुक्खं, कोसंबीवासिसोमिलस्स व । धणमेलणे वि दुक्खं, दुक्खं धणरक्खणे केसिं ।।२२६।।

केसिं तु जणयदुक्खं, कुजणणिदुक्खं च होइ केसिं च । कुवहूदुक्खं केसिं, जह जिणदत्तवहूहि उ ।।२२७।।

केषांचिन्मनुजानां कौशाम्बीवासिसोमिलविप्रवेशस्य इव दरिद्रत्वदुःखम्, यथा कौशाम्बीनगरी तत्र सोमिलो द्विजः, आजन्मदरिद्रः भार्यापुत्रीकादिकुटुम्बबहुलः, अन्यदा धनार्जनाय देशान्तरं गतः, वाणिज्यादिव्यापारिरहितं नभोगं योगिनमद्राक्षीत्, द्विजं चिन्तातुरं पृच्छति, का चिन्ता ? तेनोक्तं दारिद्रचिन्ता । योगी स्माह त्वामीश्वरं करोमि, यदहं कथयामि तत् त्वया कार्यम् । ततो द्वावपि पर्वतनिकुञ्जे गतौ । योगी प्राह[३] एषः स्वर्णरसः शीतवातातपादिसहमानैः शुष्ककन्दमूलफलाशिभिः शनीपद्रपरैर्मील्यते । द्वाभ्यामपि अथ तथैव गृहीतो रसः, भृतं

१. बहुपुत्तिदुक्खिओ प१ छ । २. मपुत्ते दुक्खं प२ । ३. त्वाह प१ छ ।

तुम्बकं निर्गतौ वनात् । योगी स्माह – भो विप्र ! अप्रमत्तेन[१] तुम्बकं[२] धार्यम् । दुक्खेन षण्मासेन मीलितो रसोऽयम् । इति पुनः पुनः कथनेन रुष्टो विप्रः, ढोलितं तुम्बकम्, सागपत्रैरितस्ततः क्षिप्तो रसः गतः सर्वोऽपि, अयमयोग्य इति त्यक्तो विप्रो योगिना, भ्रान्त्वा दरिद्र एव मृतो दुःखपूरितः । केषांचिद्धनमेलने च दुक्खम्, यत उक्तं –

"अर्थानामर्जने दुःखमर्जितानां च रक्षणे ।।२२३, २२६।।" इति, जिनदत्तवधूसंबन्धो यथा –

श्रावस्त्यां जिनदत्तः श्रावक[३]: समृद्धः, चत्वारः पुत्राः पित्रा परिणायिताः, गृहचिन्ताः सर्वाः पुत्राः कुर्वन्ति । जिनदत्तस्य मित्रं विमलः । एकदा जिनदत्तेन मित्रवारितेनापि लक्ष्मीः सर्वापि पुत्रायत्ता कृता, पुत्रास्तु व्यवसायव्यग्राः स्वस्वभार्याणां कथयन्ति जिनदत्तस्य शुश्रूषा कार्या । ताभिः प्रतिपन्नः । कृता कियत्कालं शुश्रूषा क्रमेण अनादरा जाताः । सीदति जिनदत्तः, सुतेभ्यः स्वदुःखतां कथयति । तेऽपि यावद् भार्याणां कथयन्ति पितृसीदनं तावत् ताः समुदायेन कलकलं कुर्वाणा वदन्ति । एष वृद्धो विकलोऽस्माकं कृतमपि विपरीतं मन्यते । रतिं न लभते, ततः पुत्रैरालोच्य प्रच्छन्नं एकः पुरुषो निरूपितः सम्यग् विलोकनाय, ताभिर्धूर्ताभिर्ज्ञातः, तद्दृष्टौ सविशेषां सारां कुर्वन्ति, ततः सोऽपि तेषां वक्ति एताः कुर्वन्ति भक्तिम्, सुतैः पृष्टो वृद्धस्तथैव वधूनामवज्ञां कथयति, सुतैश्चिन्तितं वृद्धत्वविकलोऽयम्। अन्यदा विमलमित्रस्य वृद्धेन तत्स्वरूपं कथितं विमलेनोक्तं भद्र ! प्रागपि मया त्वं वारितः लक्ष्मीं पुत्रायत्तां[४] मा कुरु, 'गते जले कः खलु

१. अप्रमत्तकेन प, छ । २. तुम्बं प, । ३. जिनदत्तश्रावकः प, छ । ४. लक्ष्मीः पुत्रायत्ता प, छ ।

सेतुबन्धः' संप्रति किं क्रियते ? इति वचनात् तथाप्युपायं करिष्यामि येन तव शरीरसुखं भविष्यति न पुनर्धर्मव्ययादिकम् । जिनदत्तः स्माह- एतावताऽपि भव्यम् । ततो मित्रेण गृहे गत्वा टीकरीटङ्काकारां कृत्वा ग्रन्थौ बध्वा आनीय जिनदत्तायार्पिता । जिनदत्तोऽपि वृद्धवध्वाः कथयति यन्मया लोभातिरेकेणेदं टङ्कसहस्रं सुतानां नार्पितमत्र खट्वातले निधीयमानमस्ति, मम मरणानन्तरे त्वया ग्राह्यम् । सा हृष्टा अत्यादरेण भक्तिं कुरुते, [1]एवमपरासामपि रहस्तावत् तथैव प्रोवाच । ता अपि भक्ता जाताः । जातः श्रेष्ठी सुखी । अन्यदा पञ्चत्वं प्राप्तः, सुतैः स्मशानं नीतः । गृहे स्नानवेलायां ज्येष्ठा वधू ज्वरमिषं कृत्वा गृहमध्ये स्थिता । अपरा स्नानं कुरुते, ज्येष्ठा भूमिस्थनिधनग्रन्थिं गृह्णाति, तावदपरा अप्यागता, मिथः कलहायते, धनकृते लग्नाः सर्वा अपि धनग्रन्थौ आकर्षन्ति परस्परं स्वस्वाभिमुखं त्रूटितो ग्रन्थिः, दृष्ट्वा टीकरीटङ्का अहो वञ्चिता जाता विलक्षा वदन्ति अहो ! अस्मद्भक्तिसदृशं कृतं वधूदुःखितेन श्वसुरेणेति ।।२२३-२२७।।

केसिं बहुरिणदुक्खं, केसिं रायाइदंडभयदुक्खं । परदलभयभमणदुहं, कुवासदुक्खं च केसिं च।।२२८।।
कुपुरिससेवादुक्खं, कुडुंबकलहेण केसिं दुक्खं च । दुक्खं विदेसमरणं, कुमित्तओ दायदुक्खं च ।।२२९।।
केसिं कुवयणदुक्खं, केसिं दुक्खं कुडुंबविरहम्मि । केसिं कलंकदुक्खं, अवजसदुक्खं जसत्थीणं ।।२३०।।
अंधत्तबहिरत्ते केसिं, दुक्खं च उअरभरणम्मि । हीणमिंदिय[2]दुक्खं, केसिं दुक्खं अभोगम्मि ।।२३१।।

१. एवमपरामपि प२। २. हीणिगिंदिय प२ छ।

वंझत्तणम्मि दुक्खं, घरणि अभावम्मि केसिं दुक्खं च । केसिं जराइदुक्खं, अणिट्ठसंजोगदुक्खं च ।।२३२।।

आसाभंगो दुक्खं, दुक्काल धणहाणिरक्खणे दुक्खं च । केसिमवमाणदुक्खं, दुक्खं तह बंदिपडिआणं ।।२३३।।

कारागारे दुक्खं, केसिं दासत्तणम्मि दुक्खं च । परघरसायणदुक्खं, परवसदुक्खं च[१] केसिं पि ।।२३४।।

गुरूणो कुसीसदुक्खं, तहा सुसीसाण गुरुदुक्खं च । एसिं दुक्खाण पुण, सुक्खं संतोसिमणुआणं ।।२३५।।

'गुरूणो' आचार्यस्य कुशिष्याणां दुःखं गर्गाचार्यादिरिव सुशिष्याणां कुगुरुदुःखम्, शैलकाचार्यशिष्याणामिव चण्डरुद्राचार्य-शिष्यस्येव, एषां पूर्वोक्तदुःखानां पुनः संतोषिणां संतोषवतां मनुष्याणां सुखं स्यात्, संतोषित्वेन तद्दुःखत्वेन ते मनुजा न विन्दन्ति ।।२२८-२३५।।

मणुआणं दुक्खाइं, चिंतिय एवं च पुव्वपावेहिं । सुहिआणं य सुक्खाइं, चिंतिज्जइ पुव्वपुण्णेहिं ।।२३६।।

एवं मनुजगतिभावनायां मनुजानां पूर्वोक्तदुःखानि पूर्वकृतपापैरेव भवन्तीति विचिन्त्य सुखितानां चानेकधा सुखानि पूर्वकृतपुण्यैः दृश्यन्ते इति चिन्त्यते इति भाव्यते, इह मनुष्यत्वबन्धहेतवो यथा –

"सरलो य पगइभद्दो, विणयपरो विगयमत्सरो सदओ । मणुआऊअं निबंधइ, जह धरणिधरो सुनंदो अ ।।१।।" [भव.भा. ३२५]

तत्संबन्धो यथा – श्रीपुरे धरणीधरसुनन्दौ गृहपती प्रकृतिभद्रौ विनीतौ । अन्यदा भिल्लैरुपद्रूयमाणं साधुं मोचितवन्तौ दयया मृत्वा

१. दुक्खं पि प्र छ।

वीरपुरे वज्रसिंहभूपस्य रुक्मिणीकुक्षौ पुत्रत्वेनोत्पन्नौ । तस्याः सामन्तरुधिरपूर्णकुण्डस्नानदोहदो जातः, अलक्तरसछद्मना स पूरितः, तत्कुण्डस्नानोत्तीर्णा देवी भारण्डपक्षिणा मांसबुद्ध्या अपहृता, अरण्ये नीता तत्र तापसोटजे स्थिता सुतयुग्मं प्रसूता । एकः सिंहनामा अपरो सिन्धुराभिधः । जातौ प्रौढौ । हस्तिव्याघ्रादिभिः समं क्रीडतः । अन्यदा वशीकृतश्वेतहस्तिस्कन्धारूढौ तौ पल्लीपतिना रुद्धं कञ्चित् सार्थवाहं विमोच्य पल्लीपतिं हत्वा स्वयं तत्र स्वामिनौ जातौ । जननीसहितौ तत्र राज्यं कुरुतः । अन्यदा तत्प्रसिद्धिं ज्ञात्वा वज्रसिंहः श्वेतगजं दूतप्रेषणेन याचते । तौ नार्पयतः । वज्रसिंहः सर्वबलेन तत्रागात् । तावपि युद्धाय सम्मुखं चलतः माता वारयति, वत्सौ ! युवयोरसौ पिता, सर्वं स्वरूपं प्रोक्तम् । ततः सविशेषं सम्मुखं युद्धाय गतौ, राजानं जित्वा पदयोः पतितौ जातः सर्वेषां हर्षः । राजा तयोः राज्यं दत्त्वा प्रव्रजितः, तावेकछत्रं राज्यं कृत्वा श्रीगुरुपार्श्वे प्रव्रज्य तपः कृत्वा सिद्धौ ।।२३६।।

इति संक्षेपतो मनुष्यगतिभावना । अथ देवगतिभावना -

देवा वि हुंति जीवा, सरागसंजमसुदेसविरईहिं । बालतवकामनिज्जर-सुदिट्ठिजीवेहिं जियलोए ।।२३७।।

केचिज्जीवा देवा अपि भवन्ति, कै र्हेतुभिः ? सरागसंयमसुदेशविरतिभिः, तथा बालतपोऽकामनिर्जरादिभिर्हेतुभिश्च । यत उक्तं च-

"छउमत्थसंजमेणं, देसचरित्तेणऽकामनिज्जरया । बालतवो कम्मेण य, जीवा वच्चंति दियलोए ।।१।।"

"सेयबिआनरनाहो, सेट्ठी य धणंजओ विसालाए । जंबू तामलिपमुहा, कमेण इत्थ उदाहरणा ।।२।।" [भवभावना-३४६-३४७]

श्वेताम्बिकायां नगर्यां विजयो राजा, सागरमित्रः श्रेष्ठी, स एकदा जलधौ धनार्जनाय पोतेन व्रजन् मार्गे क्वापि शून्यद्वीपे जलग्रहणार्थ-मुत्तीर्णस्तत्र निरूपमरूपं बालकं विलोक्य तं गृहीतवान् स्वपुरे क्रमेण आयातः । तस्य बालस्य सगरदत्त इति नाम कृतम्, जातोऽष्टवार्षिकः, राजपुत्रोचितक्रीडया क्रीडति । शिक्षिताः सर्वाः धनुर्वेदादिकाः कलाः । जातस्तस्यापि सुयशा नृपपुत्रो मित्रम् । तेन सह राजसभायां याति, राजाऽपि तस्य कलाकौशलगुणांश्च वीक्ष्य तस्य गुणसागर नाम दत्ते । नृपसुतायां रत्नवत्यास्तत्र कुमारेऽनुरागो जातः । स्थानेऽनुरागो मत्पुत्र्या इति राजाऽपि हृष्टः । परं तस्य कुलगोत्राद्यपरिज्ञानिद्वेषिणः [ज्ञानादन्वेषणः]। इतश्च केनापि अपहृत्य गुणसागरोऽम्बुधौ क्षिप्तः, रत्नवतीं च क्वापि पर्वते मुक्ता । गुणसागरोऽम्बुधौ पतन् दैवयोगाद् धरणेन्द्रेणावलोक्य गृहीतः, भणितश्च भद्र ! रोहितकपुरे धरणो राजा धनदत्तो मन्त्री । अन्यदा अन्यायेन नन्दव्यवहारी राज्ञा दण्डितः, धनापहाराद् ग्रहिलो जातः नन्दः स्वस्थीभूतस्तापसव्रतं गृहीत्वा सौधर्मे देवो जातः । पूर्ववैरेण तेन देवेन स बालो अपहृत्य सागरे द्वीपः (तत्र मुक्तः) त्वं सागरश्रेष्ठिना प्राप्तः, पुनरपि देवेन संप्रति अत्र क्षिप्तः, रत्नवती तु पर्वते । तत्र सा विद्या-धरेणैकेन प्रार्थ्यमानाऽपि त्वदेकचित्ता सा तं नेच्छति, इत्युक्त्वा धरणेन्द्रेण पूर्वभवस्नेहेन तस्मै पठितसिद्धा विद्या दत्ता । तेन विद्याबलेन विमानं कृत्वा आरुह्य च तत्र पर्वते खेचरं जित्वा रत्नवतीयुतः स्वपुरे आगत्य रत्नवती परिणीता । इतश्च केवली तत्रायातः, राज्ञा विजयेन गुणसागरस्य कुलादिकं केवली पृष्टः, यथा धरणेन्द्रेणोक्तं तथा भगवतापि च । राजा हृष्टो गुणसागराय राज्यं दत्त्वा सपुत्रस्तपस्यां ललौ, ज्ञानि-प्रोक्तं श्रुत्वा अभिचन्द्रेणापि स्वराज्यं तस्मै दत्त्वा व्रतमात्तम् । गुणसागरो राज्यद्वयं भुङ्क्ते । अन्यदा वान्तमाहारं भुञ्जानं स्वानं दृष्ट्वा चिन्तितं राज्ञा ।

१. द्रव्यव्यवहारी प्र॰ छ। २. नन्दनः सुस्थीभूतः प्र॰ छ।

"वंताइं धीरेहिं रज्जाहिं, हरिसिओ य भुंजामि । अउरिअजं एरिसं, भणंति सुणय चरिअं पि ।।१।।"

"ता इण्हि पिज्ज मग्गं, तणं पवज्जामि धीरपुरिसाणं । इहा निरत्थय चिय, भमिहामि भवं महाघोरं ।।२।।"

ततः पुत्रयोः राज्यं दत्त्वा प्रवव्राज, अधीतसूत्रार्थः एकाकिविहारप्रतिमाप्रपन्नः, दृष्ट्वा तेन सुरेण वैरिणा प्रतिमास्थस्य प्रारब्धा रौद्रोपसर्गाः, ऋषिस्तु उपशमश्रेणिमारूढः एकादशगुणस्थानं प्राप्तः, मृत्वा अनुत्तरविमानदेवो जातः । विदेहे सिद्धो भावी । इति विजयराजकथा ।

अथ देशचारित्रेणापि अनेके श्राद्धाः देवत्वं प्राप्ताः, तेषां संबन्धाः स्युः । अत्र तु धनञ्जयसंबन्धो यथा –

कुणालायां नतनयश्रेष्ठी, चत्वारः पुत्राः, बलीयान् धनञ्जयनामा विनयादिगुणवान्, अध्यापकपार्श्वाद्[१] योगिनी-शाकिनी-भूतादिनिग्रहकारिणीं विद्यां अधीतवान् । अन्यदा यौवनं प्राप्तः पुरमध्ये भ्रमन् द्युतपार्श्वे गतः, द्रम्भपञ्चशतीं हारयित्वा गृहं गतः । पित्रा निर्भत्स्य वस्त्रालङ्कारादि उद्दाल्य कोपीनवस्त्रः कृतः, हसितो भ्रातृजायादिभिः स्वार्जितान्येव वस्त्राणि परिधास्ये नान्यानि इति प्रतिज्ञातवान् निर्गतो गेहात् वल्कलवसनः फलाहारः भ्रमन् विशालायां पुर्यामासन्ने[२] रात्रौ वृक्षकोटरे प्रविश्य स्थितः । इतश्च षोडशस्त्रियः कर्तिकाकरा वृक्षादवतीर्य भूमौ प्राप्ताः, एकः शुभाकारः सुरूपस्तरुणः पुरुषो निबद्धवायुगस्तत्रानीतस्ताभिः, वदन्ति तं प्रति अरे इष्टदेवं संस्मरेति, धनञ्जयः पश्यति,

१. पार्श्वे प्र० । २. विशालाया पुर्या आसन्ने प्र० ।

वृक्षकोटरात् कृपया निर्गत्य योगिनीनिग्रहकरीं विद्यां स्मृत्वा सर्वा योगिन्यः खरीरूपाः कृताः, मोचितः स पुरुषः स्माह भद्र ! विशालापुरे शस्यारिकेसरिनृपेशस्य सुतोऽहं इन्द्रनामा एताभिर्योगिनीभिर्नीतस्त्वया[१] मोचितोऽहम् । ततस्ताः सर्वाः खरीः हक्कयित्वा नृपसुतेन सार्धं धनञ्जयो विशालायां गतः, प्रतोलीद्वारे रासभीवाणिज्यकाराणां समर्पयति रासभीः खरीमूल्येन, इत इन्द्रकुमारपुत्रमरणशोकाक्रान्तं स्वकुटुम्बं स्वदर्शनेन यथास्थितस्वरूपकथनेन प्रत्यायिता सर्वे नृपादयः,धनञ्जयेन कृपया योगिन्यो मुक्ताः, गताः देशान्तरम् । इन्द्रो धनञ्जयसंसर्गात् साधुसमीपे धर्मं श्रुत्वा श्रावकत्वमापन्नः, द्वावपि धर्मं कुरुतः, इन्द्रो राजा जातः, धनञ्जयो मन्त्री जातः । प्रभूतपरिग्रहारम्भादीननिच्छन्नपि धनञ्जयः श्राद्धधर्ममाराध्य अच्युते द्वाविंशतिसागरायुर्देवो जातः ।। इति धनञ्जयश्रेष्ठिकथा ।।

अथाकामनिर्जरया देवत्वप्राप्तिः – मथुरायां जितशत्रुराजा, तस्य कालीनाम्नी पट्टराज्ञी, तत्पुत्रः कालकुमारनामा सर्वान्याय-कुलगृहम् । यथा –

"निच्चं हरइ धणाइं, जणस्स पाडइ घरे सुखित्ताइं । लुंटइ वट्टासुं जाणं, धारइ बंदेसु गहेउणं ।।१।।

विद्धंसइ नारिजणं, बला वि गिण्हेइ सारवत्थूणि । कालोचियपञ्चक्खो, अहिव्व वङ्कजणस्स ।।२।।"

अन्यदा स्वगृहस्थो वनस्थजम्बूकशब्दं श्रुत्वा स्वजनैः जम्बूकं बद्ध्वा आनाय्य कसाभिस्ताडयति, खिं खिं कुर्वाणो जम्बूको श्रुत्वा

१. एताभ्य योगिनीभ्यस्त्वया प्र।

अकामनिर्जरया देवो जातः, इतश्च कुमारस्यान्यायाज्ञनैः राज्ञे ज्ञापिताः, राज्ञीदाक्षिण्याद् राज्ञा किमपि न कथ्यते, तद्व्यतिकरं ज्ञात्वा सविशेषमुपाद्रुवत् जनान् । अन्यदा साधूनामुपाश्रये गतो भीताः साधवः व्याख्यानं मुक्त्वा मौनेन स्थिताः । ततः कालो धर्मं पृच्छति, गुरवः कथयन्ति –

"नरएसु महारंभेण, तह महापरिग्गहेणा वि । पंचिंदियहिंसाए, कुणिमाहारेण वच्चंति ।।१।।"

"मायासीलत्तेणं, कूडतुला-कूडमाणकरणेणं । कूडक्कयाइ अलिए, जंति सीयालाइ तिरिएसुं ।।२।।"

"अंधा बहिरा टुंटा, परसंतावेण हुंति मणुएसुं । देवेसु वि दोहग्गं, किच्छिसिअत्ताइ पाविंति ।।३।।"

"इय पावकारिणो परिभमंति पुणरुत्तमेव भवचक्के । दुक्खेहिं अणंतेहिं, तिव्वेहिं सया न मुंचंति ।।४।।"

इति गुरुभाषितं श्रुत्वा कालो विमर्शयति, स्तोकान्येव गुरुभिः पापस्थानानि उक्तानि, मया तु बहूनि कृतानि तेनावश्यं मया नरके गन्तव्यमिति संवेगमापन्नः, तपस्यार्थं पितरमापृच्छति – अहो ! शृङ्गेण शृङ्खलोत्तीर्णा निर्गच्छतु एष रोग इति । पित्रा भृशमुत्साहितः प्रवव्राज । गीतार्थो जातः, हरिषा रोगार्तोऽपि भेषजं न कुरुते, निःप्रतिकर्मशरीरः एकाकिविहारं प्रपन्नः मुग्गिलगिरौ प्राप्तः, तत्र तस्य भगिनीपतिः वन्दनाय देव्या सह गतः । तत्र तस्य रोगो ज्ञातः, कथमपि वैद्यं पृष्ट्वा तदपहं चूर्णं भक्तमिश्रं दत्तम् । स न वेत्ति । पतितानि

अत्रांसीनि । नीरोगो निर्विण्णो भक्तं प्रत्याख्याति । जम्बूकदेवेन शृगालीभूय वैरिणा कदर्थितः सम्यगधिसह्य देवो जातः ।। इति अकामनिर्जरयां जम्बूको देवः ।।२३७।।

बालतपस्विविषये तामलिसंबन्धः प्रसिद्धः । अथ देवगतिविशेषभावना यथा –

के वि वरमणुयतिरिया, सुहपरिणामा य हुंति मरिऊणं । चउहा देवविसेसा, समुच्छिमया वि केवि सुरा ।।२३८।।

व्याख्या – केचिद् वराः प्रधानाः मनुष्यास्तिर्यञ्चश्च शुभाध्यवसायाः, शुभपरिणामविशेषाश्च मृत्वा चतुर्विधाः देवाः भवन्ति । सम्मूर्च्छनजाः केचित् तिर्यञ्चः सुरा भवन्तीति । यत उक्तं च –

"नरपंचिंदियतिरियाणुप्पत्ती सुरभवे पज्जत्ताणं । अज्झवसा तेसिं, गइतारतम्मं तु ।।१।।"

"नर-तिरिय असंखजीवा, सव्वे नियमेण जंति देवेसु । निय आऊय समहीणा ऊएसु ईसाण अंतेसु ।।२।।'

"जंति समुच्छिमतिरिया, भवणवणेसुं न जोइमाइसु । जं तेसिं उववाओ, पलिआ संखंस आऊसु ।।३।।२३८।।"[बृहत्संग्र. १४९-१५१]

जइ समुच्छिमा वि तिरिया, के वि सुरा हुंति ते न जोइसिया । बालतवस्सि सरोसा, असुरा दुहमरणवंतरिआ ।।२३९।।

यदि कदाचित् संमूर्च्छिमास्तिर्यञ्चः सुरा देवा भवन्ति तर्हि भवनपति-व्यन्तरदेवा भवन्ति न तु ज्योतिष्काः, तथा बालतपस्विनोऽपि सदोषा रोषादिसदोषाः, तेऽपि भवनपतिषु न ज्योतिष्केषु उत्पद्यन्ते । यत उक्तं च –

"बालतवे पडिबुद्धा, उक्कडरोसा तवेण गारविआ । वेरेण पडिबद्धा, मरिऊं असुरेसु जायंति ।।१।।" [बृहत्संग्र. १५२]

तथा **'दुहमरणवंतरिआ'** त्ति – दुःखमरणानि शूलारोपण-काष्ठभक्षण-कमलपूजा-जलपात-विषभक्षणाद्यात्मघातादि दुःखमरणात् शुभभावविशेषा ये मरन्ति ते व्यन्तरा भवन्ति । यत उक्तं च –

"रज्जूगाह-विसभक्खण-जलणपवेस तिन्ह छहदुहओ । गिसिलवडणाउ मया, सुहभावा हुंति वंतरिआ ।।१।।"

"तावसगा जोइसिया, चरगपरिव्वा य बंभलोगो जा । जा सहसारो पंचिंदि-तिरियजा अच्चुआ सड्ढा।।२।।" ।।२३९।। **[बृहत्संग्र. १५३-१५४]**

गेविज्जसुरा हुंति य, मुणिलिंगधारा वि के वि मिच्छत्ती । सव्वट्ठसुरा मुणिणो, जहन्नसोहम्मसुरसट्ठा ।।२४०।।"

व्याख्या – ग्रैवेयकसुराः ग्रैवेयकविमानदेवाः केऽपि मुनिवेषधरा मिथ्यादृष्टयो भवन्ति उत्कर्षतः स्युः । यतः उक्तं च –

"जइ लिंगमिच्छदिट्ठी, गेविज्जा जाव जंति उक्कोसं । पयमवि असद्दहंतो, सुत्तत्थं मिच्छदिट्ठिओ ।।१।।" [बृहत्संग्र-१५५]

तत्थ सुत्तं गणहररइयं ति, यावत्. तथा **'सव्वट्ठ सुरा मुणिणोत्ति** मुनयो केचित् मोक्षगमनाभावे सति सरागसंयमाश्छद्मस्थवीतरागाः उत्कृष्टतः सवार्थसिद्धे सुरा भवन्ति, यतः उक्तं –

"छउमत्थसंजयाणं, उववाउक्कमओ य सव्वट्ठे । तेसिं संठाणं पुण, जहन्नओ होइ सोहम्मे ।।१।।"

"लंतंमिव चउदपुव्विस्स, तावसाइण वंतरेसु तहा । एसो उववायविही, नियकिरिय ठियाण सव्वो वि ।।१।।२४०।। [बृहत्संग्र. १५७-१५८]

अथ किञ्चिद् देवगतितारतम्यं चिन्त्यं –

इय देवभावणाए, देवा मणवंछियं पि जं सुक्खं । भुंजंति तंपि मुणिणा, चिंतिज्जइ दुक्खयं अंते ।।२४१।।"

अथ देवसंसारभावनायां मुनिना इति चिन्त्यते । इति किं ? देवा विबुधा यन्मनोवाञ्छितं सुखं भुञ्जन्ति तदपि अन्ते पर्यवसाने च्यवनकाले दुःखदं स्यात् । यत उक्तं –

"देवा वि देवलोए, दिव्वाभरणाणुरंजियसरीरा । जे परिवडंति तत्तो, तं दुक्खं दारुणं तेसिं ।।१।।"

तथा –

"तं सुरविमाणविहवं, चिंतिय चवणं च देवलोगाओ । अइबलियं चिय जं, न वि फुट्टइ सयसक्करं हिययं ।।२।।२४१।।" [उप.माला. २८५-२८६]

रयणविमाणावासे तेसिं सुक्खाणमाणममरो वि । न मुणइ वरिससएणं वि, जीहालक्खं पि धरमाणो ।।२४२।।"

"सुरा सुरियाभाइ सम्मत्तजुत्ता, सुरा केवि मिच्छत्तदिट्ठीण रत्ता । सया कामभोगेसु दिव्वेसु सत्ता, सुणंतीह धम्मं परं नो विरत्ता ।।१।।"

सुरा देवा सूर्याभादिदेववत्, केचित् तत्र देवलोके सम्यक्त्वयुक्ताः सन्ति इति भाव्यते । केचिच्च मिथ्यात्वं कुलिङ्गिकुमति

यवनगोशालकमतनिह्नवादिमिथ्यात्विवासिता मिथ्यात्विभक्ताः, तेषां भक्तत्वात् तेपि मिथ्यात्विनः, केचित् सदा दिव्यकामभोगेषु आसक्तास्तिष्ठन्ति । तथा जिनादीन् न मनन्ति, धर्मं शृण्वन्ति परं नो विरक्ताः कामभोगतो नो विरता भवन्तीति ।।२४२।।

तेसिं पि चवणकाले, पारावार व्व होइ दुःखाणं । इय संसारो णेओ, बुहेहिं वरभावणा सारो ।।२४३।।"

इति देवगतिभावना संसारभावनाऽपि च ।।२४३।। अथ अशुचित्वं –

असुइमुत्तमलाइयभायणं, तणुमिमं समभक्खरसायणं ।

रुहिरमंसवसाकिमिमंदिरं, दीपकम् सयलपातगकारं (दुरियकारकं) **कुमित्तयं ।।२४४।।**

इदं शरीरं शुण्डाघटवदशुचिः । यतः –

"अभ्यक्तोऽपि विलिप्तोऽपि, धौतोऽपि घटकोटिभिः । न याति [1]शुद्धतां कायः, शुण्डाघट इवाशुचिः ।।१।।"

पुनः किंविशिष्टं ? मूत्रमलादिभाजनम्, यतः –

"अमेध्यपूर्णकृमिजालसंकुले, स्वभावदुर्गन्धे शुचित्ववर्जिते । कडे(ले)वरे मूत्र-पुरीषभाजने, रमन्ति मूढा विरमन्ति पण्डिताः ।।१।।"

१. शुचितां प, छ।

तथा भूषितमपि शृङ्गाराभरणादिभिः शुभपदार्थैरलंकृतमपि स्वभावेनासुन्दरं शुक्रशोणितादिभिरुत्पन्नत्वाद् मूलत एवासुन्दरम्, पुनः किंविशिष्टं ? रुधिरमांसवसाकृमिकोटिभिः संकुलं दुरियकारकं दुरितानि सर्वपापानि कारयतीति दुरितकारकं प्राणिभिर्यत् पापं क्रियते तत् प्रायः शरीरार्थमेव क्रियते कुमित्रवदन्ते विघटति वा । यतः –

"नित्यामित्रमसंदेहं, स्वजनाः स्वप्नसंनिभाः । नमस्कारसमोऽन्यो, न धर्मः परमबान्धवः ।।२४४।।

तथा –

दुग्गंधपुण्णे य सजीवभिन्ने, सुगंधसुस्सा पयत्थदोसे । देहम्मि धीरा न रमंति, तम्हा सणंकुमारु व्व य लिंति सारं ।।२४५।।

इदं शरीरं धीरा स्वजीवाद् भिन्नमेव भावयन्ति । कथं ? अस्मिन् दुर्गन्धपूर्णे जीवतो भिन्ने सर्वसुगन्धसुस्वादपदार्थानां दोषो विनाशो यस्मात् । यतो ये पदार्थाः सुगन्धसुस्वादा अपि शरीरलग्नास्ते विनष्टा एव, यतः उक्तं –

"इदं शरीरं कर्पूरकस्तूरीप्रभृतीन्यपि । दूषयत्येव पाथोदपयांस्यूखरभूरिव ।।१।।"

एवंविधे देहे शरीरे धीरा मुनयो न रमन्तीति । तस्मात् कारणात् तस्मात् शरीराद् वा सनत्कुमारचक्रिवत् सारमुद्धरन्ति । यतः –

"दानं वित्तान्नृतं वाचः कीर्तिधर्मौ तथाऽऽयुषः । परोपकरणं कायादसारात् सारमुद्धरेत् ।।१।।" [उपदेशसार-८]

कदम्बविप्रवत् ।

काकन्द्यां सोमशर्मा विप्रः, पुत्रः कदम्बः अतिशौचवादी छायामात्रान्यत्स्पर्शे सति सचेलः एव स्नानकारी, पानीयपिशाच इति लोकप्रसिद्धः । वस्त्राञ्चलस्थगितवस्त्रनासिकः सर्वत्र हुं हु इति कुर्वन् वयमति [व्रजति] ततो यौवने गलत्कुष्टप्रभृतिभी रोगैर्ग्रस्तः, नष्टः समस्तशौचवादः । अन्यदा निःप्रतिकर्मशरीरान् ब्रह्मचारिणो मुनीन् विलोक्य संवेगमापन्नः अहो ! एते एव शुचयः ये ब्रह्मचारिणः ममापि यदि रोगशान्तिः स्यात् तदाऽहमीदृशो भवामि । क्रमादुपशान्तरोगोऽयं श्रावको जातः । स्वकुटुम्बेऽपि तेन धर्म आरोपितः । सर्वबाह्यवस्तु धनकनकादिकं धर्मोपकारकं कृत्वा दीक्षाग्रहणेन धर्मोपकारकं देहमपि त्यक्त्वा शिवपदं प्राप ।। इति कदम्बकविप्रकथा अशुचित्वे । इति अशुचिभावना ।।२४५।।

आसवंति हु कम्मं, सुहासुहं कायवायमणजोगअंबुआ । आसवा इह तेण य, कित्तिया ते वि हुंति सुहा असुहा तहा ।।२४६।।

काय-वाग्-मनोयोगा एव अम्बुदा मेघाः, काय-वाग्-मनोयोग अम्बु ददाति अम्बुदाः, जीववर्गभूतले स्रवन्ति शुभाशुभकर्मरूपं जलं वर्षन्तीति आसमन्तात् स्रवन्तीति आश्रवास्तेन हेतुः प्रकीर्तिताः, तेऽपि चाश्रवा शुभा अशुभा वा भवन्तीति ।।२४६।।

भविणो हियय दयाइगं, सुहकम्मं पसवेइ जोगिणो । हिंसाइकलेसदूसियं असुहं पसवेइ कुमाणसं ।।२४७।। मागहिआ ।

व्याख्या – भविनो जीवस्य हृदयं चित्तं शुभं कर्म सूते प्रस्रवति । कस्य जीवस्य चित्तं ? योगिनः साधोः, किं विशिष्टं शुभं कर्म प्रस्रवति ? दयादिकं शुभपरिणामं गच्छतीति दयादिगं जीवयतनादिधर्मव्यापारगतं सत्, च पुनः हिंसालीकादिक्लेशादिदूषितं मनो हृदयं कु-अशुभं कर्म प्रस्रवति जनयति, कुमानसं कुचित्तं कुकर्मबन्धं दत्ते, यत उक्तं –

"जे जं सव्वजीवा, आसवइ जेण जेण भावेण । सो तम्मि तम्मि समये, सुहासुहं बंधए कम्मं ।।१।।"

इति मागधिकार्थः । तत्र मागधिकालक्षणं च – विषमपादयोः प्रथम-तृतीयपादयोश्चतुर्मात्रारूपटगणद्वयम्, लघुर्गुरुश्च य समपादयोः षण्मात्रारूप एकपगणः, चतुर्मात्रारूप एकटगणः, लघुर्गुरुश्च अन्ते इति मागधिकालक्षणम् । इति मनोयोगः ।।२४७।। अथ काययोगश्च -

देहो वि सुगुत्तमिहिओ, सुहकम्मं पसवेइ जोगिणो । अजिओ देहो दुरासवो, इय वीरजिणो कहइ[१] कासवो[२] ।।२४८।।

व्याख्या – काश्यपः काश्यपगोत्रोत्पन्नो वीरजिन इति कथयति इति किं, देहोऽपि सुगुप्तेन्द्रियः सुष्ठु गुप्तानि कूर्मवत्, गोपितानीन्द्रियाणि यत्र सुगुप्तेन्द्रियो देहः शरीरं शुभकर्म प्रसवति, यतः उक्तं च –

शरीरेण सगुप्तेन, शरीरी चिनुते शुभम् । सततारम्भिणा जन्तुघातेनाशुभं च पुनः ।।१।।"

१. कामदो प्र० छ । २. वीरजिनः कथयति प्र० छ।

तथा अजितो देहो यत्नरहितो देहो दुराश्रवः स्यादिति दुःखमाश्रवतीति दुराश्रवः स्यादिति ।।२४८।। तथा च –

सुसोतिंदिएण अजिया भद्दा, नयणिंदिएण इब्भसुओ । गंधप्पिओ य घाणे, अजिओ रसणेण सोदासो ।।२४९।।

सुकुमारिया य फासे, सुजओ नियमम्मि वंकचूलो अ । अजिओ भीमो वयणे, बलदेव जितिंदिओ य उ[१] ।।२५०।।

श्रोत्रेन्द्रियेण अजिता भद्रा अजिता आसीत् । नयनेन्द्रियेण इभ्यसुतोऽजितेन्द्रिय आसीत्, गन्धप्रियश्च घ्राणेऽजितेन्द्रियः, अजितो रसनेन्द्रियेन सोदासः, सुकुमारिका स्पर्शनेन्द्रियविषये अजिता आसीत् । **सुजओ नियमंमि** ति वङ्कचूलो नियमविषये सुजितो यत्नवान् आसीत्, भीमश्च वचने अजितो यत्नवान् आसीत् । सर्वजितेन्द्रियो बलदेवमुनिरासीदिति यः भाव्यते इति ।।२४९-२५०।। अथ च योगाश्रवश्च-

वयणं पि जिणाण भूसिअं, जिणकम्मं पसवेइ सूरिणो । असुहं च असुत्तभासिणो, सुहासुहा जोग्गगाइ आसवा ।।२५१।। मागधिका।

व्याख्या – जिनाज्ञाभूषितं जिनाज्ञयालंकृतं वचनमपि सूरेराचार्यस्य जिनकर्म प्रसूते, जिनाज्ञयोपदेशवचनं मधुरादिप्रयुक्तं सत् तीर्थकरनामकर्मादि स्रवते जनयति, पूर्वं सावद्याचार्यस्येव अशुभं च उत्सूत्रभाषिणस्तदपि पश्चात् सावद्याचार्यस्येव, अशुभं अपयशोरूपं संसारवृद्धिहेतुकं स्यादिति पूर्वोक्तरूपाः शुभयोगा अशुभयोगाश्च आश्रवाः स्युः ।।२५१।।

---

१. धओ प्र।

जे आसवा निसिद्धा, धम्मासवघायगा जे अत्था । ते जइ धम्मुवगरणा, हुंति तओ आसवा य ते ।।२५२।।

व्याख्या – ये आस्रवाः कर्मबन्धहेतवो महर्षिभिर्निषिद्धाः, तथा च ये अर्थाः पदार्था वा धर्मविघातकारिभावाः यदि त एव धर्मोपकरणानि धर्मतीर्थसाहाय्यकराणि भवन्ति धर्मसाधनव्यतिरिक्ता आरम्भपरिग्रहास्ते अशुभाश्रवाः, यत उक्तं – **'जे आसवा ते परिस्सवा'** इति वचनात् । तथा च –

"न सो परिग्गहो वुत्तो, नायपुत्तेण ताइणा । मुच्छा परिग्गहो वुत्तो, इय वुत्तं महेसिणा[१] ।।१।।" ।।२५२।। [दशवैका. अ. ५]

जोगा विसयकसाया, मिच्छत्तं अविरइ पमाया य । अट्टरुद्दज्झाणं, असुहासवेयं इमे हुंति ।।२५३।।

सव्व सेवाउ विरउ, घित्तो सिरिनेमिपायमूलम्मि । सिरि थावच्चापुत्तो, निगुत्तं गुत्तेगओ सुक्खई ।।२५४।।

इति आश्रवभावना ।।२५३-२५४।।

सया अच्चणिज्जेण हो वासवाणं, वरेणं च वीरेणं वा कासवाणं ।
कओ संवरो जेण सव्वासवाणं, पवुत्तो मुणीणं पि तेणासवाणं ।।२५५।।

१. वुत्तो महेसिणो प्र.।

व्याख्या – अहो इति भव्यलोकामन्त्रणम्, आश्चर्ये वा सदा सता वा विचक्षणेन[१] अर्चनीयेन पूज्येन केषां वासवानां शक्राणामिन्द्राणामिति संवरः कृतः, केन ? वीरेण भगवता महावीरेण, किं विशिष्टेन ? काश्यपानां मध्ये वरेण प्रधानेन, एवंविधेन वीरेण स्वयं संवरो निर्मितः येन भगवता मुनीनामुपलक्षणतः भव्यानामपि सर्वास्रवाणां संवरः कृत्यतया उक्तश्च ।।२५५।।

सो दव्वभावभेया, होइ दुहा संवरो य जीवाणं । जो कम्मपुग्गलागमच्छेओ सो दव्वसंवरओ ।।२५६।।
संसारहेउ किरिआ, चाओ सो भावसंवरो णेओ । तेणं च संवरेणं, जे जे ते आसवा हेया ।।२५७।।
पुव्विं च पमाएणं, आसवपाणाइ आसवे पडिओ । पच्छा वि संवरणं, रायरिसी सेलओ सिद्धो ।।२५८।।

इति संवरभावना ।।२५६-२५८।।

को कुकम्मभराण, खयंकरा सा भवे दुविह इह निज्जरा । सा मुणीण य होइ सकामया, भविया य परेसिमकामया ।।२५९।।

दीपकच्छन्दः ।। तल्लक्षणं एकः पगणः टगणद्वयं गुरुश्च सर्वपादेषु दीपकम् ।

व्याख्या – कुकर्मभराणां क्षयकारिणी का विभाव्यते इति प्रश्नः । उत्तरः – सा द्विविधा निर्जरा भवति । तत्र या सकामा सा मुनीनां साधूनां परेषां या विना कर्मनिर्जराभावं भवति सा अकामा ।।२५९।।

१. विचक्षणात् प, छ।

जह फलाणं सयं च उवायओ, तह सकम्मभराणं विवायओ ।
कंचणं च जहग्गिसु ताविअं, सुज्झइ य जिओ तवताविओ ।।२६०।।

व्याख्या – यथा फलानां वृक्षफलानां पाकः स्वयमपि केषांचित् भवति केषांचिदुपायतोऽपि भवति, तथा कर्मणामपि स्वयं अकामनिर्जरा, उपायैर्द्वादशभेदतपोभिर्या क्रियते सा सकामा । तथा यथा काञ्चनमग्निना तापितं निर्मलं भवति तथा तपोऽग्निना जीवोऽपि च ।।२६०।।

मुणिणा बज्झब्भंतर-तवग्गिणा निज्जरंति कम्माइ । अज्जुणमालागारो, दढप्पहारी अ दिट्ठंता ।।२६१।।

बहुभवतरसंचियकम्महो, सग्ग-मुत्तिपहं पइ वारहो । अणसणाइतवो इह छव्विहो, बज्झओ इयरो वि य छव्विहो ।।२६२।।

इति निर्जराभावना ।।२६२, २६३।।

भाविज्ज सो धम्मो, मणम्मि सव्वण्णु देसिओ सदओ । जो धरइ भवसमुद्दे, पडंतमवलंबिओ जीवं ।।२६३।।

मुणिधम्मो गिहिधम्मो, खंतिप्पमुहो मुणीणं दसभेओ । बारसविहं गिहिधम्मो, जेण कओ तस्स सुहजम्मो ।।२६४।।

सुरमणितरुसंपत्ती, धम्मेणुत्तमकुले समुप्पत्ती । सुर-नरसयलसमिद्धी, चउदसपुव्वीण समबुद्धी ।।२६५।।

धम्मेणं जयकित्ती सुरूव-निरोयदेहदित्ती य । किज्जइ सुरेहि भत्ती, सुरनरचक्कीण समसत्ती ।।२६६।।

धर्मेण जयश्च कीर्तिश्च जयकीर्त्ती भवतः, अथवा जयकीर्तिः स्वर्ग-मर्त्य-पातालरूपे जगति कीर्तिर्भवति, तथा च सुरूप-नीरोगदेहस्य देहे वा दीप्तिर्भवति, तथा धर्मेण धर्मिजनस्य सुरैश्चतुर्विधैर्देवैः धर्मिपुरुषस्य सुरलोके कीर्तिः क्रियते, दान-शील-तपोभावनापञ्चसमिति-गुप्तिप्रमुखधर्मानुष्ठाननिश्चलमनसा देवेन्द्रेणापि प्रशंसाकरणसंबन्धाः श्रीमहावीरस्य कामदेवस्य नन्दिषेणतपस्विवैयावृत्त्यादिकारिणां ते, तथा धर्मेण सुराणां समाना शक्तिः चक्रिणां वा समा शक्तिः शरीरसत्त्वं भवति । यथा विष्णुकुमारादीनामिव, अष्टमहासिद्धिलब्धिरूपा शक्तिर्भवतीति ।।२६३-२६६।।

अबलाण बलं धम्मो, सरणं ताणं अताण सरणाणं । धम्मेण य कल्लाणं, धम्मेण वंछियं ठाणं ।।२६७।।

किं बहुणा भणिएणं, जं जं दीसइ समत्थजियलोए । इंदिय-मणसुहहेउं, तं सव्वं धम्मओ होइ ।।२६८।।

मज्जायं न व मुंचइ, जलही दिव्वेगणी य नो दहइ । बोलइ जलं न सव्वं, वरिसइ मेहो वि धम्मेणं ।।२६९।।

धर्मेण जलधिः समुद्रो मर्यादां न मुञ्चति । यत उक्तं च भगवत्यां – **"कहण्णं भंते लवणसमुद्दो जंबूद्दीवं नो उप्पीलेई नो उज्चीलेइ नावेणं एगोदगं करेइ ? गोअमा ! जंबूद्दीवे दीवे भारहे वासे एरवएवासे अरहंता चक्कवट्टी वासुदेवा बलदेवा चारणा विज्जाहरा**

समणा समणीओ सावया साविआओ मणुआ पगइभद्दया पगइविणीआ पगइतणुकोह-माण-माय-लोह जाव तेसि पणिहा नो उप्पीलेई त्ति । तथा च लोके अपराधिना दिव्ये क्रियमाणे, अग्निः सत्यं पुरुषं धर्मिणं न दहति, तथा जलमपि सत्यं पुरुषं न बोलयति सत्यो न ब्रुडति । लोके मेघा अपि धर्मेण वर्षन्ति, यत उक्तं च –

"आप्लावयति नाधारो नाश्वासयति चाम्बुदः । यन्महीं सप्रभावो हि, ध्रुवं धर्मस्य केवलः ।।१।।"

"सीहा सप्पा वग्घा, जक्खा रक्खसभयाणि सव्वाणि । न य पहवंति य तेसिं, जे हु गया धम्मसरणम्मि ।।२।।२६७-२६९।।"

निराधारा वि धरा, जं चिट्ठति अग्गी य जलइ न तिरिच्छो । वाति न अणिलो उड्ढं, जं तं धम्मप्पभावेणं ।।२७०।।

यन्निराधारा धरा मेदिनी पृथ्वी तिष्ठति, च पुनर्विश्वे वैश्वानरोऽग्निर्यत्तिरश्चीनं न ज्वलति तद्धर्मेणैव, यदि स तिरश्चीनं ज्वलति तदा तिर्यग् नगराद्यपि ज्वलति । परं वैश्वानरज्वाला ऊर्ध्वमेव याति । तथा चानिलो वायुरपि यत्तिरश्चीनं वाति नोर्ध्वं वाति तदपि धर्मप्रभावतः, स यदि ऊर्ध्वं याति तदा विश्वमपि न तिष्ठति सोऽपि यन्मर्यादावानस्ति तद्धर्मप्रभावेनेति ।।२७०।।

अधर्मस्वरूपं ज्ञापयति –

निप्पायारधम्मो वा, समरिज्जइ निच्चं पणनमुक्कारो । किज्जइ परोवयारो, धम्मो जयणाइवावारो ।।२७१।।

तत्र निःपापश्चासौ यदाचाररूपो धर्मः, यत्र नित्यं पञ्चनमस्काररूपो मन्त्रः स्मर्यते स धर्मः, यत्र परोपकारः क्रियते स धर्मः, यत्र धर्मे कुले जीवदया यत्र व्यापारः प्रवर्त्तनं भवति स धर्मः ।।२७१।।

वंदिज्जइ अणगारो, निसुणिज्जइ निच्चधम्मसुअसारो । किज्जइ जिणोवहारो, करिज्जइ जिणविहारो य ।।२७२।।

तत्र यत्र नित्यं जिनानामुपहारः पूजाविशेषो यत्र स धर्मः । तथा च जिनविहारो जिनप्रासादो यत्र स धर्मः ।।२७३।।

निसिभोअणपरिहारो, दिज्जइ धम्मीण निच्चमाहारो । जिणगुरुगुणवित्थारो, सव्वाभक्खाण परिहारो ।।२७३।।

किज्जइ धम्मवियारो, दीणाणाहाण वा समुद्धारो । सव्वुड्डाहनिवारो, रक्खिज्जइ नेव मणखारो ।।२७४।।

तत्र सर्वधर्मोड्डाहो धर्मापयशोनिवारणं क्रियते तथा मनसि क्षारोऽनुपशमो न रक्ष्यते इति धर्मः ।।२७३-२७४।।

न य परधणावहारो, किज्जइ नो वा असच्चमुच्चारो । दिज्जइ पाणाधारो, सव्वअणायारसंहारो ।।२७५।।

न य परघरसंचारो, धम्मे ठाविज्जइ सपरिवारो । किज्जइ नो रणधीरो, किज्जइ वाऽबंभपरिहारो ।।२७६।।

किज्जइ पंचायारो, उब्भिज्जइ जणविरुद्धमायारो । इय धम्मो जगसारो, तस्स भवे दुक्खनित्थारो ।।२७७।।

अंते वि हु सत्थारो, किज्जइ विहिणा मुणाहि भवतारो । सड्ढेहि भावसारो, सुहो विसल्लाणुसारो य ।।२७८।।

तत्संबन्धो यथा - पुण्डरीकविजये चक्रध्वजपुरे त्रिभुवनानन्दवर्तिचक्रवर्तिपुत्री पवित्रशीलादिगुणा अनङ्गसुन्दरी, सा सुप्रतिष्ठपुराधिपपुनर्वसुविद्याधरेणापजहे, ततश्चक्रवर्तिवचनेन विद्याधरैर्गत्वा युद्धे क्रियमाणे भग्नं तद् विमानं पतिता सा महाटव्याम्, विलपति –

हा तात ! सयललोगपरिवालणविक्कमेणाजियसत्तू । कहं ममाणुकंपं ण, करेसि इत्थ अरण्णम्मि पावाए ।।

हा जणणि ! उदरदुक्खं तारिसमं विराहिण अइगरुअ । भयविहलदुम्मणाए, कह मज्झ तुमं न संभरसि ।।

इत्यादि सा तत्र क्षुत्तृड्पीडिता स्वकं कर्म निन्दन्ती तत्कर्मक्षयाय अष्टम-दशमादितपः कुर्वाणा पारणदिने एकशः प्राशुकफलादि भुङ्क्ते, एवं त्रीणि सहस्राणि दुःकरतपः कृत्वा वैराग्यादन्ते चतुर्विधाहारं प्रत्याख्याय स्थिता, ततो षष्टिदिने मेरोर्निर्वर्त्तमानविद्याधरेण दृष्टा, उपलक्षिता तेन स्वगृहगमनाय आग्रहः कृतः, निषिद्धस्तया, तेन चक्रवर्तिनो ज्ञापितं तत्स्वरूपम्, स तत्रागतोऽजगरेण ग्रस्यमाना दृष्टा, संविज्ञश्चक्री द्वात्रिंशत्पुत्रैः सह प्रवव्राज । तया मन्त्रादि जानन्त्यापि अजगरकृपया अनशनवत्या च किञ्चनोपचारमात्रमपि न कृतम् । ततो धर्मध्यानेन मृत्वा देवलोकं प्राप्य देवलोकसुखमनुभूय च्युत्वा द्रोणमेघराज्ञः प्रियङ्कराभार्यायां विशल्यानाम्नी पुत्री जाता, पुनर्वसुविद्याधरः प्रव्रज्य तपसा निदानं कृत्वा त्रिदशीभूय ततश्च्युत्वा दशरथपुत्रो लक्ष्मणो जातः । विशल्या तु प्राग्भवाचीर्णतपोमाहात्म्याद् गर्भस्था स्वमातुर्महारोगातुराया

महारोगहन्त्री बभूव । तत्स्थानाम्भसाऽपि बहवो जना व्रणसंरोहणशल्यापहारव्याधिक्षयाद्यवापुः, स्थाने स्थाने चाशिवोपशान्तिर्जज्ञे । तत्करस्पर्शाल्लक्ष्मणस्य हृदयाद्रावणमुक्ताऽमोघविजया नाम धरणेन्द्रार्पिता शक्तिस्तपस्तेजोऽसहमाना निःससार । ततो लक्ष्मणस्तां परिणिन्ये, इति धर्मभावनया भाव्यम्, विस्तरसंबन्धो हि पद्मचरित्रतो ज्ञेयः ।। इति धर्मभावना ।।२७५-२७८।।

धम्मो धम्मागासा, कालो जीवा य पुग्गला एए । छब्भावा य जयम्मि य, भाविज्जंतीह जयज्झाणे ।।२७९।।

तिहुयणरूवो लोगो, घणुदहि-घणवाय-तणुयवायठिओ । निच्चं च वेढियाओ, तेहिं य सत्तपुढवीओ ।।२८०।।

ण कओ केण लोगो, ण य धरिओ केण सो सयं सिद्धो । भाविज्जइ गयणठिओ, अणाइनिहणो इमो लोगो ।।२८१।।

जंबूद्दीवाइआ दीवा, लोयम्मि ते असंखिज्जा । लवणसमुद्दप्पमुहा, हुंति समुद्दा असंखिज्जा ।।२८२।।

मेरुगिरिपव्वयाइ य, गिरिणो वि य ते अणेगरूवा य । सीयासीओआईय, नई य गंगा य सिंधू य ।।२८३।।

देवुत्तरकुरुपमुहा, वासा जुयलाण अमरतरुकलिआ । खित्ताणि विदेहाइ य, गामागरनगरवणकलिओ ।।२८४।।

उत्तमपुरिसा सव्वे, निग्गंथाइ य चउव्विहो संघो । नरखित्तम्मि य मणुआ, जोइसिया तिरियलोयम्मि ।।२८५।।

सोहम्माइ य देवा, गेविज्जाणुत्तरा सुरा सव्वे । सिद्धसिलोवरि सिद्धा, भाविज्जइ उड्ढलोगम्मि ।।२८६।।

रयणाइ सत्त पुढविसु, णेरइया वा सुराइ इयणाए । वंतरिआ अह लोए, चउगइजीवा य लोगम्मि ।।२८७।।

इति लोकभावना ।।२७९-२८७।।

विणुकामनिज्जराए, निग्गंतूण निगोअथावरओ । तह विगल-तिरियमुज्झिय, कहवि जिओ लहइ मणुयत्तं ।।२८८।।

कामनिर्ज्जरया विनाऽपि निगोदात् तथा सूक्ष्म-बादरेकेन्द्रियकायस्थितितो निर्गत्य तथा विकलेन्द्रियकायं मुक्त्वा विकलेन्द्रियशरीरं मुक्त्वा कथमपि जीवोऽपि अकामनिर्जरया मनुष्यत्वं लभते ।।२८८।। मानुषत्वे प्राप्तेऽपि आर्यक्षेत्रादिप्राप्तिर्दुर्लभा यथा -

माणुस्समज्जविसओ सुकुलप्पसुती, सद्धालुयत्तसुगुरुत्तसुईसुअं च ।

आरुग्गमाऊ सयला वि य धम्मजोगा, पुण्णं विणा ओ दुलहा जिणधम्मबोही ।।२८९।।

व्याख्या – मानुष्यत्वं प्रथमं दुर्लभम्, यत उक्तं च –

"दुलहे खलु माणुसे भवे, चिरकालेण वि सव्वपाणिण । गाढा य विवागकम्मुणो, समयं गोअम ! मा पमायए ।।१।।"

[उत्त. अध्य.१० गा.४] तथा च –

"चत्तारि परमंगाणि दुल्लहाणि य जंतुणो ।' इत्यादि तथा आर्यविषयो दुर्लभः, तत्रापि सुकुलप्रसूतिः - पवित्रकुलावतारो दुर्लभः, प्राप्तेऽपि पवित्रकुले धर्मश्रद्धा धर्मकरणेच्छा दुर्लभा । तत्रापि सुगुरूक्तधर्मश्रुतिर्दुर्लभा । श्रुतं जिनोक्तागमो दुर्लभः, तेषु पात्रेषु आरोग्यं नीरोगता वा आयुर्वा चिरजीवित्वम्, अल्पे आयुषि सर्वमपि विफलं तथा अपरा अपि समस्तधर्मसामग्री, विना पुण्यं सर्वधर्मयोगाः दुर्लभाः, जिनधर्मबोधिः जिनधर्मज्ञानं दुर्लभम्, यत उक्तं च –

"मानुष्यमार्यदेशश्च, जातिः सर्वाक्षपाटवम् । आयुश्च प्राप्यते तत्र, कथंचित् कर्मलाघवात् ।।१।।"

"प्राप्तेषु पुण्यतः श्रद्धा, कथकश्रवणेष्वपि । तत्त्वनिश्चयरूपं तु, बोधिरत्नं सुदुर्लभम् ।।२।।२८९।।" (यो.शा.प्र.३ ४३४,४३५)

बहुविहअज्जत्तं पि य, दुलहं जीवाण होइ भावेणं । खित्तेण दंसणेणं, सीलेणायारजाईए ।।२९०।।

संकप्पेणं अज्जा दुलहा, अज्जा तहा परिण्णाए । भासावित्तीए पुण, दुलहा अज्जा मणेणा वि ।।२९१।।

व्याख्या – बहुविधार्यत्वं जीवानां बहुप्रकारं आर्यत्वमपि दुर्लभम् । तद्यथा – भावेन आर्यत्वं जीवानां दुर्लभं आर्यभावा आर्यपरिणामा दुर्लभाः । तथा क्षेत्रेण च – आर्यक्षेत्रोत्पन्ना नरा दुर्लभास्त एव धर्मयोग्याः स्युः । तथा **दंसणेणं** ति – दर्शनेन सम्यक्त्वेन आर्याः शुद्धसम्यक्त्वा दुर्लभाः । अथवा दर्शनेन दृष्ट्वा चक्षुषा परस्त्रीषु कुदृष्टिपरिहारेणापरच्छिद्राविलोकनेन च, तथा शीलेनाचारेण

ब्रह्मचर्येण तथा संकल्पेन सुमनोऽर्थेन आर्या दुर्लभाः । तथा परिज्ञया ज्ञानेन आर्या सम्यग् ज्ञानवन्तो जीवा दुर्लभाः, तथा भाषया आर्यदेशभाषिणः म्लेच्छादिभाषात्यागेन[1] पुरुषाश्च, तथा आर्यवृत्तयः निःपापाजीविकाकारिणः आधाकर्माद्याहारादिदोषत्यागवृत्तयो भिक्षवः व्यवहारशुद्धिवृत्तिः श्राद्धादयश्च दुर्लभाः । तथा च मनसा अन्तःकरणेन आर्याः मनसा पवित्राः पुरुषा दुर्लभाः ।।२९०, २९१।।

जो धम्मिजणदोही, अणंतकोही य सव्वसंदोही । मिच्छादंसणमोही, तेसिं भवे दुल्लहा बोही ।।२९२।।

एतेषां बोधिर्जिनधर्मावाप्तिर्दुर्लभा स्यात्, यः कोऽपि पुरुषः धर्मिजनानां द्वेषी धर्मिजनग्रहणे च धर्मद्वेषे सति धर्मिद्वेषो भवति तेन धर्मद्रोही गृह्यते, तथा यः कश्चिदनन्तक्रोधी अनन्तकषायी स्यात् सर्वधर्मसंशयी नास्तिको वा, तथा च यो मिथ्यादर्शनमोही जिनधर्मव्यतिरिक्तदर्शनेषु मोही रक्तो भवति स दुर्लभबोधिः स्यात् ।।२९२।।

को आसि दुल्लहबोही, मेअज्जो अहव अरिदत्तो सो । कह होइ सुलहबोही, सणंकुमारुव्व हियकामो ।।२९३।।

व्याख्या – भगवन् ! कः पुमान् दुर्लभबोधिरासीत्, पूर्वभवजातिमदरूपेण मेतार्यः स तु दुःखेन प्रतिबोधितः, तथा च अर्हद्दत्तस्तस्य संबन्धश्च समरादित्यचरित्रतो ज्ञेयः, कश्च सुलभबोधिरिति, स सनत्कुमारदेवेन्द्रः, यथा उक्तं च भगवत्यां –**"सणंकुमारेणं भंते ! देविंदे**

१. भाषाव्यक्तेन प्र छ।

किं भवसिद्धिए किं अभवसिद्धिए ? कि सम्मदिट्ठी किं मिच्छादिट्ठी ? किं सुहंबोही किं दुलहबोही ? जाव चरिमे से णं भंते ताओ देवलोगाओ कहि उववज्जिहिं महाविदेहे वा से सिज्झिहि त्ति [शते ३, उद्दे. १] तथा

पंचहिं ठाणेहिं जीवा, दुल्लहबोहित्ताए कम्मं पगरेंति - न मे अरहंताणं अवन्नंवयमाणे १ "अरहंतपन्नत्तस्स धम्मस्स २ आयरिय-उवज्झायाओ चउवण्णस्स संघस्स ३-४-५ विविक्तवसंजमबंभचेराणं अवन्नंवयमाणे । पंचहिं ठाणेहि सुलहबोहित्ताए कम्मं पगरंति तंजहा अरहंताणं वन्नं वयमाणे १, धम्मस्स २ आयरिय-उवज्झायाणं ३ चाउवण्णस्स संघस्स च ४ विविक्त वसंजमबंभचेराणं देवाणं वन्नं वयमाणे ५

इति सुलभबोधित्वम्, तथा च बोधिप्राप्तिकारणानि यथा –

"दिट्ठे सुएणुभूए, कम्मक्खए कए उवसमे य । मण-वयण-कायजोगे, सुपसत्थलब्भए बोही ।।१।।" [आ.नि. ८४४]

दृष्टे जिनप्रतिमादौ सामायिकं बोधिर्वा प्राप्यते यथा श्रेयांसेन भगवद्दर्शने प्राप्तं श्रुते धर्मः प्राप्यते यथा – आनन्दश्रावकेन, अनुभूते क्रियाकलापे यथा वल्कलचीरिणा, कर्मणां क्षये कृते यथा चण्डकौशिकेन, उपशमेन कर्मणां यथा अङ्गर्षिणा कथानुयोगसंग्रहे, मनो-वाक्-काययोगे प्रशस्ते बोधिर्सामायिकमिति लभ्यते १ ।

'अणुकंप कामनिज्जर-बालतवे दाण विणयबिब्भंगे । संजोग-विप्पओगे, वसणूसवइड्ढिसक्कारे ।।१।।"

'विज्ज मिंठे तह इंदनागकयपुण्णपुप्फसालेयुए । सिवदुवमहुरवणिभाऊ म आभीर वसन्निलापुत्ते ।।२।।"

अनुकम्पादिभिर्वैद्यादिव बोधिः सामायिकं लभ्यते । एतेषां दृष्टान्ता आवश्यके क्रमतो ज्ञेयाः ।। इति बोधिभावना ।

अन्याऽपि भावसम्यक्त्वादिभावना भवति, यथा –

"सम्मदंसण-नाण-चरित्ताण भावणाओ य । वेरग्गभावणा विय, परमा तित्थयरभत्तीए ।।१।।"

'संसारदुगंछणया, कामविरागो सुसाहुजणसेवा । तित्थयरभासियस्स य, धम्मस्स पभावणा तह य ।।२।।२९३।।"

मुक्खसुमियराओ, अणासणवज्जणा य सुपसत्था । तह अप्पणो य निंदा, गरहा य रुहं वि खलियस्स ।।२९४।।

एसो जिणेहिं भणिओ, अणेण वरभावणमओ सुत्ते । धम्मो हु भीमभववण-सुजलियदावाणलसरिच्छो ।।२९५।।

।। इति श्रीतपागच्छेन्द्रश्रीहीरविजयसूरिराज्ये उपाध्यायश्रीसकलचन्द्रगणविरचिते श्रीहिताचरणग्रन्थे भावनास्वरूपस्त्रयोविंशोऽधिकारः ।।

।। सर्वसत्त्वहितकरस्वरूपश्चतुर्विंशोऽधिकारः ।।

सव्वेसिमविरयाण वि, अविरइकिरियं समं चक्खुगइपहं । इय मुणिय हियं चरणं, चक्कीहिं वि दुक्करं गहिअं ।।२९६।।

व्याख्या – सर्वेषामपि सुराणां नारकाणां नरदेवानां अपि ते सम्यग्दृशां श्रेष्ठिदरिद्रकृपणरङ्कराजादीनां नराणां हस्तिप्रमुखकुन्थु पर्यन्ताविरततिरिश्चामपि अप्रत्याख्यानक्रियां सदृशां तुल्यामेव कुगतिपाशः । यत उक्तं च –

"से णूणं भंते किं सिट्ठस्स य वणुयस्स य जाव अपच्चक्खाणकिरिया कज्जति, से केणट्ठेणं भंते गो॰ अविरइं पडुच्च तथा हत्थिस्स वि कुंथुस्स वि अप्पच्चक्खाणकिरिया समत्ति हंता से केणट्ठेणं अविरइं पडुच्च ।" किं विशिष्टामविरतिं मत्वा कुगतिदां नरकादिकुगतिप्रदाम्, यत उक्तं च – **"चक्रवर्तिनो नरदेवापरनामानोऽत्यक्तराज्या अप्रतिपन्नचारित्रा अवश्यं नरकगतावेवोत्पद्यन्ते नान्यासु तिसृष्वपि गतिषु, तत्रापि सप्तस्वपि नरकेषु न तु सप्तम एव"** भगवत्यां शते ११, उद्देश. । दुष्करमपि चरणं हितकरमिति मत्वा चक्रवर्तिभिः श्रुतमङ्गीकृतं च, चरित्रस्य दुष्करत्वं यथा – **एत्थ खलु सव्वकालमेव समसत्तुमित्तभावणं, हे भव्व ! दव्वाइं अभिग्गहा कायव्वा, भूमिसयणं सया अपडिक्कम्मया सहणं परिसहोवसगाणं किं बहुणा अच्चंतदुव्वहं महापुरिसवूढअढारसहस्स-सीलंगरहतहणं अविस्सामो चरणमग्गम्मि तरियव्वो खलु बाहाहिं संजमसमुद्दो निरासयाए चरिअव्वं वालुआ कवलो व्व निस्सारो संजमो बालाइदोसरहियमहापुरिसगहणजुग्गो तुणिमग्गोत्ति मत्ता** चक्रवर्तिभिर्गृहीतं चरणमिति । किं विशिष्टं ? हितकरं सर्वसत्त्वानां सुखकरं ति ।।२९६।।

सुणह चक्किचरित्तरसायणं, उवसमाइगुणाण य भायणं ।
नमह सूरिवरकयवायणं, हियकरं मुणिणो विहिजायणं ।।२९७।।

द्रुतविलम्बितं काव्यम् । व्याख्या – भो भव्याः ! उपशमादिगुणानां भाजनं चक्रवर्त्यादिमहर्षिचरित्ररसायनं शृणुत । केन ? अञ्जलिभ्यां पिबत, यतस्तदाकर्णितं हितकरं हिताचरणरूपं स्यादिति, यथा उक्तं च –

एअं पुण्णपयं सोच्चा, अत्थधम्मं विसोहियं । भरहोत्ति भारहवासं, चिच्चा कामाइ पव्वइओ ।।१।।

सगरो वि सागरंतं, भरहवासंतकरोहि । ईसरियं केवलं हिच्चा, दयाए परिनिव्वुए ।।२।। [उत्त.अध्य. १८ गा.३४-३५]

एवं मघवो सणंकुमारो, संती कुंथू अरो महापउमो । हरिसेणो जयनामो, पणमिज्जइ चक्किणो एए ।।३।।

पणमह दसण्णभद्दं, रायरिसिं तहु नमि च करकंडु । दुमुहं च निमाइमणिं उवाइणं संजयं तह य ।।४।।

तथा च नमत सूरिवरंति कृतदानं[१] प्रवचनधारकं सूरिवरं आचार्यमपि हितकरं हितदायकं नमत, गतप्रवेशविधियाचनां पिण्डैषणाध्ययनोक्तविधिना पिण्डादियाचकं मुनिमपि नमत इति ।।२९७।।

1 कृतवान् प, छ।

हियकरं विहिणा गण-धारणं, तं गणीण जसोभरकारणं । कुणइ तं गणिकम्मवियारणं, तं मुणीण गणीण य तारणं ।।२९८।।

व्याख्या – विधिना गणधारणं गणीनामाचार्याणां हितकरं स्यात्, तद् गणधारणं गणीनामाचार्याणां यशोभरे कारणं स्यात् न गणधारणं गणिन आचार्यस्य कर्मविदारणं करोति, तं गणधारणं गच्छरक्षणं मुनीनामाचार्याणां च तारणं - तारकं स्यात् । यतो भगवत्यामुक्तमस्ति – **"आयरिय-उवज्झायस्स णं भंते ! विसयम्मि गणं अगिलाए उवगिण्हेमाणस्स कतिभवग्गहणेहि सिज्झहिं जाव अंतं करेइ । गोअमा ! अत्थेगतिए, तेणेय अत्थेगतिए दुच्चेणं भवग्गहणेण सिज्झति तच्चएण भवग्गहणं नाइक्कमती त्ति** द्वितीयस्तु [भगवती शते ३, उद्देशे] तृतीयस्तु भवो मनुष्यभवो देवभावान्तरितो दृश्यः चारित्रवतो अनन्तरो देव एव भवति, न च तत्र सिद्धिः ।।२९८।।

हियकरं परदुःखनिवारणं, हियकरं गुणिवण्णपसारणं । दूरियनिंदणया हियकारणं, मणपरावगुणाण य जारणं ।।२९९।।

तत्र गुणिनां वर्णप्रसारणं गुणवतां यशोविस्तारणं यथा भगवता शङ्खगुणप्रकटनं कृतं तथा तान् श्रमणोपासकान् भगवान् जगाद भो मा यूयं शङ्खं हीलयत, शङ्खो ह्यहीलनीयः येनायं प्रियधर्मा दृढधर्मा च तथा शुद्धजागरिका जागरित इति । इत्यादिवत् तथा कार्यं यथा गुणवतां गुणा प्रसरन्तीति तद्धितकधर्मवृद्धिरूपं हितकरं स्यादिति तथा दुरितनिन्दनेनापि स्वदुःकृतं निन्दनत्वं हितकरणं स्यात् । यत उक्तं च –

निंदणयाए णं भंते ! जीवे किं जणइ ? निंदणयाएणं पच्छाणुतावे जणइ, पच्छाणुतावेणं विरज्जमाणे करणगुणसेढिं पडिवज्जइ, करणगुणसेढिं पडिवन्ने य अणगारे मोहणिज्जकम्मं उपघातेति ।।

गरहणयाए णं भंते ! जीवे किं जणइ ? गरहणंयाए णं अपुरक्कारं जणइ अपुरक्कारगएणं जीवे अप्पसत्थेहिंतो जोगेहिंतो नियत्तेइ, पसत्थेहि पवत्तइ, पसत्थजोगपडिवन्ने अणगारे अणंतघाइ पज्जवे खवेइ । [उत्त. अध्य. २९]

तथा **मणपरावगुणाण य जारणं** ति, मनसि हृदये गाम्भीर्यगुणान् परेषामपगुणानां अपराधानां जारणं अप्रकाशनमपि मेतार्यवत् क्रौञ्चपक्ष्यपराधस्य ।।२९९।।

हियकरं गुणिमत्सरवारणं, हियकरं गुणिपारणकारणं । हियकरं जियमारिनिवारणं, हियकरं मुणिसारणवारणं ।।३००।।

व्याख्या – गुणिनां ज्ञानादिगुणवतां मत्सरवारणं मत्सरनिषेधनं हितकरं हिताय स्यात्, यतः प्रायो गुणवतां बहवो मत्सरिण एव भवन्ति, यतः –

"नागुणी गुणिनं वेत्ति, गुणी गुणिषु मत्सरी । गुणी च गुणरागी च, विरलः सरलो जनः ।।"

तथा –

"जइ दुक्करदुक्करकारओ त्ति भणिओ जहट्ठिओ साहू । ता किमज्जसंभूयविजयसीसेहि न वि क्खमियं ।।१।।"

"जइ ताव सव्वओ, सुंदरत्ति कम्माण उवसमेण जई । धम्मं वियाणमाणो, इयरो किं मत्सरं वहई ।।२।।"

"अइसुट्ठिओ त्ति गुणसमुईओ त्ति जो न सहइ जइ पसंसं । सो परिहाई परभवे, जह महापीढपीढरिसी ।।३।।"

[उप.माला ६६-६८]

तथा गुणवतां महातपस्विनां पारणकारणमपि श्रेयांसादिवत् हितकारणं स्यात्, अथवा नन्दिषेणजीवपूर्वभवविप्रवत् तथा जीवमारिनिवारणं अमारिप्रवर्तापनं कुमारपालादीनामिव हितकारणं भवति, तथा आचार्योपाध्यायादिगीतार्थैः स्वशिष्यादीनां सारणवारणं क्रियमाणं हिताय स्यादिति, यथा श्रेणिक-चिल्लणावन्दनागमने साधु-साध्वीनां निदानकरणं भगवता वारितम्, गोशालकागमनप्रस्तावे बालसाधूनां तेन सह जल्पनवारणं च, तथा धर्मरुचेः कटुतुम्बकाशनवारणम्, तथा भगवता गौतमस्य वेदपदस्मारणं हिताय जातमिति ।।३००।।

सयलहेयपयत्थनिवारणं, सयलनेयपयत्थविचारणं । [१]सयलजोग्गपयत्थसुधारणं, इह-परत्थ य तं हियकारणं ।।३०१।।

(असुयसर्वं) हिताचरणसार्थमाह-इह संसारेऽपि सर्वहेयपदार्थनिवारणं हितकारणं स्यात्, तथा परत्र च परलोकगमने सुखार्थं च, मिथ्यात्वादिहेयपदार्थनिवारणं हिताय स्यात्, तथा सकलजीवाजीवज्ञेयपदार्थविचारणं ज्ञानं इहपरलोके च हिताय तथा समस्तौपशमिक-सम्यक्त्वाद्युपादेयपदार्थानां सुधारणं सुपद्धत्याङ्गीकरणं च परत्र इहापि च हिताय स्यात् इत्यादि ।।३०१।। पूर्वोक्तहिताचरण-रूपाणामन्तरायकारकं पृच्छति –

१. सूहण प, प, छ ।

को वारुणीसहोयरं, इह भणिओ महरिसीहिं भवियाणं । विसएसु रागमोहो, विज्जाहलविज्जुमाली व्व ।।३०२।।

अस्य संबन्धस्तु श्रीजम्बूस्वामिभार्यायाः प्रत्युत्तरकथातो ज्ञेयः ।।३०२।।

को किरियं अइविरुद्धं, कम्मं विरमइ इय चिंतंतो । हा दुट्ठं कयमिणं, स रूपसुन्दर इवाणहगो ।।३०३।।

भगवन् ! कः पुमान् अतिविरुद्धाचरणकर्मकार्यं कृत्वा इति विचिन्त्य च, इति किं ? हा मया दुष्टं-कृतमाचरितमिति विचिन्त्य कः प्रति विरमेत्, को विरमेदिति प्रश्नः । उत्तरः – यः प्रतिनिवर्तयति स रूपसुन्दर इवाणहगो । यथा रूपसुन्दरो निवर्तित इत्यर्थः । तत्संबन्धो यथा –

"भुञ्जे पञ्चामृतं भक्ष्यं, ग्रहेणानुगृहाण माम् । नैतत् पञ्चामृतं भक्ष्यं, किन्तु पञ्च मृतं पुनः ।।१।।"

शृङ्गारपुरं नगरम्, शृङ्गारश्रेष्ठी चतुःकोटिरत्नस्वामी, शृङ्गारसुन्दरी पत्नी, तयोः पुत्रो रूपसुन्दरः, तज्जन्मतः पितुर्धननाशो जातः, स तारुण्यं प्राप, जातः सप्तव्यसनासक्तः, व्यवहारिपुत्रैर्व्यसनासक्तैः सह मिलति, तैः सह भुङ्क्ते आस्ते शेते, गृहे तु पित्रादयो दारिद्र्येणोपहताः कदन्नं भुञ्जते, तत् तस्य न रोचते । एकदा स गृहे सुप्तः, प्रातः स मित्रगोष्ठीं जिगमिषुः अकाल एव मातुः पार्श्वे शीताशनं याचते, माताऽऽह सूर्योदये किं शीताशनमुपविष्टमस्ति ? निजं धनोपार्जनं स्मर, निजोपार्जनानुसारेण शीताशनं स्निग्धं मधुरम् । याचमानो नरः शोचते,

पित्राऽपि तदर्थं चोक्तम् । स्वपराभवं मन्यमानः सन् स नगरं मुक्त्वा देशान्तरं जिगमिषुः खड्गसहायः पथि गच्छन् सौकुमार्यात् क्षुधार्त्तोत्तेजितः स च धर्मं जानन्नपि, धर्मप्रतिकूलो हृदि दुष्टः ग्रामाद्बहिर्निर्गतः, मार्गे चतुर्मार्गमिलनस्वरूपे केनापि व्यवसायलोभेन आपणो मण्डितोऽस्ति, रूपसुन्दरेण बुभुक्षितेन तच्च गोधूमचूर्णं याचितम्, आपणधनिको जगाद धनमर्पय, स प्राह खड्गो मे याचते । स प्राह खड्गः किं करोति । स रुष्टः खड्गेन तं हत्वा गोधूमचूर्णं गृहीत्वाऽग्रे चलितः, अग्रे घृतकुतुपिकामौलिं कञ्चन मार्गे मिलितं दृष्ट्वा हृष्टः, प्राह तं प्रति भो ! घृतमर्पयेत्यादि, पूर्वविधिनैव तं हत्वा घृतकुतुपिकां जग्राह । प्रस्थितोऽग्रे, पुनः दुग्ध-वारियुतं गोपालं पूर्वविधिनैव हत्वा दुग्धं वारि[१] जग्राह प्रस्थितोऽग्रे, गुडग्रन्थियुतं नरं पूर्वविधिनैव हत्वा गुडग्रन्थिं जग्राह । प्रस्थितोऽग्रे, चिर्भटकटीस्थां स्त्रियं पूर्वविधिनैव हत्वा चिर्भटिकानि जग्राह । ततो द्विप्रहरातिक्रमसमये स एकं वननिकटविषमगिरिमारुरोह, दध्यौ चात्र निःशङ्को भुञ्जे, ततः स एकस्मिन् वटवृक्षे गुड-घृतकुल्लरिकां कृत्वा पय उष्णीकृतं चिर्भटिका खण्डानि कृतानि, ततोऽत्र मां कोऽपि मा द्राक्षीदिति धिया तं पर्वतं सर्वतो भ्राम्यन् एकत्र स्थाने कायोत्सर्गस्थं मूर्तं पुण्यमिव शमरससुभगदृशं मुनिं ददर्श, दध्यौ चाहं भोजनार्थं रहसि प्राप्तः, ऋषे ! किमर्थं रहसि त्वं तिष्ठसि ? ऋषिर्लाभं ज्ञात्वा कायोत्सर्गं पारयित्वा प्राह भो ! धर्मार्थं रहसि स्थितिर्मे । स प्राह किं फलो धर्मः ? सुगतिफलो धर्मः, अधर्मः किं फलः इति तेन पृष्ठे ऋषिः प्राह दुर्गतिफलोऽधर्मः । स चकितो हृदि प्राह-ऋषे ! भुञ्जे पञ्चामृतमिति गाथा । ऋषिः प्राह-नेदं पञ्चामृतम्, स दध्यौ

१. दुग्धं परिजग्राह प्र छ।

विचारपरः, कथमयं मम कर्तव्यपञ्चकं जानाति ? विमर्शार्हमिदं ततः ऋषिमाह-कथं यूयं मत्स्वरूपं जानीथ ? ऋषिराह[१] ज्ञानेनेति । किं हेतुकं ज्ञानमिदं ? ऋषिः प्राह तपोहेतुकमिति । स प्राह अनेन कर्तव्येन किं फलं भावि ? ऋषिराह दुर्गतिः । स चिन्तयति ही मया दुष्टं कृतम् । हा ! क्व गच्छामि ? हा ! पञ्चहत्यापापं कथं यास्यतीति निन्दागिरिं प्रपन्नः । ततः ऋषिणा धर्मोपदेशो दत्तः, प्रतिबुद्धः, स तद्भक्ष्यं प्रतिष्ठाप्य प्राव्रजत् पञ्चहत्यासप्तव्यसनपापनिवारणार्थं द्वादशोपवासान्ते द्वादशभिः कवलैः पारणं करोमीत्यभ्यग्रहीत्, वर्षत्रयं[२] चारित्रं प्रतिपाल्य सौधर्मे देवो जातः । ततश्च्युत्वा ऐरवते इभ्यगृहेषु पुत्रो भावी । ततो दीक्षाग्रहणं केवलज्ञानं मोक्षश्च । एवं पापपश्चात्तापकरणे गुणः ।।३०३।।

उवहारो य विहारो, जिणाण जेहिं व कारितं । को उवयारो किज्जइ, तेण ? सुरलोए ताण अवयारो ।।३०४।।

व्याख्या – भगवन् ! यैर्भव्यैर्जिनानां उपहारोऽनेकविधपूजारूपकारी कृतश्च सिद्धार्थराजादीनामिव जिनजन्मादि-कल्याणकादिदिवसेषु कारापितः द्रौपद्यादिभिरिव कृतश्च । तेषामुपहारकारिणां तेनोपकारेण कः उपकारः क्रियते इति प्रश्नः, तथा च विहारोऽपि विहारो जिनसद्म इति वचनाद् । भरतकारितप्रासादानुकार्यादिजिनप्रासादो यैः कारितस्तेषां विहारकारिणां तेन प्रासादेन क उपकारः क्रियते इत्यपि प्रश्नः । उत्तरं तु सुरलोके अवतारो उत्पत्तिर्भवतीति । यत उक्तं च श्रीस्थानाङ्गवृत्तौ

१. ऋषिराह प्र० । २. वर्षत्रये प्र० ।

"एतदिह भावयतः, सद्गृहिणो जन्मफलमिदं परमम् । अभ्युदयाविच्छित्या, नियमादपवर्गबीजमिदम् ।।१।।"

तथा च –

"श्रीमज्जैनगृहे जिनप्रतिकृतो जैनप्रतिष्ठाविधौ, श्रीसार्वस्नपने जिनार्चनविधौ श्रीसंघपूजादिके ।
श्रीमच्छासनलेखने च सततं श्रीतीर्थयात्रामुखे, यथामति धनं विवेकमतुलं धन्यास्त एव क्षितौ ।।३०४।।"

।। इति श्रीतपागच्छेन्द्रश्रीहीरविजयसूरिराज्ये उपाध्यायश्रीसकलचन्द्रगणिविरचिते
श्रीहिताचरणग्रन्थे सर्वसत्त्वहितकरस्वरूपश्चतुर्विंशोऽधिकारः ।।

।। श्राद्धाचारस्वरूपः पञ्चविंशोऽधिकारः ।।

एतज्जिनपूजादिकृत्यं तु श्राद्धानाम्, तेन संक्षेपतः श्राद्धाचारं पृच्छति –

को सड्ढगुणायारो, सो गुणवुड्ढो सदेवगुरुविणई । कयदेसपावविरई, तिकालजिणबिंबपूजारूई ।।३०५।।

व्याख्या – भगवन् ! श्राद्धगुणाचारः को भवतीति प्रश्नः, यत्तदोर्नित्याभिसंबन्धात् यो वक्ष्यमाणगुणादरो भवति स गुणवृद्धो गुणज्येष्ठः, तत्र **सदेव-गुरुविणई** त्ति स्वदेव-गुरूणां विशेषतो नतिर्नमस्कारो यस्य सः, यत उक्तं च –

"वंदइ पडिपुच्छइ, पज्जुवासेइ साहुणो य सयमेव । पढई सुणेई गुणेई, जणस्स धम्मं परिकहेई ।।१।।" [उप.माला. २३३]

इत्यादीनां कृत्यानां फलं च –

"अभिगमण-वंदण-नमंसणेण, पडिपुच्छणेण साहुणं । चिरमंचियं च कम्मं, खणेण विरलत्तणमुवेई ।।१।।" [उप.माला. १६६]

पुनः किं विशिष्टः श्राद्धो भवति ? कृता देशपापविरतिः- स्थूलप्राणातिपातादिविरमणरूपपञ्चाणुव्रत-गुणव्रत-शिक्षाव्रतरूपा[१] विरतिर्येन । पुनः किं विशिष्टः ? त्रिकालजिनचैत्यपूजारुचिर्यस्य सः । यतः उक्तं च – **वंदेइ उभओ कालं चेइयाइ थयथुई परमो त्ति ।।३०५।।**

१. रूपादिविरति पु छ।

कुसमय-कुतत्तचाई दिणाइकिच्चे गुणेसु राई य । मिच्छत्तकिच्चघाई, जियाण ताई अजाई य ।।३०६।।

कुशास्त्राणि कुतत्त्वानि कुदेव-गुरु-धर्मरूपाणि तेषां त्यागी, यत उक्तं च –

'सुविणिच्छिय एगमई' [उप. माला-२३१] इत्यादि ।

तथा – **'दट्ठूण कुलिंगीणं तस घरे भूयमद्दणं विविहं'** [उप.माला-२३२] इत्यादि, तथा दिनादिकृत्ये दिन-रात्रि-पक्ष-मास-चतुर्मास-संवत्सरादिधर्मकृत्ये, गुणेषु गुण-गुणिनोरभेदोपचाराद् गुणवत्सु रागी स्यात्, तथा मिथ्यात्वकृत्यघाती च तत्र मिथ्यात्वकृत्यानि यथा –

'लोईय-लोउत्तरिअं, देवगयं गुरुं च उभयं पि । पत्तेअं नाऊणं, मुत्तव्वं सम्मदिट्ठीहिं ।।१।।"

तथा च **'जियाण ताईत्ति,** जीवत्राता[१] जन्तुत्राता शरणागतहितवत्सलो भवति, श्रीशान्तिवत्, पुनः किं विशिष्टः ? अजाई त्ति अयाची, अयाचनशीलः । ***'अवंगदुवारा समणोवासया हवन्ति'*** इति वचनत्वात् न याचनशीलो भवति ।।३०६।।

आवस्सयाणुराई, धम्मामाई अभक्खच्चाई य । साहूण संविभाई, परदाराणं परिच्चाई ।।३०७।।

आवश्यकानुरागी नित्यमुभयकालमावश्यककर्ता स्यात् । यत उक्तं च – ***'दढसीलव्वयनियमो पोसहआवस्सएसु अक्खलिओ'***

१. जीवाशया प्रच्छ।

[उप.माला. २३४] त्ति वचनात् । पुनः किं विशिष्टः ? **धम्मामाइ त्ति,** धर्मे निःकपटवर्ती यतो धर्मकपटवृत्तिजीवो उदायिनृपमारकवद् दुःखी स्यात् । उक्तं च – ***'धम्मम्मि नत्थि माया त्ति य'*** यावत् तथा **'अभक्खचाई'** त्ति अभक्षत्यागी । पुनः किं विशिष्टः? साधूनां संविभागी, यत उक्तं च – ***'साहूण कप्पणिज्जं' 'पढमं जईण दाऊणं' 'वसहीसयणासणभत्तपाणं'*** पुनः किं, विशिष्टः ? **'परदाराणं परिच्चाई'**त्ति परस्त्रीपरिहारी ।।३०७।।

नयविणयमग्गजाई, सड्ढकुलायारसुत्तसज्झाई । न य परअवण्णवाई, दीहकसाई य हियवाई ।।३०८।।

व्याख्या – सुश्रावको न्याय-विनयमार्गयायी भवति । ***'न्यायसंपन्नविभवः शिष्टाचारप्रशंसकः'*** इत्यादिवचनत्वात्, तथा श्राद्धकुलाचारयोग्यसूत्रस्वाध्यायी । यतः –

'सावओ अट्ठपवयणमायाणुग्गयं सुत्तं जहन्नओ पढइ । उक्कोसेणं छज्जीवणिंतु, जइ वयकयजोगो ।।१।।'

पिण्डेसणा अज्झयणं, सुणई परं अत्थओ गुरुसगासे । सेससुत्तस्स न सड्ढो, अखंडरूवस्स अहिगारी ।।१।।" त्ति – हितोपदेशमालावृत्तौ। तथा च न परावर्णवादी स्यात् । ***'अवर्णवादी न क्वापि राजादिषु विशेषतः'*** इति वचनत्वात् । न च दीर्घकषायी, यतः – ***'कोहो पीइं पणासेइ'*** [दश.वैका.] इति वचनतः । ***'उक्कडरोसा कसायगारविया वेरेण य पडिबद्धा । मरिऊं असुरेसु जायंति ।'*** तथा, ***'उत्पद्यमानः प्रथमं दहत्येव स्वमाश्रयम्'*** इत्यादि दीर्घकषायफलं वाच्यम् । तथा च हितवादी परस्परहितोपदेशवादी स्याद् इति ।।३०८।।

रयणीसु त्ति विरत्ता, गमणागमणम्मि मरकयनित्ता★ । पोसियसु सत्तखित्ता, सुपक्खजुत्ता य गुरुभत्ता ।।३०९।।

व्याख्या-सुगमा ।

जिणजत्तारहजत्ता, सुतित्थजत्ता सुसावया रत्ता । पढिय बहुअरिहघुत्ता, जिणपवयणभावणा सत्ता ।।३१०।।

व्याख्या – सुश्रावका जिनयात्रादिषु रत्ता-रक्ताः, आसक्ताः भवन्तीति संबन्धः । तत्र जिनयात्रायां चतुर्विधत्रिदशविरचित-समवसरणादिषु समवसृतः साक्षाद् जिनयात्रायां चतुर्विधदेवनिकायवत् शङ्खशत-दशार्णभद्रराजादिवद्वा यात्रागमनं सा जिनयात्रा तत्रासक्ता भवन्ति । तथा रथयात्रा तथा तीर्थयात्रा एतासु यात्रासु आसक्ता भवन्तीति । उक्तं च –

"अष्टाह्निकाभिधामेकां, रथयात्रा तथा परा । तृतीयां तीर्थयात्रां चेत्याहुर्यात्रां त्रिधा बुधाः ।।१।।"

तथा उक्तं च – **"दो सासय जत्ताओ, तत्थिगा होई चित्तमासम्मि । अट्ठाहियाइमहिमा, बीआ पुण अस्सिणे मासे ।।१।।"**

तत्थ णं बहवे भवणवइ-वंतर-जोइसिय-वेमाणिया देवा तिहिं चउमासिएहिं पज्जोसवणाए अट्ठाहियाओ महिमाओ करेंतीत्ति ।। – जीवाभिगमे । तत्र रथयात्रास्वरूपं यथा –

★ पुरतः युगमात्रभूक्षिप्ते नेत्रे कनीनिका एव दृश्यते । अतः पार्श्ववर्त्तिशुक्लभागस्यादृश्यमानत्वात् नेत्रं मरकतसमं भाति ।

"जीवन्तस्वामिप्रतिमारथयात्रां निरीक्षितुम् । आयातावन्यदाऽवन्त्या महागिरि-सुहस्तिनौ ।।१।।"
निर्ययौ चोत्सवेनाथ, जीवन्तस्वामिनो रथः । मनोमयूरजलदः, पौराणां भक्तिशालिनाम् ।।२।।
ताभ्यामाचार्यवर्याभ्यां, श्रीसंघेनाखिलेन च । अन्वीयमानः स रथः, पुर्यां पर्यटदस्खलन् ।।३।।
गते [१]राजकुल्द्वारं, रथे स पृथिवीपतिः । वातायनस्थो दूराद्, ददर्शार्यासुहस्तिनम् ।।४।।
सुहस्त्याचार्यापादानामवन्त्यामेव तस्थुषाम् । चैत्ययात्रोत्सवश्चक्रे, संघेनान्यत्र [२]वत्सरे ।।५।।
मण्डपे चैत्ययात्रायां, सुहस्ती भगवानपि । एत्य नित्यमलंचक्रे, श्रीसंघेन समन्वितः ।।६।।
सुहस्तिस्वामिनः शिष्यः, परमाणुरिवाग्रतः । कृताञ्जलिस्तत्र नित्यं, निषसाद च संप्रतिः ।।७।।
यात्रोत्सवान्ते संघेन, रथयात्रा च प्रचक्रमे । यात्रोत्सवो हि भवति, [३]संपूर्णो रथयात्रया ।।८।।
रथोऽथ रथशालाया, दिवाकररथोपमः । निर्ययौ स्वर्णमाणिक्यद्युतिद्योतितदिङ्मुखः ।।९।।
श्रीमदर्हत्प्रतिमाया, रथस्थाया महर्द्धिभिः । विधिज्ञैः शास्त्रपूजादि, श्रावकैरुपचक्रमे ।।१०।।
क्रियमाणेऽर्हतः स्नात्रे, स्नात्राम्भो न्यपतद् भुवि । जन्मकल्याणके पूर्वं, सुमेरुशिखरादिव ।।११।।

१. राजकुले द्वारं प॰ छ । २. वत्सरः प॰ छ । ३. संपूर्णा प॰ ।

श्राद्धैः सुगन्धिभिर्द्रव्यैः, प्रतिमाया विलेपनम् । स्वामि विज्ञीप्सुरिवाकारि वक्त्राहितांशुकैः ।।१२।।
मालतीशतपत्रादिदामभिः प्रतिमाऽर्हतः । पूजिताऽभाक् कलेवेन्दोर्वृता शारदवारिदैः ।।१३।।
दह्यमानागुरूत्थाभिर्धूमलेखाभिरावृता । अशुभत् प्रतिमा नीलवासोभिरिव पूजिता ।।१४।।
आरात्रिकं जिनार्चां यत् कृतं श्राद्धैर्ज्वलच्छिखम् । दीप्यमानौषधीश्चक्रशैलचक्रविडम्बकम् ।।१५।।
वन्दित्वा श्रीमदर्हन्तमथ तैः परमार्हतैः । रथ्यैरिवाग्रतो भूयमाचकृषे रथः क्षणात् ।।१६।।
नागरीभिरुपक्रान्ताः, सहल्लीसकरासकः । चतुर्विधातोद्यवाद्यसुन्दरे प्रेक्षणीयके ।।१७।।
परितः श्राविकालोकगीयमानोरुमङ्गलम् । प्रतीच्छन् विविधां पूजां, प्रत्यहं प्रति मन्दिरम् ।।१८।।
बहलैः कुङ्कुमाम्भोभिरभिषिक्ताग्रभूतलः । संप्रतेः सदनद्वारमाससाद शनैः शनैः ।।१९।। त्रिभिर्विशेषकम् ।
राजाऽपि संप्रतिरथ[१], रथपूजार्थमुद्यतः । अगात् पनसफलवत्, सर्वाङ्गोद्भिन्नकण्टकः ।।२०।।
रथाधिरूढां प्रतिमां, पूजयाऽष्टप्रकारया । अपूजयन्नवानन्दसरोहंसोऽवनीपतिः ।।२१।।

१. स प्रतिरथं प्र ।

प्रावर्त्यत रथयात्रां, तत्रानुगमनं तथा । रथाग्रे पुष्पवृष्टिं तु, चैत्यपूजां तु ते व्यधुः ।।२२।।

इत्यादिश्रावकाचारं, ते[१] सर्वं चक्रिरे तथा । प्रान्तदेशा अपि साधुविहारार्हा यथाऽभवन् ! ।।२३।।

इति परिशिष्टपर्वणि संप्रतिराजाधिकारे । तथा हरिषेणचक्रिणाऽपि जिनरथं भ्रामितम्[२] । यथोक्तं –

दिणयरसरिसा वया, कंपिल्लपुरे गया रयणचित्ता । हरिसेणेण जिणरहा, वम्माए भासिया बहवे ।। इति पद्मचरित्रे ।

तथा महापद्मचक्रिणापि हत्थिणाउरे पउमुत्तरो राया जाला देवी, तीसे दो पुत्ता विण्हुकुमारो पउमो य । एगया जालादेवीए अरहंतरहो कारिओ । पढमं रहकड्ढणे दोण्हं देवीणं विवाए दो वि रहा रन्ना वारिया माऊण अवमाणं दट्ठूणं महापउमो देसंतरं गओ । केण मयणावलि परिणिया, साहिअच्छखंडतरहो हत्थिणाउरमागओ । पिउणा रज्जं दिन्नं, विण्हुकुमारेण समं पउमुत्तरो दिक्खं गहित्ता सिवं गओ । ततो महापउमो चक्की जाओ । जिणभवणमंडियं पुढवि काऊणं रहजत्ता कारिया, पूरिया माऊए मणोरहा ।।

तथा तीर्थयात्रासु रत्ता भवन्ति, उक्तं –

"निक्खमणनाणनिव्वाणजम्मभूमीओ वंदइ जिणाणं । न य वसइ साहूजणविरहियम्मि देसे बहुगुणे वित्ति ।।१।।" [उप.माला. २३६]

यथा – **"अट्ठावयम्मि उसहो, सिद्धिगओ वासुपुज्ज चंपाए । पावाए वड्ढमाणो, अरिट्ठनेमी य उज्झंते ।।२।।"** [रत्नसञ्चय-४५]

१. तत्सर्वं प१ छ । २. जिनरथो भ्रामितो प२ ।

'अवि सेसा तित्थयरा, जाइ-जरा-मरण-बंधणविमुक्का । सम्मेयसेलसिहरे, वीसं परिनिव्वुया वंदे ।।३।।"

पुनः श्राद्धाः किं विशिष्टाः ? पठितानि बहूनि अजितशान्त्युपसर्गहरादिस्तोत्राणि यैस्ते, पुनः किं विशिष्टाः ? जिनप्रवचन-भावनाप्रभावनासु **'सत्ता'** तत्पराः स्युस्तथा मुनयोऽपि जिनशासनप्रभावका भवन्ति यथा –

"पावयणी धम्मकही, वाई नेमित्तिओ तवस्सी य । विज्जासिद्धो अ कई, अट्ठेव पभावगा भणिया ।।१।।" [स.स. ३२]

एतेषामुदाहरणानि 'दर्शनसप्ततिकावृत्तितो ज्ञेयानि । गाथार्थः ।।३०९-३१०।।

संवच्छराइपव्वसु, पोसहकरणाइ धम्ममणुट्ठाणा । जहसत्ति संघचेईयपवयण पडिणीय पडिणीया ।।३११।।

बादरास्तेजसो द्वाराणि सूक्ष्मतेजोवत् । स्थितिस्तूत्कर्षतः ३ अहोरात्राः, आहारः षट् दिगागत एव, शरीराणि पताकासंस्थितानि सूक्ष्मवायूनाम्, शेषं सूक्ष्मतेजोवत् । बादरवायूनां शरीराणि औदारिकतैजसकार्मणवैक्रियाणि ४, समुद्घाताः ४, वेदनाकषाय-मारणान्तिकवैक्रियाः, स्थितिरुत्कर्षतः ३ वर्षसहस्राः, आहारास्त्रिदिग्गाद्यागतः लोकनिष्कुटादावपि बादरवायुकायस्य संभवात् । पर्याप्तनिश्रया अपर्याप्ता असंख्याता उत्पद्यन्ते । द्वीन्द्रियाणां शरीराणि ३, अवगाहना जघन्याङ्गुलासंख्येयभागः उत्कृष्टतः १२ योजनानि, संहननं सेवार्वार्ति, अत्र संहननं मुख्यमेवास्थिनिचयभावात् संस्थानं हुण्डम्, लेश्यास्तिस्रः, स्पर्श-रसानं द्वे इन्द्रिये, वेदना-कषाय-मारणान्तिक ३ समुद्घाताः, पञ्च पर्याप्तयः सम्यग्दृष्टयो मिथ्यादृष्टयो वा । इह हि घण्टाया वादिताया महान् शब्दो यथा हीयमानो हीयमानो अन्ते लालमात्रः स्यात् । एवममुना घण्टालालान्यायेन यदा सास्वादनसम्यक्त्वशेषाः द्वीन्द्रियेषूत्पद्यन्ते, ततोऽपर्याप्तावस्थायां कियत् कालं सास्वादनसम्यक्त्वसंभवः, सम्यग्मिथ्यादृष्टित्वं तु तथाभवस्वाभाव्यान्न स्यात् । सास्वादनापेक्षया द्विज्ञानिनः वचोयोग-काययोगिनः, आहारः षड् दिग्गागत एव, त्रसनाड्यन्तरे च तेषामुत्पादात् । उपपातो देव-नारकासंख्येयायुष्कवर्जतिर्यग्-मनुष्येभ्यः, स्थितिर्जघन्यान्तर्मुहूर्तम् । उत्कर्षतो १२ वर्षाणि, देव-नारकासंख्यायुर्वर्जतिर्यग्-मनुष्येषु गतिः । अतो द्व्यागतिका द्विगतिकाः । घनीकृतलोकस्य या ऊर्ध्वाधःआयता एकप्रादेशिक्यः श्रेणयोऽसंख्ययोजनप्रमाणाकाशसूचिगतप्रदेशमानास्तत्प्रमाणाः, त्रीन्द्रियाणामवगाहना उत्कृष्टा ३ गव्यूतानि, ३ इन्द्रियाणि, स्थितिरुत्कर्षतः ४९ अहोरात्राः, शेषं पूर्ववत् । चतुरिन्द्रियाणामवगाहना उत्कृष्टा ४ गव्यूतानि । इन्द्रियाणि ४, स्थितिरुत्कर्षाः ६ मासाः ।

नारकाणां वैक्रिय-तैजस-कार्मणानि ३ शरीराणि भवधारणीयस्य देहस्य उपपातकाले अङ्गुलासंख्येयभागः उत्कृष्टा ५ धनुःशतानि, उत्तरवैक्रियदेहस्य जघन्याङ्गुलसंख्येयभागः, उत्कृष्टतो ५ धनुःसहस्रं ते चाऽसंहननिनोऽस्थ्यभावात् यत्तु प्रागिन्द्रियाणामुक्तं तदौदारिक-देहसंबन्धमात्रमपेक्ष्यौपचारिकम्, देवानामपि यत् प्रज्ञापनादौ प्रथमसंहननमुक्तं तदपि गौणवृत्त्यैव । इह हि मनुष्यलोके विशिष्टाद्य-संहननश्चक्रवर्त्त्यादेर्यादृशी शक्तिः **दो सोला बत्तीसा** इत्यादिका श्रूयते, ततो देवानां पर्वतोत्पाटनादिविषया श्रूयन्ते इति तेऽपि वज्रसंहनिन इव वज्रसंहनिन उक्ताः, भवधारिणि उत्तरवैक्रियहुण्डं यद्यपि शुभं विकुर्विस्याम इत्यभिसन्धिना विकुर्वन्ति, तथापि तथाविधा-शुभनामकर्मोदयतोऽशुभतराणि जायन्ते, लेश्या ३, संज्ञिद्वारे ये गर्भजेभ्य उत्पन्नास्ते संज्ञिन इति व्यपदिश्यन्ते ये तु मूर्छनजेभ्यस्तेऽसंज्ञिनस्ते च रत्नप्रभायामेव नपुंसकवेदाः, पर्याप्तयः पञ्च, सम्यग्मिथ्यादृष्टयोऽपि चक्षुरचक्षुरवधिदर्शिनः । ये ज्ञानिनस्ते मतिश्रुतावधिज्ञानिनः, ये त्वज्ञानिनस्ते विभङ्गज्ञानिनो मति-श्रुताज्ञानिनश्च । अयं भावः – ये नारका असंज्ञिनस्तेऽपर्याप्तावस्थायां नाव्यक्तमप्यवधिं लभन्ते, इति द्व्यज्ञानिनः पर्याप्तावस्थायां तु त्र्यज्ञानिनः, संज्ञानिनस्तूभय्यामपि ज्ञानिनः, उपपातोऽसंख्यायुष्कवर्जपर्याप्तपञ्चेन्द्रियतिर्यग्मनुष्येभ्यः, स्थितिर्जघन्याः १० वर्षसहस्राः, उत्कृष्टा ३३ सागराः । असंख्यायुष्कसंज्ञिपञ्चेन्द्रियेषु गमनमत एव द्व्यागतिकाः शेषद्वाराणि प्रतीतानि । पञ्चेन्द्रियसंमूर्च्छिमजलचराणां द्वाराणि, चतुरिन्द्रियवद् नवरमवगाहना उत्कृष्टा योजनसहस्रम्, इन्द्रियाणि पञ्च, असंख्या-युष्कवर्जतिर्यग्मनुष्येभ्यः उपपातः, स्थितिरुत्कृष्टा पूर्वकोटी, अनन्तरमुद्धृत्य ४ गतिषूत्पद्यते, तत्र नरकेषु रत्नप्रभायामेव, तिर्यक्षु सर्वेष्वपि

संख्यातासंख्यातायुष्केष्वपि मनुष्येषु सर्वकर्मभूमिजेषु, देवेषु व्यन्तरे भवनपतिषु, अत एव चतुर्गतिकाः, द्व्यागतिकाः, चतुःपद संमूर्च्छिमस्थलचराणां द्वाराणि जलचरवत् उत्कृष्टा अवगाहना गव्यूतपृथक्त्वम्, स्थितिरुत्कर्षतः ८४ वर्षसहस्राणि, उरःपरिसर्पसंमूर्च्छिम स्थलचराणां द्वाराणि जलचरवत्, अवगाहना उत्कृष्टा योजनपृथक्त्वम्, स्थितिरुत्कृष्टा ५३ वर्षसहस्राणि,

उरपरिसप्पथलयरा, पंचिंदिया चउव्विहा पन्नत्ता, तं जहा अही अयगरा असालिया महोरगा, तत्थ महोरगा अणेगविहा पन्नत्ता । तं तत्थेगतिया अंगुलं पि, अंगुलपहुत्तं पि त्ति यावत् विहत्थिं पि, विहत्थिपहुत्तिया वि, रयणिं पि रयणिपुहुत्तिया वि, धणुंपि धणुपुहुत्तिया वि, गाउअं पि गाउयपुहुत्तिया पि, जोअणं पि जोअणपुहुत्तिया वि । "जोअणसयं पि जोयणसयपुहुत्ते वि तेणं थले जाया थले विचरंति । तेणत्थि इहा बाहिरएसु दीवसमुद्देसु हवंति, जो आवन्नो तहप्पगारो से तं महोरगा ।"

व्याख्या – सन्त्येके महोरगा येऽङ्गुलमपि शरीरावगाहनया भवन्ति, इहाङ्गुलं उच्छ्रायाङ्गुलं ज्ञेयम्, जले च जाताः सन्तो जलेऽपि स्थलेऽपि विचरन्ति, स्थलेऽपि चरन्ति तथाभवस्वाभाव्यात्, येऽपि चान्येऽङ्गुलदशकावगाहनास्तेऽपि महोरगा ज्ञेयाः । भुजपरिसर्प-स्थलचरसंमूर्छिममानाऽवगाहना उत्कृष्टं धनुःपृथक्त्वं स्थितिः उत्कृष्टा ४२ वर्षसहस्राणि, शेषं जलवत् । संमूर्छिमखचराश्च चतुर्धा, तत्र चर्मपक्षिणो येषां चर्ममयौ पक्षौ, लोमपक्षिणो येषां लोममयौ पक्षौ, समुद्गकपक्षिणो येषां गच्छतामपि पक्षौ समुद्गकवत् तिष्ठतः, विततपक्षिणो नित्यमनाकुञ्चितपक्षाः, तेषु अन्त्यौ द्वौ बाह्येषु एव द्वीपसमुद्रेषु अवगाहना उत्कृष्टं धनुःपृथक्त्वं स्थितिरुत्कृष्टा ७२

वर्षसहस्राणि, गर्भजा अपि जलचराः संमूर्छिमजलचरवत् नवरं शरीराणि ४ तेषां च वैक्रियस्यापि संभवात् । अवगाहना उत्कृष्टा योजनसहस्रं संहनन-लेश्या-संस्थानानि षडपि, समुद्घाता पञ्च एवं संज्ञिनः त्रिविधवेदाः, पर्याप्तयः पञ्च, भाषामनःपर्याप्तारेकत्वेन विवक्षणात् त्रिविधदृष्टयः, द्विविधत्रिविधदर्शनज्ञाना अवधेरपि केषां संभवात् अज्ञानिनोऽपि बिभङ्गस्यापि भावात् । उपपातः सर्वे पृथिवी-नारकासंख्यायुर्वर्जतिर्यग्मनुषेभ्यः आसहस्रारान्तदेवेभ्यः, स्थितिरुत्कृष्टतः पूर्वकोटी आनतादिदेववर्ज्येषु सर्वेषु चतुर्गतिकाः, गर्भजाः स्थलचराः संमूर्छिमस्थलचरवत् । अत्र वाऽसालिका न वाच्या, सा हि संमूर्छितैव, तथा – जोअणसयंपि जोअणसयपुहुत्तिया वि जोअण-सहस्सं पि अधिकं वाच्यम् । द्वाराणि गर्भजजलचरवत्, परमावगाहना चतुःपदानां ६ गव्यूतानि, उरःपरिसर्पाणां योजनसहस्रं भुजपरिसर्पाणां गव्यूतपृथक्त्वम्, स्थितिश्चोत्कृष्टतः ३ पल्यानि, उरःपरिसर्पाणां पूर्वकोटी, भुजपरिसर्पाणां पूर्वकोटी, चतुःपृथिवीमारभ्य सहस्रारं यावत् उरःपरिसर्पाणां पञ्चपृथिवीमारभ्य यावत् सहस्रारम्, भुजपरिसर्पाणां द्वितीयपृथिवीमारभ्य सहस्रारं गर्भजखचराणि द्वाराणि गर्भजजलचरवत्, नवरमवगाहना उत्कृष्टतः धनुःपृथक्त्वम्, स्थितिः पल्यासंख्येयभागः संमूर्च्छिममनुष्याणां शरीराणि ३, अवगाहना उत्कृष्टा जघन्या चाङ्गुलासंख्येयभागः, संहनन-संस्थान-कषाय-वेद-लेश्या द्वीन्द्रियवत्, इन्द्रियाणि पञ्च अपर्याप्ता एव, दृष्टिदर्शन-योगोपयोगाः पृथ्वीवत् । आहारो द्वीन्द्रियवत्, उपपातो नारक-देव-तेजो-वायुअसंख्यायुर्वर्जेभ्यः स्थितिर्जघन्योत्कृष्टा अन्तमुहूर्तम्, उत्पत्तिर्नारक-देवासंख्यायुर्वर्जेषु । गर्भजमनुष्या द्विज्ञानिनो मतिश्रुतज्ञानिनः, त्रिज्ञानिनो मतिश्रुतावधिज्ञानिनः, मति-श्रुत-मनःपर्यवज्ञानिनो

वा अवधिज्ञानमन्तरेणापि मनःपर्यायज्ञानसंभवात् सिद्धप्राभृतादौ तथा बहुशोऽभिधानात् । एकज्ञानिनस्तु केवलज्ञानिन एव, चतुर्ज्ञानिनस्तु मति-श्रुतावधि-मनःपर्यवज्ञानिनः मरणसमुद्घातेन समवहता अप्यसमवहता अपि म्रियन्ते, सर्वगतिषु च यान्ति। देवानामपर्याप्तत्वं तु उत्पत्तावेव न त्वपर्याप्तिकर्मोदयतः,संहननस्याभाव एवास्थ्यभावात् उत्तरवैक्रियं नानाद्यसंस्थानं इच्छातः प्रादुर्भावात् भवधारणीयं तु समचतुरस्रमेव, ज्ञानद्वारे ये ज्ञानिनस्ते त्रिज्ञानिनः, ये त्वज्ञानिनस्ते त्र्यज्ञानिनः, द्व्यज्ञानिनो वा । अयं च विकल्पोऽसंज्ञिमध्याद् ये उत्पद्यन्ते तान् प्रति नारकवद् भाव्यम्, उपपातः, संज्ञ्यसंज्ञिपञ्चेन्द्रियतिर्यग्गर्भजमनुष्येभ्यः, उत्पत्तिः पृथिवी-जल-वनस्पति-गर्भजसंख्यायुष्कतिर्यक्पञ्चेन्द्रियमनुष्येषु, अथ ये जीवस्वरूपं न जानन्ति, ते जीवन्तोऽपि मृता इव ।

का देइ धम्मसुमइं जिणसाहुगुट्ठी, पावेहिं केरिस नरो बहुरोगकुट्ठी ।
लेसा ससिव्व धवलात्थि य केह सा छट्ठी, केट्ठा पसूण इह सा उ अमारिघुट्ठी ।।३२७।।

भगवन् ! जीवानां सुमतिं सद्बुद्धिं का ददातीति प्रश्नः ? सा तु जिनसाधुगोष्ठी, तत्र जिनगोष्ठ्या शिवराजर्षेः सुमतिर्जाता, तथा च श्रीदा, गोष्ठीतः इन्द्रनागस्य☆, उक्तं च –

☆ श्रीगौतमस्वामिगणभृद्गोष्ठीतः इन्द्रनागस्य, कीदृशी गोष्ठी ? श्रीदा इत्युत्तरः । 'भो अणेगपिंडिओ ! एगपिंडिओ ते पुच्छामि' वचनेन इन्द्रनागस्य सद्बुद्धिः अभवत् ।

"विप्परिवडियविहंगो, संबुद्धो वीरनाहवयणेणं । सिवरायरिसी इक्कारसंगवी जयउ सिद्धिगओ ।।" [ऋषिमण्डल-६३]

तस्य संबन्धो भगवत्यां शतक ११, उद्देश १२, इंदनागो यथा –

"सुच्चा बहुपिंडिय-एगपिंडियं दट्ठुमिच्छइ तुमंति । जाइ सरित्तु बुद्धो, सिद्धो तह इंदनागमुणी ।।" [ऋषिमं. ७२]

तत्संबन्धोऽपि भगवत्याम् । अथ साधुगोष्ठीतः अनाथिमुनिगोष्ठ्या श्रेणिकस्य सुबुद्धिः, तथा पापैः नरः कीदृशः स्यादिति प्रश्नः । उत्तरं तु – बहुरोगकुष्टी स्यात् मृगापुत्रवत्, तथा शशिवत् धवला निर्मला लेश्या इह काऽस्तीति प्रश्नः ।

सा छट्ठी त्ति – षष्ठी लेश्या शुक्ललेश्या, तथा पशूनां तिरश्चां का इष्टां इति प्रश्नः । उत्तरः – सा तु अमारिघुष्टी अमारिघोषः ।।३२७।।

लोहीण का भवइ वा सययं अतुट्ठी, का दीज्जइ न य गुरूण सुएण पुट्ठी ।
काऽऽदीसरेण गहिया हरिणो इक्खुलट्ठी, का पारणंमि य जिणाण सुवण्णवुट्ठी ।।३२८।।

भगवन् ! लोभिनां लोभातुराणां सततं निरन्तरं हृदि का भवतीति प्रश्नः । उत्तरं तु-अतुष्टिः-असंतोषः, तथा गुरूणां मातृपितृप्रमुखवृद्धानां अथवा गुरूणां धर्मोपदेशकानां प्रभूणां स्वामिनां वा का न दीयते इति प्रश्नः, उत्तरं – तेषां पृष्ठिः पराङ्मुखतां न दीयते, लोभो यथा –

उत्खातं निधिशङ्कया क्षितितलं ध्मातां गिरेर्धातवः, निस्तीर्णः सरितां पतिर्नृपतयो यत्नेन संसेविता ।

मन्त्राराधनतत्परेण मनसा, नीता श्मशाने निशा, प्राप्तः काणवराटकोऽपि न मया तुष्टे सकामा भव ।।

गुरुपृष्ठिदातुः फलं यथाऽन्यत्राप्युक्तं च –

"एकाक्षरप्रदातारं, यो गुरुं नाभिमन्यते । वानयोनिशतं गत्वा, चाण्डालेष्वपि जायते ।।१।।"

"एकमप्यक्षरं यस्तु, गुरुः शिष्ये निवेदयेत् । पृथिव्यां नास्ति तद् द्रव्यं, यत् प्रदायानृणीभवेत् ।।२।।"

अथ **काऽऽदीसरणे**त्ति-आदीश्वरेण श्रीयुगादिदेवेन शिशुत्वे इति गम्यते गृहीता इति प्रश्नः । उत्तरं च –

हरिणो इन्द्रस्य इक्षुयष्टीति, ततो इक्ष्वाकुवंशो जात इति । यत उक्तं च –

"सक्को वंसठवणे, इक्खुअगू तेण हुंति इक्खागा । जं च जहा जम्मि वट्टं, जुग्गं कासी य तं सव्वं ।।१।।" (तित्थगालिप. २७८)

अथ **का पारणम्मि य जिणाण** त्ति – जिनानां वीतरागद्वेषानां तीर्थकृतां पारणे का भवतीति प्रश्नः । उत्तरं – तत्र सुवर्णादिवृष्टिः स्यात्, यत उक्तं –

"घुट्ठं च अहो दाणं, दिव्वाणि य आहयाणि तूराणि । देवा 'य संनिवइया न वसुहारा चेव वुट्ठा य ।।१।।३२८।।" (उपदेशपद-७२३)

● तालफलाहयभगिणी 'होही पत्ति' त्ति सारवणा - पयन्नायाम्।

दाणेण का भवइ वा जसपुण्णपुट्ठी, को वीरपारणमणो स वरो जिण्णसेट्ठी ।
का बोडिआण न मया विबुहाण दिट्ठी, का विस्समित्तिभरिया जिणवाण दिट्ठी ।।३२९।।

भगवन् ! दानेन दातुः का भवतीति पृच्छा । उत्तरं च - यशो भवति **पुण्णपुट्ठी** त्ति-पुण्यपोषः स्यात् । यत उक्तं च - तथा च -

"धर्मस्य मूलं पदवी महिम्नः, पदं विवेकस्य फलं विभूतिः । प्राणाः प्रभुत्वे प्रतिभूश्च, सिद्धेर्दानगुणानामिदमेकमोकः ।।१।।
"दानेन चक्रित्वमुपैति जन्तुर्दानेन देवाधिपतित्वमुच्चैः । दानेन निःशेषयशोऽभिवृद्धिर्दानं शिरो रेखयति क्रमेण ।।२।।"
"दानेन भूतानि वशीभवन्ति, दानेन वैराण्यपि यान्ति नाशम् । परोऽपि बन्धुत्वमुपैति दानात्, दानाद् यशः कीर्तिसुपुण्यवृद्धिः ।।३।।
"को वीरपारणमणो त्ति चतुर्मासिकतपस्विश्रीवीरपारणकारणमना आसीदिति प्रश्नः ।

स वरो जीर्णाभिधः श्रेष्ठ्यभूत्[1], तथा च, **का बोडियाण न व मया त्ति** - बोटिकानां दिक्पटानां विबुधानां गीतार्थानां सम्यग्दृशां का न मता ? सर्वेषां का न संमता इति प्रश्नः, उत्तरा दृष्टिर्न संमता, केषां ? बोटिकानां दिक्पटानां सप्तनिह्नवतोऽपि उत्सूत्रबाहुल्यत्वादिति । तथा का **विस्समित्तिभरियेत्ति** विश्वोपरि मैत्रीभृता केति पृच्छा, उत्तरं वा **जिणवाणं दिट्ठी** त्ति जिनान् पातीति जिनपास्तीर्थकरास्तेषां दृष्टिर्विश्वमैत्रीभृता इति ।।३२९।।

१. श्रेष्ठिरभूत् प, प२ छ ।

को सिद्धिमेइ न य जो हु तिजोगचेट्ठी, देवो य को भवइ जो सुहजोगचेट्ठी ।
गेहं वरं किमिह जत्थ जिणाण दिट्ठी, को वत्तमो य नियमो समचित्ततुट्ठी ।।३३०।।

भगवन् ! कः पुमान् सिद्धिं नैति न यातीति प्रश्नः । उत्तरं – यश्च त्रियोगचेष्टी स्याद्, यावत् त्रियोगचेष्टावान् जीवस्तावन्मोक्षं न याति, यतः अयोगिकेवलिनामेव मोक्षः, यत उक्तं भगवत्यां – **"जीवं ण जीवा एयत्ति, वेय त्ति तं तं भावं परिणमन्ति ताव णं नो सिज्झंति"** इत्यादि च पुनः देवः सुरो भवनपतिर्व्यन्तर-ज्योतिष्कादिकः को भवतीति प्रश्नः, उत्तरं – यः पुमान् शुभयोगचेष्टी शुभकाय-वाग्-मनोयोगव्यापारी स देवः स्यात्, ***सुहभावा हुंति वंतरिया*** त्ति (बृहत् संग्र०) वचनात्, तथा **गेहं वरं**ति गृहं श्राद्धानामिति गम्यम्, वरं प्रधानं किमिति प्रश्नः, उत्तरं – यत्र भवने गृहे जिनानां जिनप्रतिमानां नित्यमाहिता दृष्टिः । यत उक्तं च –

"रम्यं येन जिनालयं निजभुजोपात्तेन कारापितं, मोक्षार्थं स्वगृहे विशुद्धमनसा पुंसा सदाचारिणा ।
तद्यदन्ते नरामरेन्द्रमहितं तीर्थेश्वराणां पदं, प्राप्तं जन्मफलं कृतं जिनमतं गोत्रं समुद्द्योतितम् ।।१।।"

अथवा कश्चोत्तमो नियमः प्रत्याख्यानमिति प्रश्नः । उत्तरं – शमेनोपशमेन चित्ततुष्टिश्चित्तसंतोषः, यतः –

"सर्पाः पिबन्ति पवनं न च दुर्बलास्ते, शुष्कैस्तृणैर्वनगजा बलिनो भवन्ति ।
कन्दैः फलैर्मुनिवरा गमयन्ति कालं, संतोष एव पुरुषस्य परमं निधानम् ।।१।।३३०।।"

के जीवंतो वि मया, मिच्छंवाही परस्स सेवा य । तह दारिद्दं जेसिं, अन्नाणं ते हु मयगसमा ।।३३१।।

सुगमा ।।३३१।।

किं गयं पुरिसनाणा, धणजुव्वणजीवियं च संजोगा । रूवं रिद्धी भोगा, सुधम्मझाणम्मि मणजोगा ।।३३२।।

बुज्झंति य के न बोहिया, बहुकम्मा य अभव्वनाहिआ । जह सलहा व्व पडंति, मोहिया जलणे णरयम्मि ते मया ।।३३३।।

भगवन् ! के नरा गुर्वादिबोधिता अपि न बुद्ध्यन्ति ? प्रतिबोधं न यान्ति विष्णुकुमारबोधितोऽपि नमुचिवत् । बहुकर्माणः सत्त्वा न प्रतिबुद्ध्यन्ते ततस्तेषां किं स्यात् ? यथा शलभाः पतङ्गका जलने अग्निज्वालायां मोहिताः सन्तः स्वयमेव निपतन्ति तथा ते नास्तिका अभव्या वा स्वयमेव नरके निपतन्ति ।।३३२-३३३।।

किं निवाइनिउइणो, नरा अविरया य निवादि लिंति। किं रावणु व्व णरयम्मिइ जंति ते मीणया जहा धीवरजालए ।।३३४।।

भगवन् ! नृपादिकनियोगिनः राजादिकराज्यव्यापारग्राहिणः अविरता अधर्मिणः तथा अविरताश्च नृपा राजानः चक्रवर्तिनो वा किं लान्ति किं गृह्णन्तीति प्रश्नः । उत्तरं च – ते रावणवत् नरके यान्ति तथा यथा मत्स्या धीवरजालके पतन्तीति ज्ञेयम्, तथा तेऽपि नरके निपतन्तीत्यर्थः ।।३३४।।

अथ दृष्टिस्वरूपं पृच्छति –

को दिट्ठि कुदिट्ठि पुरिसो पण मिच्छदिट्ठी, को सम्मदिट्ठि पुरिसो सउ भिन्नगंठी ।
को वा कुदिट्ठिमणुओ परदारदिट्ठी, को देइ नो नियधणं करबद्धदिट्ठी ।।३३५।।

दृष्ट्या श्रद्दधानेन कुदृष्टिपुरुषो जीवो क इति प्रश्नः । उत्तरं च –

स पञ्च मिथ्यादृष्टिः, तच्च मिथ्यात्वं -

"अभिगहियमणभिगहियाभिणिवेसिय संसइयमणाभोगं । पणमिच्छबार अविरइं मणकरणा नियम छजिवहो ।।१।।" [कर्मग्रन्थ ४ गा.]

तथा च सम्यग्दृष्टिः कः पुरुष इति प्रश्नः । उत्तरं च – भिन्नग्रन्थिः ।।३३६।। तत्र को नाम ग्रन्थिः -

"गंठि त्ति सुदुब्भेओ, कखडघणरूढमूढपरिणामो । जीवस्स कम्मजणिओ, घणरागद्दोसपरिणामो ।। [संबोध प्रक. गा. ८६४]

इति स्वरूपमभिन्नपूर्वग्रन्थिपरमविशुद्धिलक्षणेनापूर्वकरणेन भित्त्वा य औपशमिकसम्यक्त्वादि सम्यक्त्वं लभते सम्यग्दृष्टिरिति, अथवा को मनुजः कुदृष्टिरिति प्रश्नः । उत्तरं च – स परदारदृष्टिः परस्त्रीरिरंसा तया च दोषाः, यथोक्तं च –

"प्राणसंदेहजननं, परमं वैरकारणम् । लोकद्वयविरुद्धं च, परस्त्रीगमनं त्यजेत् ।।१।।"

"सर्वस्वहरणं बन्धं, शरीरावयवच्छिदम् । मृतस्य नरकं घोरं, लभते पारदारिकः ।।२।।"

"विक्रमाक्रान्तनिवोऽपि, परस्त्रीषु रिरंसया । कृत्वा कुलक्षयं प्राप, नरकं दशकन्धरः ।।३।।" [यो.शा.प्र.१ गा. १५२, १५३, १५५]

को देई नो नियधणं बद्धमुट्ठी त्ति – भगवन् ! को नरो धनं निजं वित्तं न ददाति ? न भुनक्तीति प्रश्नः । उत्तरं – बद्धमुष्टिः कृपणः, यत उक्तं च –

"न दातुं नोपभोक्तुं वा, शक्नोति कृपणः श्रियम् । किन्तु स्पृशति हस्तेन, नपुंसक इव स्त्रियम् ।।१।।३३५।।

मणमंदिरम्मि भविणो, अन्नाणतमोन्तकारिणी भयवं । का दीविया व सुमई, बुद्धि कलकामधेणु व्व ।।३३६।।"

भगवन् ! भविनः प्राणिनः स्वान्तमन्दिरे अज्ञानतमोऽन्तकारिणी अज्ञानतमोऽन्धकारविनाशिका दीपिका का विद्यते इति प्रश्नः । अथ गुरूत्तरंति – सा अज्ञानविनाशिनी सुमतिः मतिज्ञानरूपा वाऽथवा भविनो जीवस्य कामधेनुवत् बुद्धिरिति गुरूत्तरः । तत्त्वभेदपर्यायैर्व्याख्या इति ।।३३६।। तत्र मतिज्ञानपर्याया यथा –

ईहापोहवीमंसा, मग्गणा य गवेसणा । सन्ना सई मई पन्ना, सव्वं आभिणिबोहियं ।।३३७।।

ईहा स्थाणुर्वा पुरुषो वेति विचारणा, अपोहो निश्चयः, ईहाया उत्तरोऽपोहात् पूर्वः नात्र राजपथे स्थाणुर्भवतीति पुरुषः संभाव्यते इति

विमर्शः, अन्वयधर्मालोचनं मार्गणा । चः समुच्चये । व्यतिरेकधर्मालोचनं गवेषणा, संज्ञा व्यञ्जनावग्रहानन्तरं शब्दानुरूपार्थज्ञानरूपा, स्मृतिरनुभूतार्थस्मरणरूपा, मतिर्ज्ञातेऽप्यर्थे सूक्ष्मधर्मालोचनरूपा प्रज्ञा स्वयमेव विशिष्टक्षयोपशमात् प्रभूतार्थधर्मालोचना, सर्वमिदमाभिनिबोधिकं मतिज्ञानम्, अत्र मते दीपिकात्वं तु संख्येयवर्षायुषा संख्येयकालं यावन्मतिज्ञानदीपिकोद्योतो भवति, असंख्येयायुषां तु देवादिभवेषु असंख्येयकालं यावद् द्विषष्टिसागरोपमप्रमाणमतिज्ञानोद्द्योतो भवतीति, वाऽथवा भविनो जीवस्य बुद्धिरपि कामधेनुवत् फल प्रदायिनी दृश्यते ।।३३७।। तद्दर्शयति –

सा बुद्धी वि य चउहा, उप्पईया विणयया य कम्मभवा । परिणामिया सुबुद्धी, अभयकुमाराइणं ।।३३८।।

सा कामधेनुवदुक्ता बुद्धिश्चतुर्धा – औत्पातिकी १, वैनयिकी विनयजा विनयप्रभवा २, तथा कर्मजा क्रियाप्रभवाऽथ पारिणामिकी एषा चतुर्विधा अभयकुमारादीनां सुबुद्धिमन्त्र्यादीनां वा । यथोक्तं च – ओत्पातिकिबुद्धिलक्षणं-

पुव्वमदिट्ठमसुयमविइय तक्खणविसुद्धगहियत्था । अव्वाहयफलजोगी, बुद्धी उप्पत्तिया नाम ।।१ ।। [उपदेश पद ३९]

अस्या उदाहरणानि यथा –

भरहसिलपणियरुक्खे, खुड्डग पडसरडकायउच्चारे । गयघयणगोलक्खंभे, खुड्डगमग्गित्थि पइपुत्ते ।

महुसित्थ मुद्दिअंके, अ नाणए भिक्खुचेडगनिहाणे । सिक्खा य अत्थसत्थे, इच्छा य महं सयसहस्से ।। [आ.नि. ९४०-९४२]

भरहसिलमिंढकुक्कडतिलवालुअ, जुत्त हत्थि अगडवणसंडे पायस अइपत्ते खाडियला पंचपियरो य । [आ.नि. ९४१]

आसामर्थः कथाभ्यो ज्ञेयः । उज्जेणीए जियारिराया, तीए आसन्नगामे भरहनडो वसइ, तस्स भारिया मया, तस्स रोहगो पुत्तो लहुओ अत्थि । तेण भरहेण अन्ना भज्जा आणीया, सा तस्स लहुपुत्तस्स सम्मं न वट्टए, तेण पुत्तेण भणिया अंब ! जह ममं सम्मं न सस्सू करिस्ससि तो हं तं करिस्सामि, जं रोयमाणी वि न य छूट्टसि, तहावि तीए न मन्नियं तस्स वयणं, अन्नया रयणीए भणिओ तेण भरहो पिया ताय कोवि जारपुरिसो नियगेहा निग्गंतूण गच्छइ एसो त्ति, ततो तेण जाणियं मम पिया दुरायारिणी त्ति निरायरो जाओ, तओ तीए भणिओ रोहो पुत्ते पिया कहं ममं पइ निरायरो त्ति, तेण भणियं को जाणइ अहं तु न याणामि त्ति । तीए भणियं अहं ते दासीत्ति तव सम्मं वट्टिस्सामि । तव पियरं पसादय, तओ अन्नया तेण रयणीए तहेव पिया भणिओ, अरे ता अरे ताय सो पुरिसो त्ति निगच्छई, तओ सहसाओ उट्ठिओ भरहो भणति कहिं कहिं ति दंसेहि, तेण दंसिया छाया एसो, भरहेण भणियं एसो तेण भणियं एसो त्ति, तेण भणियं तया जो दिट्ठो सो वि एरिसो त्ति, रोहेण भणियं एरिसो त्ति । लज्जिओ भरहो, जाओ निस्संको, तीए तओ सम्मं सस्सूईउ रोहो इति रोहस्स बुद्धी उप्पत्ति । अन्नया जणएण सह उज्जेणिं गएणं उज्जेणिं दट्ठूण बाहिं धूलीए ऊज्जेणी जहाणुरूवा लिहिया दिट्ठा राइणा पुच्छिए णाया रोहस्स बुद्धीए बहुप्पयारेण, तस्स बुद्धी परिक्खिऊण उज्जेणीराइणा पंचसयामंतीणं मज्झे मूलमंती कओ, भरहनडपुत्तो रोहो इय उप्पत्तिबुद्धी रोहस्स कामधेणू व्व ।

अथ अभयकुमारस्स ओपत्तिया बुद्धी यथा – रायगिहे णयरे पसेणजिउ राया, तस्स सेणिओ सव्वरायलक्खणसंजुओ सेणिओ पुत्तो मा एयं विमायाओ वहउ त्ति कूडावमाणेण निक्कासिओ राइणा, सो अवमाणिओ गओ बेणातडनयरं, तत्थ एगस्स सेट्ठिस्स हट्टे पेढियाए उवविट्ठो, तेण सेट्ठिणा सुविणे रयणायरदंसणेण नियगिहे नीओ । दिन्ना नियपुत्ती, तेण सेट्ठिणा मेत्थपुरे सिहिंतो गहियाणि रयणाणि सेणियप्पभावेणं, तओ राइणा पच्छन्नचरेहिं णाऊण निवेइयं सेणिओ वेणायडेऽत्थित्ति, तओ तत्थ चिट्ठमाणस्स सेट्ठिपुत्तीए सुणंदाए भद्दगयसुविणसूईओ पुत्तगब्भो, देवलोगाओ जीवो, अन्नया पसेणराइणो सरीरकारणे जाए आगया, उट्ठिया सरायलेहा, तत्थ लिहियमत्थि सिग्घमागंतव्वं ति । गच्छमाणो पुट्ठो ससुरजणेहि, कत्थ वासो, ते भणियं च पंडुरकुडीया अम्हे गोवाला रायगिहवासिणो । जइ किंचि पयोअणं तत्थगमणे तओ तत्थ सिग्घमागंतव्वं त्ति कहिऊण गओ तेहिं उट्ठियपुरिसेहिं सद्धिं, अह सुनंदाए सग्गगमणत्तणेण जाओ डोहलो जहाहं हत्थिक्खंधारूढा अभयदाणघोसणं करावेमाणी पवट्टामित्ति जाया दुब्बला पुच्छिया मे सेट्ठिणा कहिओ डोहलो । सेट्ठिणावि जणाविओ राइणा, पूरिओ य । तओ जाए पुत्ते ठवियं नाम दोहलानुभावेण अभओ त्ति । वड्ढिओ महोस्सवेहिं । अन्नया पुच्छिया अभएण माया मम इहं इब्भपुत्ता वयंति तुह पिया नत्थि त्ति, कहिं मम पिया, भणियं सुणंदाए तव पिया इमं सिलोगं लिहिय गओ त्थि त्ति, वाईओ अभएणं पांडुरकुट्या गोपाला वयं राजगृहे पुरे कार्यं चेत् क्षिप्रमायायुः इत्युक्त्वा ते पिता गतः । तओ भणिया माया मम पिया रायगिहे राया वट्टइ, गच्छिस्सामो तत्थ त्ति । गओ सुणंदाए सह । तओ अंबाए णयरूज्जाणे मुत्तूण गओ णयरमज्झं । इओ य राइणा सेणिएण मंतिबुद्धिपरिक्खणनिमित्तं कूवे

मुद्दिया बूड्डात्थि, कहावइयं जो वि पुरिसो एसा मुद्दिया कूवतडत्थो गिण्हेस्सत्ति सो मम मंती भविस्सति, तं पिच्छिऊण अभएण तं छगणेण आहम्म अगणिणा सोसिया, पूरिओ कूवो जलेणं गहिया मुद्दिया, गओ रायसमीवं पुच्छिओ कोसि तुमं, भणियं तव पुत्तो त्ति, कहं, तओ कहिओ पुव्ववुत्तंतो, तुट्ठो राया, तं अंके निवेसिऊणागओ सुणंदासम्मुहं, पवेसिया णयरं महड्ढीए, कओ मंती अभओ । अभयकुमारस्यौत्पातिकी बुद्धिः कामधेनुर्जाता ।

अथ वैनयिकी । कस्सावि सिट्ठपुत्तस्स दो सीसा निमित्तसत्थं सिक्खिया । अन्नया ते तिणाइकज्जे अरण्णं गया, तेहिं तत्थ मग्गे गयजाइपयाइं दिट्ठाइं, एगेण भणियं इत्थ हत्थिणी गया आसि कायिका कया, सा वि काणाच्छी एगपासतिणादिगहणओ, अह तीए उवरिं इत्थी पुरिसो य आरूढा संति, कायिकीकरणओ जाणइ । इत्थी सा गुव्विणी अत्थि । अवट्ठंभेण ओजाणइ, तीसे पुत्तो भविस्सइ । तीसे दाहिणो पाओ जओ गुरु त्ति । तीसे वत्थाणि रत्ताणि जओ ताणं दंसियाओ रुक्खे लग्गाओ त्ति । तस्स गुरुविणयाइण सिक्खिया । वेणिया बुद्धी । तओ ते दोवि सीसा नईतीरे ठिया । तत्थ एगाए थेरीए पुच्छिया, पुत्ता ? मम पुत्तो विदेसं गओ आसी । सो बहुकालं जाव अज्जवि नागच्छइ, कइया आगच्छिस्सइ त्ति पुच्छिया, एवं पुच्छंती से मत्थयत्थो घडो पडिओ भग्गो य । तत्थ एगेण भणिओ सो तत्थ मओ । यत उक्तं च –

"तज्ञातेन च तज्ञातं, तन्निभेन च तन्निभं । तद्रूपेण च तद्रूपं, सदृशे सदृशं दिशेत् ।।१।।"

पढमेण सीसेण भणियं गच्छ वुड्ढे गिहं सो तव पुत्तो गिहागओ त्ति । जओ सो उट्ठिओ भूमीए, मलिओ य भूमीए, सा थेरी गया णिहदिट्ठीउत्तो, तुट्ठं बाढं, सा तत्थाभरणाणि गहिय आगया पूईओ सो । अन्नेण गुरू भणिओ तुब्भेहिं अहं सम्मं सिक्खाविओ गुरूहिं स को मम दोसो तुमं । अप्पबुद्धी त्ति वैनयिकी बुद्धी कामधेणुव्व ।।

एवं अन्नाओ बहुयाओ णेयाओ ।

अथ कर्म्मजा बुद्धी यथा – हैरण्यकः परीक्षकः अभ्यासात्, सर्वं शुद्धवाक् - सुवर्णादिनाणकं जानाति समुद्रनाविका अभ्यासात् समुद्र मध्ये द्वीपादिमार्गं जलमध्येऽवबुध्यन्ते, कथा च - केणावि चोरेण भिन्नाणेण कमलायारं खत्तखणियं, पभाए तत्थ आगओ लोगो विन्नाणं तस्स पस्संति, तं सो मुणइ, तत्थ एगेण करिसएण भणियं एत्थ किं दुक्करं सिक्खियस्सत्ति, तं न य संसियं, तओ चोरो जूरियं घेत्तूण तस्स गिहं गओ, हणिस्सामि तव, तए मम कित्ती न सहिया । तओ तेण किसएणं, मा उत्सओ भव, मम विन्नाणं पस्स, तेण पडं वित्थरियं वीहिं मुट्ठिभरिय भणिओ चोरो वि मुहा वा पाडेमि विही । तेण जहा चोरेण भणिया तहा पडिया, तुट्ठो परिपंथिओ । एवं निजनिजकर्मकराणां कर्मजा बुद्धिः । सा इलाइपुत्तस्स अब्भासवसओ वंस्सग्गे पणच्चमाणस्स कम्मया बुद्धी कामधेणु व्व जाया ।

अथ पारिणामिकी बुद्धिः यथा –

"अणुमाणहेउ दिट्ठंतसाहिया वयविवागपरिणामा । हियनिस्सेसफलवई, बुद्धी परिणामिया नाम ।।१।।"

अनुमानं पक्ष-हेतु-दृष्टान्तोपनय-निगमनं तद्बुद्धिरूपं दर्शावयवम्, हेतुः केवलं लिङ्गमात्रम्, दृष्टान्त उपमानरूपः, तैः साधिता, वयो बाल्यादि तद्विपाकेन परिणामः, परिवर्तनं यस्याः सा, तथाहि तानि निःशेषाणि ऐहिकामुष्मिकानि फलानि विद्यन्ते यस्यां सा हित निःशेषफलवती बुद्धिः पारिणामिकी । अस्या उदाहरणानि –

अभए सिट्ठिकुमारे, देवी उदए य हवइ राया । साहू य नंदिसेणे, धणयत्ते सावग अमच्चे ।।
खमए अमच्चपुत्ते, चाणक्के चेव थूलभद्दे य । नासिक्कसुंदरी णंदेवइर परिणामिया बुद्धी ।।
चलणाहण आमंडे, मणी य सप्पे य खग्गथूभिंदे । परिणामियबुद्धीए, एवमाई उदाहरणा ।। [उप.प. ४९-५१]

आसामार्थः कथातोऽवसेयः । सा आवश्यके बुद्धिसिद्धाधिकारे ।

अभयकुमारस्य चण्डप्रद्योतं बद्ध्वाऽऽनयने १, काष्टश्रेष्ठिनः परिणामिकी २, पुष्पचूलाया पारिणामिकी ३ । उदितोदयस्य पारिणामिकी ४, नन्दिषेणस्य पारिणामिकी ५, धनदत्तस्य सुंसमाकलेवरभक्षणे पारिणामिकी ६ । धनुनामाऽमात्यस्य ब्रह्मदत्तरक्षणे पारिणामिकी ७, एकराज्ञो देवी राज्ञी मृता तद्वियोगार्त्तस्य प्रतिबोधोपायचतुराणां मन्त्रिणां पारिणामिकी ८, साधूनां पारिणामिकी ९, चाणाक्यस्य पारिणामिकी १०, स्थूलभद्रस्य पारिणामिकी ११, सुन्दरी- वानरप्रबोधकस्य साधोः पारिणामिकी १२, श्रीवज्रस्वामिनः मातुः प्रबोधने पारिणामिकी १३,

राज्ञो वृद्धानां पारिणामिकी १४, आमलकदातृमन्त्रिणां पारिणामिकी १५, कूपात् सर्पमणिकर्षकस्य वृद्धस्य पारिणामिकी १६, चण्डकोशिकस्य पारिणामिकी १७, कुलवालुकस्य साधोः पारिणामिकी १८, स्वपतिव्रतरक्षणयत्ने श्राविकायाः पारिणामिकी १९ ।।३३८।।

जियसत्तू पडिबुद्धो, सुबुद्धिमंतिस्स बुद्धिविहवेणं । तदा वि समणसीहा, सिद्धा इक्कारसंगधरा ।।३३९।।

सुगमा ।।३३९।।

सुअअसुयनिस्सिये, तं मइनाणं अट्ठवीस भेयं । छत्तीस तिसयभेयं, अहवा णं तंपि मइनाणं ।।३४०।।

व्याख्या – तन्मतिज्ञानं[१] द्विधा – श्रुतनिश्रितं १, अश्रुतनिश्रितं च २ । तत्र शास्त्रपरिकर्मितमतेरुत्पत्तिकाले शास्त्रार्थपर्यालोचनमपेक्ष्य च यदुपजायते तत् श्रुतनिश्रितं अवग्रहादि । यत् पुनः सर्वथा शास्त्रसंस्पर्शरहितस्य तथाविधक्षयोपशमभावत एवमेव यथावस्थितवस्तु संस्पर्शिमतिज्ञानमौत्पत्तिक्यादुपजायते तदश्रुतनिश्रितम् । **अट्ठवीसभेय** त्ति च पुनराष्टाविंशतिभेदं च । तत्र व्यञ्जनावग्रहश्चतुर्धा व्यज्यतेऽनेनार्थः प्रदीपेनेव घटः इति व्यञ्जनं तच्चोपकरणेन्द्रियस्य शाब्दादिद्रव्याङ्गाणां च यः परस्परसंबन्धः । संबन्धे हि (स नि) सोऽर्थः श्रोत्रादीन्द्रियेण वक्तुं शक्यते, नान्यथा, ततो व्यञ्जनेन लब्धिना वहणं संबद्ध्यमानस्यार्थस्य शब्दादिरूपस्याव्यक्तरूपः । परिच्छेदो

१. विज्ञानं प, छ ।

व्यञ्जनावग्रहः स चान्तर्मुहूर्त्तप्रमाणः । स च शब्दव्यञ्जनावग्रहः गन्धव्यञ्जनावग्रहः रसव्यञ्जनावग्रहः स्पर्शव्यञ्जनावग्रहः इति चतुर्धा ।। अथार्थावग्रहो यथा – अव्यक्तस्य सामान्यमात्रवस्तुनो ग्राहकः, एकसमयमात्रमानोऽर्थावग्रहः । स च शब्दावग्रहः रूपावग्रहः, गन्धावग्रहः, रसावग्रहः, स्पर्शावग्रहः, मनोऽर्थावग्रहः ६ । एवं शब्दार्थेहा रूपार्थेहा गन्धार्थेहा, रसार्थेहा, स्पर्शार्थेहा मनस्यर्थेहा, एवं शब्दावायः, रूपावायः, गन्धावायः, रसावायः, स्पर्शावायः मनसावायः ६ । तथा शब्दधारणा-रूपधारणा गन्धधारणा रसधारणा स्पर्शधारणा मनोधारणा वा ६ । षट् चतुर्भिः गुणिता चतुर्विंशतिः, व्यञ्जनावग्रहचतुष्कमीलिता अष्टाविंशतिभेदाः । अथ ३३६ भेदा यथा – श्रवणयोग्यदेशस्थे तूर्यभरे युगपद् वाद्यमाने कोऽपि श्रोता क्षायोपशमवशात् तद् ध्वनिसमूहं बहुमवगृह्णाति १, कोऽप्यबहुकं २, अन्यो बहुविधं ३ अन्योऽल्पबहुविधं ४ । एवं तु साऽपि क्षिप्रं कोऽपि अक्षिप्रं ६, कोऽपि अनिश्रितं निश्रितं ७-८ कोऽपि (संदिग्धमसंदिग्धं) १०, कोऽपि ध्रुवं ११, कोऽपि अध्रुवं १२ गृह्णाति । ईहते अवेति धारयतीति । एवमवग्रहे प्रत्येकममी १२ द्वादशभेदा योजनीयाः, ततश्चाष्टाविंशतिः द्वादशगुणा जाताः ३३६ । एवं मतिज्ञानस्य भेदाः स्युः, किञ्चिन्मात्रभेदाद् भिद्यमानं मतिज्ञानमनन्तमपि स्यात् । नामानन्त्यात् तत्क्षयोपशमानां च वैचित्र्यादिति । तत्रैकैकांशस्य भेर्यादिशब्दं स्निग्धश्च मधुरश्च तरुणत्ववृद्धपुरुषवाद्यत्वादिबहुविधधर्मोपेतं जानातीति बहुविधं ३ अन्यस्तु स्निग्धधर्मादि-स्वल्पधर्मोपेतं ४ । कश्चित् तु क्षिप्रं शीघ्रं कश्चित् तु चिरेणेति ६ । कश्चित्तु शब्दमनिश्रितं ७ देवकुलमत्र तथाविधपताकादर्शनादिति लिङ्गनिश्रितं कृत्वा स्वयमेव जानाति ८ । अन्येऽपि निश्रया संदिग्धमित्येवमेते च ९, असंदिग्धं १० । एकदा बह्वादिरूपेणावगतं सर्वदैव तथा जानातीति ध्रुवं ११ यस्य कदाचिदबह्वादिरूपेण सोऽध्रुवं १२ । श्रीविशेषावश्यकवृत्तौ । इति साधुगोष्ठी बुद्धिमतिः २९ ।।३४०।।

मइयं सुअं किं नाणं, सामाइयमाइयं च सुबहुभेयं । को दाया तस्स जए अत्थस्स जिणो य सुअस्स गणी ।।३४१।।

भगवन् ! मतिः मतिज्ञानं ददातीति मतिदम् । एवंविधं श्रुतं किं सम्यग्मतिदायकं श्रुतं किं कियदिति प्रश्नः । अथ गुरुत्तरः – तत् श्रुतं सामायिकादि बहुभेदं ति, सामायिकादिद्वादशाङ्गीति, तस्य श्रुतस्य जगति विष्टपे दाता कः इति प्रश्नः । अथोत्तरः – तस्य दाता जिनो सर्ववेदी, श्रुतस्य सूत्रस्य दाता, गणीत्ति गणधरो गौतमादिः आचार्यः ।।३४१।। अथोपाध्यायकृत्यं पृच्छति –

किं कुणइ उवज्झाओ, पंचविहो किज्झइ हु सज्झाओ । मुत्तूण दुसंझाओ, सुविहियसाहूहिं सज्झाओ ।।३४२।।

भगवन् ! उपाध्यायः आचार्यपदयोग्य उपाध्यायः किं कुरुते ? तेन द्विसन्ध्ये मुक्त्वा, द्विकालवेले दिनमध्यान्तरूपे द्विकालवेले रात्रिमध्यान्तरूपे च मुक्त्वा परित्यज्य तेनोपाध्यायेन पञ्चविधो स्वाध्यायः क्रियते । यत उक्तं च –

'चउपोरसिओ दिवसो, दिणमज्झ ते य दुन्निघडियाओ । एवं रयणीमज्झे, अंतम्मि य ताउ चत्तारि ।।१।।" [संदेहदोलावली-१११]

दिवसस्य मध्ये मध्याह्ने संध्यायां च रात्रावपि मध्यरात्रे रात्र्यन्ते च निर्ग्रन्थाः स्वाध्यायं वर्जयन्ति यत उक्तं निशीथसूत्रे यथा – **"नो कप्पइ निग्गंथाण वा निग्गंथीण वा चउहिं महाकालवेलाहिं सज्झायं करित्तए । तं जहा – पढमाए पच्छिमाए मज्झन्हे ३ अदुरात्त ४ इति ।** तेषां कालवेलायां स्वाध्याये क्रियमाणे दोषाः सन्ति । यथा –

"पुव्वावरसंझाए, मज्झण्हे तह य अड्ढरत्तम्मि । चउ संज्झा सज्झायं, जो कुणइ य आणमाईणि ।।१।।"

"लोए वि होइ गरिहा, संझासु गुज्झगा पविचरंति । आवस्स उवओगा, आसा सो चेव खिन्नाणं ।।२।।"

श्राद्धानामपि यत् श्रमणानां वर्ज्यं तदुत्सर्गतो वर्ज्यमेव, तेषामपि मोक्षार्थित्वात् तेषां तु कालवेलायामन्यद् धर्मकृत्यमुपदिष्टमस्ति । तहाहि – **समणेण सावएण य, अवस्स कायवयं हवइ जम्हा । अंतो अहो निसिस्स आवस्सयं नामे**त्यनेन श्राद्धेनावश्यकरणं तथा – कालो सुइभूएणावि सिद्धपुणाइएहं विहिणाओ, सारथुई थुत्त गरूईए कायव्वमितिपूजाकरणमपि तेषां श्रमणोपासकानां कालवेलायामुपदिष्टमस्ति न तु स्वाध्यायं लोकेऽपि लोकोत्तरेऽपि च वर्ज्यत्वात् । तथाहि –

"चत्वारि खलु कर्म्माणि, सन्ध्याकाले विवर्जयेत् । आहारं मैथुनं निद्रां, स्वाध्यायं च विशेषतः ।।१।।"

'आहाराज्ज़ायते व्याधिः, क्रूरगर्भश्च मैथुनात् । निद्रातो धननाशश्च, स्वाध्यायान्मरणं भवेत् ।। इति ।

एवं च यः स्वाध्याय उपाध्यायेन कालवेलाचतुष्टयं मुक्त्वा क्रियते स स्वाध्यायः । सुविहितसाधुभिः कालवेलां मुक्त्वा प्रथमां पौरष्यां स्वाध्यायं विधाय-कृत्वा द्वितीयपौरष्यां ध्यानमिति, यतः उक्तं च –

"पढमं पोरसि सज्झायं, बीयं झाणं झियायइ । तइयाए भिक्खायरियं, पुणो चउत्थीइ सज्झायं ।।१।।३४२।।"

(उत्त.अध्य. २६ गा. १२)

अथ स्वाध्यायेषु प्रमादादि साधोर्दोषं दर्शयति -

केण न वि दड्ढाओ, असुहाओ कम्मपयडिमज्झाओ । पंचविहो सज्झाओ, कयावि जेणं न सज्झाओ ।।३४३।।

भगवन् ! अशुभकर्मप्रकृतिमध्यतः द्व्यशीतिपापप्रकृतीनां मध्यात् अशुभकर्मप्रकृतयः केन न दग्धा प्रतिप्रश्नः । अथोत्तरः - येन कदापि स पञ्चविधस्वाध्यायो न ध्यातः न कृतः तेन अशुभप्रकृतयो न दग्धा न शोषिताः । तत्राशुभप्रकृतयो यथा -

"नाणंतरायदसगं, नव बीए नीयसायमिच्छत्तं । थावरदसनरयतिगं कसायपणवीसतिरियदुगं ।।१।।"

"इग बितिचउजाईओ, कुखगइ उवघाय हुंति पावस्स । अपसत्थवन्नचऊ, अपढमसंघयणसंठाणा ।।२।।"

"थावर १-सुहुम, २-अपज्जं ३-साहारण ४-अथिर ५-असुभ दुभगाणि । दुसर ८-अणाइज्ज जसं, थावरदसगं विवज्जत्थं ।।३।।"

[नवतत्त्व गा. १८-२०]

विना स्वाध्यायालम्बं न जीवोऽप्रशस्तध्यानार्तो शुभकर्मप्रकृतीर्बध्नाति । पञ्चविधस्वाध्यायसक्तस्तु प्रशस्तध्यानी सर्वाशुभप्रकृतीर्दहति । यत उक्तं -

"सज्झाएण य पसत्थं, झाणं जाणेइ सव्वपरमत्थं । सज्झाए वट्टंतो, खणे खणे जाइ वेरग्गं ।।४।।"

तथा च – **"उड्ढमहतिरियलोए, जोइस-वेमाणिया य सिद्धा य । सव्वो लोगो लोगो, सज्झायविऊस्स पञ्चक्खो ।।५।।"**

तथा – **"जो निच्चकालं तवसंजमुज्जुओ नवि करेइ सज्झायं । अलसं सुहसीलजणं, कह तं ठावेई साहुपए ।।६।।३४३।।"**

(उप.माला. ३३८-३४०)

अथ पञ्चविधस्वाध्यायस्वरूपं दर्शयति यथा –

को पणहा सज्झाओ, सुआण सीसाण वायणाईउ । पडिपुच्छा परिअट्टणा, अणुपेहा तह य धम्मकहा ।।३४४।।

तत्र पञ्चधा स्वाध्यायः क इति प्रश्नः । अथोत्तरं – स वाचनादिकः – वाचना, पृच्छना, परावर्तना, अनुप्रेक्षा, धर्मकथारूपः पञ्चधा स्वाध्यायः । फलं च तेषां यथोक्तं च –

वायणाएणं भंते ! जीवे किं जणई ? वायणाएणं निज्जरं जणइ । सुअस्स अणासायणयाए अणुसज्झणयाए वट्टमाणे तित्थधम्मं अवलंबई । तित्थधम्मं अवलंबमाणो महानिज्जरे महापज्जवसाणे भवई १, पडिपुच्छणयाएणं भंते ! जीवे किं जणई ? पडिपुच्छणयाए सुत्तत्थ-तदुभए विसोहेइ, कंखामोहणिज्जं कम्मं छिंदइ २ । परिअट्टणयाएणं भंते ! जीवे किं जणई ? परिअट्टणयाएणं वंजणाइ जणइ, वंजणलद्धिं च उप्पाएइ । अणुप्पेहाए णं भंते ! जीवे किं जणई ? अणुप्पेहाए णं आउवज्जाओ सत्तकम्मपगडीओ घणियबंधणबद्धाओ सिढिलबंधणबद्धाओ पकरेइ, दीहकालठितियाओ हस्सकालठितियाओ

पकरेई । तिव्वाणुभावाओ मंदाणुभावाओ पकरेइ बिहुप्पएसाउओ अप्पपएसमाउ पकरेई । आउअं च णं सिय बंधइ सिय नो बंधइ, अस्सायावेयणिज्जं च णं कम्मं नो भुज्जो भुज्जो उवचिणइ अणादीयं च णं दीहमद्धं चाउरंतसंसारकंतारं खिप्पामेव वीईवति । धम्मकहाए णं भंते ! जीवे किं जणइ ? धम्मकहाए णं पवयणं पभावेई । पवयणपभावेणं जीवं आगमिसस्सभद्दत्ताए कम्मं निबंधइत्ति ।।३४४।। [उत्त.अध्य. २९] अथवाऽल्पश्रुतमपि यद्धितं करोति तत् पृच्छति –

किं सिक्खिज्जइ भयवं, हियय अप्पं पि सुअं च गुरुपासे । जह जवनिवस्स जायकुप्पं युअंति हिअट्ठाणे ।।३४५।।

भगवन् ! किं शिक्ष्यते किमभ्यस्यते इति प्रश्नः । अथोत्तरः –

"अल्पमपि हितदं श्रुतं गुरुसमीपे शिक्ष्यते । अल्पमपि शिक्षितं श्रुतं यथा यवनृपस्य हितार्थं ज्ञातमिति दृष्टान्तः ।

अत्र श्रीकल्पभाष्यगाथा –

"जह सूरस्स पभावं, दट्ठुं वरकमलपुंडरीआइं । बुज्झंति उदयकाले, तत्थ य कुमुया न बुज्झंति ।।१।।"

"एवं भवसिद्धीआ, जिणवरसूरस्स य प्पभावेण । बुज्झंति भवियकमला, अभवियकमला न बुज्झंति ।।२।।"

"समिईसु भावणासु य, गुत्तीपडिलेहविणयमाईसु । लोगविरुद्धसुबहुविहेसु लोगुत्तरेसुं वा ।।३।।"

"जुत्तविरयस्स सययं, संजमजोएसु उज्जयमइस्स । किं मज्झं पढिएणं, भण्णइ सुणताइमेणाए ।।४।।" [बृह. कल्पभा. ११३६-३७, ११४५-४६]

"जह पहओ त्तित्तगओ, बहुयरं रेणुयं छुइअंगे । सुट्ठु वि उज्जममाणो, तह अन्नाणी मललं विणइ ।।५।।"

चोयग "भणइ जहा रोगत्तो, पुच्छइ विज्जं न सहियं पढइ । तहं कम्मामयविज्जो, पुच्छियं तुब्भे करिस्सामो ।।६।।

"आगाढकारणेहिं, गुरुमाई ते जया न होहिंति । तया कहं तु काहिसि, जहा व सो अंधलो थेरो ।।७।।

यथा – उज्जयिन्यां सोमिलो विप्पो अंधीभूओ । तस्स अट्ठपुत्ता ८, अट्ठपुत्ताणं भज्जाओ, अट्ठपुत्ताणं पुत्ता एवं बत्तीसं जणा कुडुंबे । अन्नया तेहिं भणिओ तस्स चक्खुविगिच्छाकारायणनिमित्तं पुत्तेहिं । तेण भणियं किं मम लोयणविगिच्छाए बत्तीसजणा मम निच्चादरकरा संतीति । एवं गच्छइ कालो अन्नया लग्गं पलीवणं, नवरं[१] नट्ठो सव्वो सयणो तत्थ नयणविहीणो सो दड्ढो, एवं विणा सुयपढणं जीवो अन्नाणी भवे रडइ त्ति ।

"गुरुणा भणियं मा एवमग्गाहं गिण्हसुं वई अचक्खुं । किं वा तुमे निलयसुउ, अस्सुयपुव्वो जवो राया ।।१।।"

तत्संबन्धो यथा – उज्जयिन्यां मतिलसुओ जवो राया, तस्स वि पुत्तो गद्दभनामो जुवराया । निरूवमा डोलिया नाम तस्स भगिणी । दीहपिट्ठो मंती ते डोडिया रायाभगिणी नियभूमिगिहे खिविया, तं भुंजइ । तेण वेरग्गेण जवो राया पव्वईओ परं किंपि पढिऊं

१. नयरो प, छ ।

नो भिलसइ । मुत्तसिणेहेण पुणो णिएइ । अन्नया उज्जेणी आसन्ने जवखेत्ते उवविट्ठो तया य खित्तरक्खगेण तस्सा वि गद्दहस्स भणियं, उहावसि पट्ठावसि, ममं वा निरीक्खसि । लक्खिउ ते मया भावो, जवं पेच्छसि गद्दहा ।।१।।

एसो सिलोगो जवरायरिसिणा वि भणिओ, अन्नया च तत्थ खित्ते बालयाणं कीडंताणं अडोलिया बिले पडिया ते अवलोयमाणेहिं बालेहिं बिलम्मि पडिया । अडोलिया दिट्ठा, तओ एगे भणियं –

"इओ गया तओ गया, मग्गिजंती ण दीसए । अहामयं वियाणामि, अगडछूढा अडोलिया ।।१।।"

एसो वि सिलोगो सिक्खिओ जवेणं, तओ जवरिसी कुंभयारसालाए ठिओ । अह जवेण विराहिय दीहपिट्ठमंतिणा जवमारणत्थं उवस्सयासन्नं आओहसत्थाणि खिविऊणं भणिओ जवपुत्तो गद्दभराया एस तव पिया जवरायरिसी परीसहभग्गे उवसग्गपराजिओ, तव रज्जगहणत्थमागओ अत्थि । अन्नहा उवस्सयासन्नं कहं आओहसत्थाणि खिवियाणि संति । ताणि दरिसिऊं उप्पाईओ तस्स पच्चओ । तओ य तेण कुंभयारेण मूसगा ईओ तओ परिब्भममाणा भणिया सुकुमालय कोमलभद्दलया रत्तिं हिंडणसीलया भयं ते नत्थि अम्हओ, दीहपिट्ठाओ ते भयंति । जवेण सो वि सिलोगो गहिओ । गद्दभराया पच्छन्नं पियामारणत्थं रयणीए कुंभयारसालमागओ । सो य मुणी सिलोगे घोसइ –

"ओधावसी पट्ठावसी मम चेव निरीक्खसि । जाणि ते मया भावो जवं पिच्छसि गद्दहा ।।१।।"

तओ राईणो चिंता जाया धुवं एसो अइसयवं तओ बितीओ वि सिलोगो गणिओ ।

"इओ गया तओ गया, मग्गिज्जंती न दीसए । अहमेयं वियाणामि, अगडे छूढा अ डोलिया ।।२।।"

तओ तितीओवि गणिओ-सुकुमालयकोमल ! तओ राइणा चिंतियं नूणं एसो दीहपिट्ठो ममं मारिऊंकामो एवं करेइ त्ति । अन्नहा कहं मम पिया संते भोगे चइऊणं ताणं पेच्छइ त्ति । तओ तस्स मंतिणो सीसं छेत्तूण साहुसमीवं आगंतूणं सव्वं कहिऊणं खामेइ । तओ मुणी भणइ –

"सिक्खियव्वं मणुस्सेण, नवि जारिसतारिसं । पिच्छ मुद्ध ! सिलोगेहिं जीविसए संजुअमपुव्वं ।।१।।

तह तह पल्हाई मुणी नव नवसंवेगसद्धाओ ।"

इह पूर्वं यवराजर्षेः पठनोपरि मेधाऽभिलाषो नाभूत् पश्चात् तु पठनोपरि मेधा बुद्धिर्जाता । तेन उक्तं च –

"मेहा हुज्ज न हुज्ज व, लोए जीवाण कम्मवसगाणं । उज्जोओ पुण तह वि हु, नाणम्मि सया न मुत्तव्वो ।।१।।"

"जइ बहुदिवसेण पयं, धरेई पक्खेण वा सिलोगद्धं । उज्जोअं मा मुंचसु, जइ इच्छिअं सिक्खियं नाऊं ।।२।।"

"जं पिच्छह अच्छेरं, तह सीयलमओ नएण वि जलेणं । उदएण गिरी भिन्नो, थोवं थोवं वहंतेण ।।३।।"

"जहा सूई ससुत्ता, न नस्सई कयवरंमि पडिया वि । तह जीवो वि ससुत्तो, न नस्सई गओ वि संसारे ।।४।।"

"जह आगमपरिहीणो, विज्जो वाहिस्स न मुणइ तिगिच्छं । तह आगमपरिहीणो, चरित्तसोहिं न याणेई ।।५।।३४५।।"

[पुष्पमाला-२८-३१-३३]

कल्लाणं मंगलं यान्ति, विवेगबहुनिज्जरं च । जा इच्छइ बहुस्सुयं, धरउ भद्दबाहु व्व ।।३४६।।

यः कोऽपि मुनिः कल्याणं मंगलं च पुनर्विवेकं कृत्याकृत्यविभागज्ञातृत्वं विवेकं इच्छति स किं धरेत् इति प्रश्नः । अथ गुरूत्तरः – स मुनिर्बहुश्रुतत्वं धरतु । किंविशिष्टं ? सुनिज्जरं सष्ठु शोभना निर्जरा कर्मणां यच्च तत् । यतः उक्तं च –

"छट्ठट्ठम-दस-दुवालसेहिं, अबहुस्सुयस्स जा सोही । तत्तो य अणेगगुणो, सोही जिमियस्स नाणिस्स ।।

तद् बहु श्रुतत्वं क इव धरतु ? भद्रबाहुवत् । यथा श्रीभद्रबाहुना धृतम्, अत्र उपसर्गहरस्तोत्रकारी बहुसूत्रनिर्युक्तिकारी च यथा –

आवस्सगस्स दसकालियस्स, तह उत्तरज्जमायारे । सूयगडे निज्जुत्तिं, वुच्छामि तहा दसाणं च ।

"कप्पस्स य निज्जुत्तिं, ववहारस्सेव परमनिउणस्स । सूरियपन्नत्तीए, वुच्छं इसिभासियाणं च ।।१।।" [आ.नि. ८४-८५]

यथा श्रीयशोभद्रस्य द्वौ शिष्यौ श्रीभद्रबाहु-संभूतिविजयौ । प्रतिष्ठानपुरे वराहमिहिरभद्रबाहुद्विजौ बान्धवौ प्रव्रजितौ,

भद्रबाहोराचार्यपदप्रदाने वराहो रुष्टो द्विजवेषमादृत्य वाराहीसंहितां कृत्वा निमित्तैर्जीवति, लोके च वक्ति क्वाप्यरण्ये शिलायां लग्नमहमण्डपं स्वापावसरे तदभञ्जनस्मृत्या लग्नभक्त्या तत्र गमने सिंहं दृष्ट्वापि तस्याधोहस्तप्रक्षेपाल्लग्नभङ्गे सूर्यः प्रत्यक्षीभूय स्वमण्डले नीत्वा सर्वं ग्रहचारमदर्शयदिति अन्यदा राज्ञः पुरो लिखितकुडालके ५२ पल-मत्स्यपातकथने श्रीभद्रबाहुभिस्तदन्तपातः सार्द्धं ५१, पलमानत्वं चावादि तेन वातप्रयोगात् पलार्धत्रोटिर्नाज्ञायि, अन्यदा तेन राज्ञः पुत्रागमने पुत्रशतायुर्वर्तने गुरूणामनागमने एते अव्यवहारज्ञा इति जैननिन्दायां गुरुभिः सप्तदिनैर्बिलाटिकातः पुत्रमरणोक्तौ तेन बिलाटिकाः सर्वाः पुरात् निःकाशिताः स्तन्यं पिबतो बालस्योपरि बिलाटिकाकारवक्त्राऽर्गलापातात् पुत्रमृत्यौ गुरुप्रशंसा तस्य च निन्दा। अहो सूर्यमण्डलदर्शनाद् मम नाज्ञानमिति, ततः कोपाद् मृत्वा व्यन्तरो जातः । तेनाशिवोत्पादनेन श्रीसंघमुपसर्गयत् । श्रीगुरुभिरुपसर्गहरस्तोत्रं कृत्वा न्यवारि यतः -

"उवसग्गहरं थुत्तं, काऊणं जेण संघकल्लाणं । करुणापरेण विहियं, स भद्दबाहुगुरू जयउ ।।१।।" इति ।।३४६।।

चंदुव्व दंसणीओ, आराहणीओ य होइ इंदुव्व । नाणी आयरिउ जो, निवव्व पुण्णद्धभागी सो ।।३४७।।

ज्ञानी अवधि-मनःपर्यव-केवलज्ञानी बहुश्रुताचार्यश्च चन्द्रवत् दर्शनीयो निशाकरवद्दर्शनार्हः, यत उक्तं –

"किं इत्तो लट्ठयरं, अच्छेरतरं सुंदरतरं वा । चंदमिव सव्वलोगा, बहुरसुयमुहं पलोयंति ।।१।।" [पुष्पमाला-३४]

तथा ज्ञानी बहुश्रुताचार्य इन्द्रवदाराधनीयो यः सुराणामिन्द्र आराध्यस्तथा बहुश्रुतः । तथा च –

"जहा से उडुवई चंदे, नक्खत्तपरिवारिए । पडिपुण्णे पुण्णमासीए, एवं हवइ बहुस्सुए ।।१।।"

"इन्द्रवद् आराध्यो यथा-जहा से सहस्सक्खे वज्जपाणीपुरन्दरे । सक्के देवाहिवई, एवं हवइ बहुस्सुए ।।१।।"

[उत्त.अध्य. ११ गा. २५-२३]

स बहुश्रुताचार्यो नृपवत्, यथा नृपो राजा धर्मी राजा प्रजाया धर्मस्य षड्भागभागी भवति, यतो धर्मिणि राज्ञि प्रजापि धर्मिणी भवति । यत उक्तं च –

"राज्ञि धर्मिणि धर्मिष्ठाः, पापे पापा समे समाः । राजानमनुवर्तन्ते, यथा राजा तथा प्रजा ।।१।।"

तथा – **प्रजानां धर्मषड्भागो, राज्ञो भवति रक्षितुः । अधर्मस्यापि षड्भागो, जायते यो न रक्षति ।।२।।**

तथाऽऽचार्योऽपि सम्यग् साधु-साध्वीपालनापालनपुण्य-पापं चार्धार्धेन विभजतीति, यत उक्तं च –

इक्खागा दसभागं, सव्वे वि य विन्हिणो उ च्छब्भागं । अम्हे पुण आयरिया, अद्धं अद्धेण विभयंति ।।

तत् कल्पधृतखण्डे । तथा च –

चक्की वीसइभागं, सव्वे वि य केसवा य दसभागं । मंडलिया च्छब्भागं, आयरिया अद्धमद्धेण ।।१।।३४७।।

कल्लाणे मंगलयं, नमामि कं देवयं व चेइ मंसं । तं जस्स सुयं सीलं, इग-दु-ति भवभावि सिवसुक्खं ।।३४८।।

भगवन् ! कल्लाणं ति-कल्याणहेतुं मङ्गलकं दुरितोपशमहेतुकं देवतावत्, इष्टदेवसमं कं गणिं कमाचार्यं नमामीति प्रश्नः । अथ गुरूत्तरः – तन्नमेति क्रियाध्याहारः । तं कं ? यस्य श्रुतं शीलं श्रेयः शीलतोऽपि श्रुतवान् देशविराधकत्वात् । यत उक्तं च – **"नाणाहिओ वरतरं हीणो वि हु पवयणं पभाविंतो ।"** इत्यादि तथा – **'हीणस्स विसुद्धपरूवगस्स नाणाहिअस्स कायव्वं'** इत्यादि । तथा च भगवत्यां अष्टमशते उदे. १० । यथा –

"सीलं सेयं सुयं सेयं सेयं सीलं सेयं एवं खलु गोयमा मए चत्तारि पुरिसजा पन्नत्ता तं जहा सीलसंपन्ने नामेगे, नो सुतसंप्पण्णे, सुयं सुतसंपण्णे णामेगे नोसीलसंपन्ने, एगे सीलसंपन्ने वि, सुतसंपन्ने वि, एगे णो सीलसंपण्णे नो सुतसंपण्णे, तत्थ णं जे से पढमे पुरिसजाते, से ण पुरिसेव असुयं उवरए अविण्णायधम्मे एस णं गोयमा मए पुरिसे देसाराहए पन्नत्ते, तत्थ णं जे से दुव्वे पुरिसजातो सेणं पुरिसे असीलवं सुतवं अणुवरए विण्णायधम्मे देसविराहए पण्णत्ते ।।२।। जे से तच्चे पुरिसजाते सीलवं सुतवं उवरए विणा धम्मे से णं गोयमा पुरिसे सव्वाराहए ।।३।। तत्थ णं जे से चउत्थे पुरिसजाते से णं पुरिसे असीलवं, असुतवं अणुवरए अविण्णायधम्मे से णं सव्वविराहए। ततो यस्याचार्यस्य श्रुतं शीलं च अतः सर्वाराधकं गणिनम्, किं विशिष्टं एक-द्वि-त्रिभवभावि शिवम्, एकभवे वा द्विभवे ता तृतीयभवे वा भावि शिवं मोक्षं यस्य तम्, लुप्तविभक्तिशिवपदं

प्राकृतत्वात्। यत उक्तं च - भगवत्यां पञ्चमशते ३०६ - यथा **आयरिए उवज्झायाणं भंते ! सविसयं सि गणं अगिलाएणं संगिण्हमाणे अगिलाए उवगिण्हमाणे कतिहि भवग्गहणेहिं सिज्झति जाव अंतं करेति ? गोयमा ! अत्थेगतिए तेणेव भवग्गहणेणं सिज्झति अत्थेगतिए दोच्चेणं भवग्गहणेणं सिज्झति तच्चं पुण भवग्गहणं नाइक्कमति** ।।३४८।।

गहणासेवणसिक्खा, सुअणाणिस्सेव गुरुकुले होइ । गुरुकुलवासो गच्छो, परंपरा आगओ सङ्घो ।।३४९।।

ग्रहणा च आसेवना च ग्रहणासेवने तयोः शिक्षा, तत्र ग्रहणं सामायिकादिकद्वादशाङ्गीरूपश्रुतस्य आसेवना शिक्षा च सर्वौघनिर्युक्त्येत्युक्तसाधुसामाचारी शिक्षा सा श्रुतज्ञानस्यैव भवति न त्ववधिज्ञानादेः । यत उक्तं च -

सुयणाणस्सेव उद्देससमुद्देसाणुन्नाणुओगो पवत्तइति । सा शिक्षा क्व भवतीति दर्शयति - गुरुकुलवासे, यत उक्तं च -

"वसे गुरुकुले निच्चं, जोगवं उवहाणवं । पियंकरे पियंवाई, स सिक्खं लद्धुमरिहइ[१] ।। [उत्त.अध्य. ११ गा. १४]

स गुरुकुलवासश्च गच्छः सुविहितसाधुपरिवारसमेताचार्यादिप्रधानपुरुषोपाध्याय-प्रवर्तक-स्थविर-रत्नाधिकसाधु-साध्वीप्रमुखसंघः, सोऽपि किंविशिष्टः ? परम्परागतविविधवाचना- सामाचार्यादिना परस्परं राग-द्वेषविमुक्तयोगयत्नवान् यतो राग-द्वेषरहित एव यो योगः सा यतना अन्या चायतना, यत उक्तं -

१. ससिलेखेदुमरिहइ प, छ ।

"राग-द्दोसविउत्तो, जोगो असढस्स होइ जयणा य । राग-दोसाणुगओ, जो जोगो सो अजयणा य ।।१।।"

सच्चो त्ति - स गच्छः सत्योऽन्यो स्वच्छन्दगतिमतिप्रवर्तितो गच्छाचाररहितोऽसत्यः । यत उक्तं -

"नियगमइविगप्पियं, चिंतिएणं सच्छंदबुद्धिरइएणं । कत्तो पारत्तं हियं, कीरइ जं गुरूअणुवएसेणं ।" इति।।३४९।। [ ]

अत्र परम्परागतद्रव्यदृष्टान्ते शतानीक-मृगावती दृष्टान्तो वाच्यः ।।३५३।। तत्र परम्परागतगच्छे सूत्रार्थयोरपि परम्परागतत्वं दर्शयति-

अत्थो हु अत्तओ पुण, होई जिणाणं च गणहराणं । अत्थो अणंतरेणं, सुत्तं पुण अत्तओ होई ।।३५०।।

जिनानामर्थः समस्तपदार्थज्ञानं द्वादशाङ्गवेदज्ञानं आत्मन एव नान्यतः स्वयं बुद्धत्वाद् जिनानाम्, यत उक्तं -

"तव-नियम-नाणरुक्खं, आरूढो केवली अमियनाणी । तो मुयइ नाणवुट्ठिं, भवियजणविबोहणट्ठाए ।।१।।"

"तं बुद्धिमएण पडेण, गणहरा गहिय निरवसेसं । तित्थयरभासियाइं, गंथंति तओ पवयणट्ठा ।।२।। त्ति ।" [आ.नि. ८९-९०]

अथ गणहराणां पुनरर्थः द्वादशाङ्गीश्रुतस्य अनन्तरेणं अन्तररहितः अन्तरपुरुषरहितत्वात्, सूत्रं च आत्मत एव स्वयमेव रचितत्वात् ।।३५०।। अथ गणधरशिष्यानाश्रित्य तमाह -

गणहरसीसाण सुअं, अणंतरेणं भवेई अत्थो य । जाओ परंपरेणं, सिज्झंभवयाइ सुगुणीणं च ।।३५१।।

गणधरशिष्यानां श्रुतमनन्तरेण अन्तररहितं श्रुतम्, अर्थस्तु तेषां परम्परया दृष्टान्तो यथा शय्यंभवादिगणीनाम् । यथा – श्रीवीरात् श्रीसुधर्मणो सुधर्मतः श्रीजम्बुस्वामिनः, श्रीजम्बूतः श्रीप्रभवस्य, प्रभवस्वामिनः श्रीशय्यंभवस्वामिसमीपेऽर्थः समागत इति ।।३५१।। अथ सूत्रार्थोक्तं मार्गं कृत्याकृत्यरूपं केन विना न ज्ञायते इति पृच्छति -

कं विणु कज्जाकज्जं, न मुणई न चयइ य सव्वसावज्जं । विणु बहुसुयपरिचज्जं, कुणसु तओ गीयपरिचज्जं ।।३५२।।

भगवन् ! कं पुरुषं विना कार्यमकार्यं वा हिताहितं वा मार्गं न मनुते, कं विना भव्यो न जानातीति प्रश्नः । च पुनः कं विना सर्वमपि सावद्यं योगं सर्वपापव्यापारं न त्यजतीति वा प्रश्नः । अथ गुरूत्तरः – बहुश्रुतपरिचर्यां बहुश्रुतसेवां विना न जानाति न त्यजतीति च । अत एव तथाविधगीतार्थश्रमणपरिचर्यां कुर्विति गुरूत्तरः । तथाविधगीतार्थश्रमणपरिचर्याफलं च यथा –

तहारूवं णं भंते ! समणं वा माहणं वा पज्जुवासमाणस्स किं फला ? पज्जुवासमाणस्स सवणफला, से णं भंते ! सवणे किं फला ? णाणफले से णं भंते णाणे किं फलो ! विन्नाणफलो, एवमेतेणं अभिलावेणं इमा गाहा अणुगंतव्वा ।

"सवणे नाणे य विन्नाणे, पच्चक्खाणे य संजमे । अणन्हए तवे चेव, वोदाणे अकिरिणिव्वाणे ।।" [भग. २१ स्था. १३]

जाव सा णं भंते ! अकिरिया किं फला ? निव्वाणफला । निव्वाणे किं फला ? सिद्धिगमणपज्जवसाणफले पन्नत्ते ।।३५२।।

अथ गीतार्थस्वरूपं पृच्छति –

को पवरो गीअत्थो, सुत्तं अत्थं च जं जया काले । दव्वं खित्तं कालं, भावं जाणंति गीअत्था ।।३५३।।

भगवन् ! प्रवरः प्रधानगीतार्थः कः कीदृशो भवतीति प्रश्नार्थः । यः सूत्रं च पुनरर्थं निर्युक्त्यादिकं जानाति, केवलसूत्रचारिणोऽनुष्ठानमज्ञानतपसि पतति । यतः –

"अपरिच्छियसुयनियसस्स, केवलमभिन्नसुत्तचारिस्स । सव्वुज्जमेण वि कयं, अन्नाणतवे बहुं पडंति ।।१।।" (उप.माला. ४१५)

किं विशिष्टं सूत्रार्थं जानाति यत् सूत्रार्थं यदा यस्मिन् यावत् वर्तते तथा च द्रव्यं योग्यायोग्यं श्रोतृभव्यादिकं अथवा द्रव्यं षड्द्रव्यरूपं वा, तच्च धर्माधर्मास्तिकायाकाशास्तिकाय-काल-पुद्गल-जीवरूपं षड्द्रव्यं संयमयोग्यायोग्यरूपं भविकजीवद्रव्यं वा कालं सर्वानुष्ठानप्रस्तावावसरं स्वाध्यायः पौरुष्यादिकम्, **'पढमं पोरिसि सज्झायं'** इत्यादि तथा भावं जानन्ति दातृदानाभिप्रायमाकारेङ्गितचेष्टादिलक्षणैः भव्यपरिणामं जीवस्वभावं वा प्रशस्ताप्रशस्तरूपं वा उदयिकादिभावं वा यथा **छव्विहे भावे पन्नत्ते, तं जहा – उदइए, उवसमिए, खयिए, खओवसमिए, परिणामिए संनिवाइए** इत्यादिकं ये जानन्ति ते गीतार्थाः ।।३५३।। अथ पुनरपि गीतार्थस्वरूपं च –

जाओ अ अजाओ अ, दुविहो कप्पो य होइ नायव्वो । इक्किक्को विय दुविहो, समत्तकप्पो य समत्तो ।।३५४।।
गीअत्थजायकप्पो, अगीओ खलु भवे अजाओ य । पणगं समत्तकप्पे, तह णहगो होइ असमत्तो ।।३५५।।
उउबद्धे वासासु, सत्तसमत्ता तहणगो इयरो । असमत्तो जायाणं, उहिण न किंचि आभव्वं ।।३५६।।

तत्र गीतार्थेन यो विहारो गीतार्थसाधुसंबन्धी स जातकल्पः, अगीतार्थसंबन्धी स अजातकल्पः । ऋतुबद्धे साधुपञ्चमानः स समाप्तः । वर्षासु सप्तसाधुमानः, समाप्तो हीनोऽसमाप्तः । ततश्चासमाप्ताजातकल्पवतामोघेनोत्सर्गेण न किञ्चित् क्षेत्रम् । क्षेत्रगतशिष्यं भक्ते पानवस्त्रादिकमागमप्रसिद्धमाभाव्यम् ।

"गीअत्थो य विहारो, बीओ गीयत्थमिस्सिओ भणिओ । इत्तो तईयविहारो, नाणुन्नाओ जिणवरेहिं ।।१।।३५४-३५६।।"
(प्रव.सारो. ७७०)

अथागीतार्थस्वरूपं पृच्छति –

को अगीअत्थो कुगुरू, सरणागयभवियसीससिरखग्गं । विहिउज्जमाइ बहुविह-सुत्तं न मुणइ अगीअत्थो ।।३५७।।

भगवन् ! कोऽगीतार्थः । अगीतार्थः कीदृशो भवति ? कुगुरुश्च पूर्वोक्तगीतार्थतारहितोऽगीतार्थः स कुगुरुः, स तु शरणागत शिष्यादिशिरोमस्तकखड्गवत् खड्गम्, यत उक्तं –

"जह सरणमुवगयाणं, जीवाण निकंतइ सरो जो उ । एवं आयरिओ विहु, उस्सुत्तं पन्नवंतो य ।।१।।" [उप.माला. ५१८]

अथ कुगुरुश्च - कुत्सितं गृणातीति कुगुरुः । उक्तं च -

सर्वाभिलाषिणः सर्वभोजिनः सपरिग्रहाः, । अब्रह्मचारिणो मिथ्योपदेशा गुरवो न तु ।

"परिग्रहारम्भमग्नास्तारयेयुः कथं परान् । स्वयं दरिद्रो न परमीश्वरीकर्तुमीश्वरम् ।।१।।" तथा -

"विश्वस्तो मुग्धधीर्लोकः, पात्यते नरकावनौ । अहो ! नृशंसैर्लोभान्धैर्हिंसाशास्त्रोपदेशकैः ।।२।।" यदाहुः -

"यज्ञार्थं पशवः सृष्टाः, स्वयमेव स्वयंभुवा । यज्ञोऽस्य भूत्यै सर्वस्य, तस्माद् यज्ञे वधोऽवधः ।।३।।"

"औषध्यः पशवो वृक्षास्तिर्यञ्चः पक्षिणस्तथा । यज्ञार्थं निधनं प्राप्ताः, प्राप्नुवन्त्युच्छ्रितं पुनः ।।४।।"

"मधुपर्के च यज्ञे च, पित्र्ये दैवतकर्मणि । अत्रैव पशवो हिंस्यान्नान्यत्रेत्यब्रवीन्मनुः ।।५।।" [यो.शा.प्र.२ गा. ६५-६६-८८-९१]

इत्यादि कुत्सितधर्मोपदेशं गृणातीति कुगुरुः । तथा च विध्युद्यमादिबहुविधसूत्रभेदान् न जानातीत्यपि यः सोऽगीतार्थः ।।३५७।। यथा-

विहिउज्जमवन्नयभय[१]-उसग्ग[२]ववाय[३]तदुभयाइं[४] । सुत्ताइं[५] बहुविहाइं[६], समए गंभीरभावाइं[७] ।।३५८।।

तत्र विधिसूत्रं - संपत्ते भिक्खकालम्मि १ । उद्यमसूत्रं - दुमपत्ते पंडुअए २ । वर्णकसूत्रं - ऋद्धित्थिमिअसमिद्धे ३ । भयसूत्रं -

नरके रुधिरादिवेदनावर्णनं ४ । उत्सर्गसूत्रं - इच्चेसिं छण्हं जीवनिकायाणं नेव सयं दंडं समारंभिज्जा ५ । अपवादसूत्रं न या लेभिज्जा निऊणं सहायं ६ । उत्सर्गापवादसूत्रं –

"अट्टज्झाणाभावे सम्मं, अहियासियव्वओ वाही । तब्भावम्मि य विहिणा, पडियारपवत्तेणं नेयं ।।१।।३५९।।"

एसिं विसयविभागं, अमुणंतो नाणावरणकम्मुदया । मुज्झइ जीवो तत्तो, सपरेसिं ममग्गहं जणई ।।३६०।।

अत्रागीतार्थविषये ईश्वरसाधुदृष्टान्तो यथा –

वाससयं पि य सूलीए, संभिन्नो इच्छई सुहं । अगीयत्थेण समं इक्कं, खणं पि न संवसे ।।३६१।।

"अगीयत्थत्तदोसेण, गोअमा ! इसरेणओ । जं पत्तं निसामित्ता, लहु गीअत्थो मुणी भवे ।।१।।"

अत्रैव भरते अन्यस्यां चतुर्विंशतिकायां प्रथमतीर्थङ्करस्य निर्वाणसमये देवक्रियमाणं महिमानं दृष्ट्वा प्रत्यन्तग्रामवासी कश्चित् स्वप्राग्जातिस्मरणं प्राप्य प्रत्येकबुद्धो जातः, तत्तपःपूजादिं दृष्ट्वा ईश्वरनामा अगीतार्थसाधुस्तं प्रत्येकबुद्धं प्रति पृच्छति यथा – केन त्वं दीक्षितः ? किं कुलः ? कस्ते गुरुरित्यादि पप्रच्छ । तेनापि यथास्थिते प्रोक्ते स जडः प्रत्येकबुद्धत्वमश्रद्दधानो दध्यौ, अलीकमेतदनार्यो यो मुधा लोकं वञ्चयति । यद्वा किमेतेन जिनमेव पृच्छामीति गतः, जिनाभावात् गणधरान्ते, निविष्टः शुश्राव तद्देशनां यथा –

"पुढवीकाइयमेगं, जो वावाए असंजओ । ता ईसरो विचिंतेई, सुहुमे पुढविकाईए ।।१।।"

"अच्चंतकडयडं एयं, वक्खाणं तस्स वीफुडं । कंठसोसो परं लाभं, एरिसं कोऽणुचिट्ठइ ।।२।।"

"ता एयं विप्पमुत्तूणं, सामन्नं किंचि मज्झिमं । जं वा तं वा कहे धम्मं, ता लोओ अम्हाण होई ।।३।।"

अथवा हा धिग् मामज्ञानिनं इति मया चिन्तयता भगवतो जिनस्याशातना कृता । स्वयं प्रायश्चित्तमनुचरामीति संवेगमापन्नः ।

"दिव्वं वा समयं पुत्तं, अह सो पच्छित्तमणुचरे । तं तारिसं महाघोरं, पायच्छित्तं सयं मई ।।१।।"

पुनरपि प्रत्येकबुद्धपार्श्वे गतः । तदा तमपि पृथ्वीकायसमारम्भं दुरन्तविपाकतां व्याख्यानयन्तं श्रुत्वा स ईश्वरो अगीतार्थतया दध्यौ" पुढवीए ताव एसो, विसमासीणो चिट्ठइ । अग्गीए रद्धं च खायइ, अन्नं पाणं च अन्नहा कहं जीवए ।।

तओ अच्चंतकडयडं एयस्स गणहरस्स वक्खाणं अहवा चिट्ठउ एए, सयमेव सुहं धम्मं वागरिस्सामि, जो सव्वेहिं कीरिऊं सक्कइ न अज्ज कडयडस्स धम्मस्स कालोत्ति । जाव चिंतेइ ताव पडिओ तस्स सिरम्मि खडखडंतो असणी, मओ गओ सत्तमाए पुढवीए, सो अगीयत्थदोसेण सासणपडिणीयत्तणेणं, तओ नरकादुद्धृतो मत्स्यो भूत्वा पुनः सप्तम्यां गतः । ततः काको जातोः विष्ठाशी ततः आद्यनरकं गतः । ततः सिंहो भूत्वा चतुर्थनरके गतः । पुनः सिंहः पुनश्चतुर्थे नरके गतस्तत कुष्ठी ५० वर्षाणि । ततो देवः ततो राजा, ततः पुनः

सप्तमनरकम्, ततो बहुसंसारे भ्रान्त्वा गोयमा ! संपइ गोसालो एस जाओ, तम्हा एयं वियाणित्ता अचिरा गीयत्थमुणी हविज्जा, विइयपरमत्थे सारासारपरत्तए । इत्यगीतार्थत्वे ईश्वरसाधुकथा श्रीमहानिशीथात् किञ्चित् संक्षिप्य लिखिता ।।३६१।।

अथागीतार्थानुगमनं निषेधयति –

अगीअत्थपायलग्गा, मूढा निवडंति भवसमुद्दम्मि । पसुतावसपयलग्गा जह पडिया तेंऽतराले ।।३६२।।

अगीतार्थपादलग्नाः अज्ञानारम्भाजितेन्द्रियगुरुपादलग्ना मूढा मूर्खनरा भवसमुद्रे निपतन्ति, (गत) उक्तं श्रीसूत्रकृदङ्गे –

"जहासाविणिं नावं, जाय अंधादुरुहिया । इच्छइ पारमागंतुं, अंतराय विसीयति ।।१।।" [सूयडांग अध्य. १ ऊ०२ गा. ३१] तथा –

"जह लोहसिला अप्पं पि, बोलए तह बिलग्गपुरिसे वि । इय सारंभो य गुरु, परमप्पाणं पि बोलेई ।।२।।" [संबो.प्र. ३५६]

कथं ते मूढा निवडंतीति यथा ते प्रसिद्धा नराः पशुवदज्ञानारम्भाजितेन्द्रियतापसलग्नाः पतिताः, यथा सुघोषग्रामे सर्वपशुस्तापस एको वसति, तस्य च वालुङ्की-चिर्भटी-वृन्ताकीप्रमुखवल्लिवितानवाटिका वर्तते । सतां नित्यं दत्तावधानो रक्षति । एकदा तेन तत्र धेनुपदानि दृष्टानि, चिन्तितं तेन केयं धेनुर्मद्वाटीं चरतीति, सरोषो निशि जाग्रन् सावधानो यष्टिहस्तस्तस्थौ । तावत् तत्र सुरभिरेकाऽपि दिवोऽवतीर्य सलीलं वल्लीश्चरति, दृष्टा तापसेन, सहसोत्थाय तस्याः पुच्छमग्रहीत् तावद् एषाऽपि गगने पक्षिणीवोड्डीय यान्ती प्राकारवेष्टितमेकं सौधमेकं

स्वस्थं स्थानं ययौ । दृष्टं तापसेन, गतो मध्ये, तापसमाकार्य सुरभिरवदत भोस्तापस ! अहं कामधेनुर्मम मन्दिरमिदम् । सर्वपुष्प-फल-पत्र-धान्यादिवस्तु पयःप्राप्तियुतम्, तथापि गोस्वभावात् प्रतिदिनं तव शाड्वलां वाटीमटामि । स्वदन्ते च तस्याः पत्र-फलादीनि लग्नानि । त्वं नित्यं मल्लाङ्गूललग्नो मम सदने मोदकानद्याः । अहं तु तव वाटीमेष्यामीत्युक्त्वा तस्य मोदकाः दत्ता, अत्ता च तेन स्थितस्तत्रैव तद्दिनम् । द्वितीयदिने गोपुच्छविलग्न उत्तीर्णः, उक्तश्च धेन्वा मा वादीः कस्यापीदं वृत्तान्तमिति गतः स्वमठम् । अथ यदा यदा च मोदकेच्छा तदा तदा धेनुपुच्छविलग्नस्तत्र गत्वा मोदकानत्ति । अन्यदा चिन्तितं तेन, इष्टं तु तद् यद् बहुभिर्दृष्टमिति गौर्विज्ञप्ता यदि ते आज्ञा तदा मम परिवारं खलु मोदकातिथिं करोमि । जानन्तु तेऽपि तव मोदकास्वादम् । अङ्गीकृतं तया, ज्ञापितो मोदकवृत्तान्तः परिवारस्य, सोऽपि कामधेनुमोदकास्वादोत्सुको जातः । ज्ञापितं धेन्वा त्वं मम पुच्छे विलगेः, तव शिष्यस्तव पादयो अन्यस्तत्पादयोः एवं परम्परया-ऽन्येऽपीति। तुष्टस्तापसः, लग्नास्ते तथैव धेनुपुच्छे, निर्गता धेनुर्गगनमार्गम्, वदन्ति सर्वे परस्परं प्रगुणैः स्थेयम्, गताऽऽकाशे यावदासन्नं धेनुसदनं तदा पृष्टोऽसमञ्जसेन पशुभरडकशिष्येन पशुभरडकतापसः, गुरो ! ये मोदकाः स्वामिना अत्तास्ते कियत्प्रमाणाः सन्तीति, भरडकेन तत्त्वमूढेन गोपुच्छं मुक्त्वा निजबाहुं प्रसार्यादृशत् एतावन्मात्रा इति परित्यक्ते पुच्छे सर्वेऽपि पेतुः, भग्नोपाङ्गाः केऽपि मृता इव, केऽपि तु मृता एव । एवमगीतार्थपादलग्नाः स्वर्गादिगमने अपि पतन्ति भवसमुद्रे ।।३६५।। अथ स्वर्गादिगमनयोग्यानाह –

जीवा जए के सिवसग्गजुग्गा, जाणंति जे जुग्गमजुग्गधम्मं । नाऊण मुंचंति जे अजुग्गं, धन्ना हु जुग्गं च समाचरंति ।।३६३।।

भगवन् ! के जीवाः शिवस्वर्गगमनयोग्या इति प्रश्नः । अथोत्तरः – जे जीवा योग्यं च धर्मं जानन्ति ज्ञात्वा तदयोग्यं धर्मं मुञ्चति, ज्ञात्वा च यद् योग्यं धर्मं सर्ववस्तु च समाचरन्तीति ।।३६३।।

अथ योग्यधर्मस्वरूपं यथा, इति मतिज्ञानबहुगीतार्थः –

कोऽसौ जुग्गो धम्मो, समवयकिरिओ जिणुत्तजइधम्मो । बीओ सावगधम्मो, पएसिरायव्व गहियव्वो ।।३६४।।

कोऽसौ योग्यो धर्म इति प्रश्नः । समस्तव्रतक्रियायुक्तः जिनोक्तो यतिधर्मो योग्यः, द्वितीयस्तु श्रावकधर्मः ! इति जीवानामहिंसाहेतुकानि समानि समस्तानि व्रतानि सर्वप्राणातिपातादिविरमणरूपानि व्रतानि तेषां क्रियाव्रतानामनुष्ठानरूपा यत्र स, तथा च जिनोक्तशिवमार्गरूपः सर्वपापस्थानैर्मुक्तः एवंविधो यतियोग्यः प्रथमधर्मः उत्तमः, द्वितीयात् श्रावकधर्माच्च प्रदेशिनः प्रदेशिराज्ञः स्वर्गो जातः ।।३६४।।

अथायोग्यधर्मस्वरूपं –

मिच्छदिट्ठिपवत्तिय-हिंसाइयपावठाणसंजुत्तो । संसारहेउकुतवो, जो सो धम्मो अजुग्गो य ।।३६५।।

मिथ्यादृष्टिप्रवर्तितः हिंसादिकषायस्थानसंयुक्तस्तथा संसारहेतुभूतः कुत्सितस्तपो यत्र स, एवं विरुद्धलक्षणो यो धर्मः स अयोग्यः, यत उक्तं च –

"मिथ्यादृष्टिभिराम्नातो, हिंसाद्यैः कलुषीकृतः । स धर्म इति वित्तोऽपि, भवभ्रमणकारणम् ।।" [यो.शा. प्र. २-६९]

अथ प्रदेशिराजदृष्टान्तो यथा –

आमलकप्पाणयरीए समणे भयवं महावीरे समोसढे, तत्तु सूरियाभदेवेण उक्किट्ठो नट्टविही दंसिओ । तया सिरिगोयमसामिणा भयवं वीरो पुट्ठो, भयवं ! को एस देवो, केण पुण्णेण एयस्स एरिसो रिद्धिवित्थारो त्ति । तओ भगवया तस्स पुव्वभववुत्तंतो साहिउं जहा - - सेयवियाए णयरीए पएसीराया रज्जं करेई, तस्स मंती चित्तनामा केसिकुमारसमणसमीवे सावगो जाओ । तेण चिंतियं एस पएसी नत्थिवाई जइ धम्मं पडिवज्जई तओ सुंदरं होइत्ति । विन्नत्तो केसिसामी भयवं सेयवियाए आगंतूणं पडिबोहियव्वो पएसिराया त्ति । अन्नया आगओ भयवं सेयंवियाए केसिकुमारसमणो णयरुज्जाणे, तओ चिंतियं चित्तमंतिणा एस राया महामिच्छदिट्ठी पापाणुट्ठाणसत्तो दुट्ठबुद्धी, अहं तस्स मंती, मा मइ मंतिणि विज्जमाणे एसो णरयं गच्छउत्ति, तओ एयं णेमि केणावि उवाएणं गुरुसमीवे, तओ आसवाहणियाच्छलेण णीओ सो तमुज्जाणपएसं खेयविणोयनिमित्तं, तत्थ णं केसिकुमारसमणो बहुपरिसामज्झगओ धम्मदेसणं करेइ । तओ मंतिणं पई भणियं पएसिणा किमिणं मुंडो वागरई, किं मुंडा खलु भो मुंडं पज्जुवासइ त्ति । तओ मंतिणा भणियं सामि एस पासावच्चिज्जो कुमारसमणो समग्गसुअणाणी चउणाणोववेओ पुच्छियव्वो सव्वं ति । गया गुरुसमीवे, कहिओ अणुविय जहा जुग्गो धम्मो त्ति । तउ राइणा भणियं सव्वमेयमसंबद्धं, जउ जीवो एव नत्थि पञ्चक्खगो य मारा संभवओ गगणारविंदमिव, भूयचउक्कमिव, तहा य भवओ मए सरीरभिन्नो परलोगगामी जीवो

तं अजुत्तं, जउ मम पियामहो अकराकरकारओ अभक्खभक्खओ अपेयपाणाइया कज्जकरणरओ भवओ मए, अहम्मिओ होऊण णरयं गओ भविस्सई, तस्स य ममोवरि अईवसिणेहो आसी तउ सो मम सिणेहेण कहमिहमागंतूण मं पावाओ ण णिवारेइ त्ति । कहं च ममं ण कहेइ, जमहं पावेहिं णरयं गओमि त्ति, तुमं पि पावं मा काहिसि त्ति । तम्हा सरीरमेव जीवो सरीरविणासे च विणिट्ठो परलोगगामी, पुण्णपावकम्मफलभोगी न सरीरभिन्नो जीवः । तओ केसिणा भणियं सुणसु राय ! कोवि पुरिसो सूरियकंताए सह भोए भुंजमाणो जया तए दिट्ठो होहि सो तीए सूलाए आरावेमाणो भणइ एगसो तुमं ममं मुंच, जेणाहं इमस्स कुकम्मस्स फलं अणुभवामि, तेण मम सयणाण वि णिवारेमि, मा एवं कुकर्म कायव्वं, इय कहिऊणमागच्छामित्ति, तयाऽनुमंतं तए सो मुत्तव्वो भवेत्ति । राइणा भणियं न मुंचामि । तओ केसिणा भणियं तहा तव पियामहोवि णरए कुकम्मभोत्तव्वफलाओ कम्मसंखलाबद्धो, परमाहम्मियसुरेहिं रुद्धो य सव्वहा इत्थागमणे असमत्थो कहं तुज्झ कहइ त्ति, पुणरवि राइणा भणियं मम पियामही सया सदायारिणी धम्माणुट्ठाणपरायणा दयालुआ आसि । सा तुम्ह मए सुरलोअगामिणी सावि ममोवरि अईवसिणेहपरा सा वि मं पावाओ, ण णिवारेई ण कहेइ वत्स ! कुणसु धम्माणुट्ठाणं, धम्माणुट्ठाणेणाहं देवलागं गया त्ति ण कहेइ तउ सरीरमेव जीवो. । पुणरवि गुरुणा भणियं देवा देवलोगंसि देवगणाभोगपेमबंधाइयकारणेहिं असुइमणुय-लोगदुग्गंधभीया मणुअलोअं नागच्छंति, जउ भणियं –

"संकंतदिव्वपेमा, विसयपसत्ता समत्तकत्तव्वा । अणहीणमणुअकज्जा, नरभवमसुहं नयंति सुरा ।।१०।।

[त्रैलो.दी. ३२१ बृ.सं. १९३]

इति तेण इमं धम्मफलं जाणामाणा वि गच्छामि गच्छामि इति चिंतयमाणावि असंखकालातिक्कमेण अप्पाऊआ मणुया ताव परलोगं जंति तओ कहं आगच्छइ तुम्ह कहणत्थं ति ।। पुणो वि राइणा भणियं मए एग्गो चोरो जीवमाणो कुंभीए पक्खित्तो, पिहिओ दढं पिहाणेणं मुत्ता अब्भंतरपुरिसा परितो रक्खमाणा, मओ मज्झे चोरो कड्ढिओ दिणेहिं दोहिं तिहिं विलोईओ, तस्स जीवगमणछिद्दं मणागवि न दिट्ठं, तओ तस्स जीवो कहं गओ अओ नत्थि जीवो सरीराओ अन्नोत्ति, गुरुणा भणियं निच्छिदे गिहे ठिउ कोवि भेरी वाएइ, तीए सद्दो बाहिं सुणिज्जइ न वा ? राइणा भणियं सुणिज्जइ । गुरूणा भणियं कत्थ नियओ सद्दो जहा सद्दो निग्गओ तहा अमुत्तो जीवो वि नियउ त्ति । जेण अमुत्तजीवस्स न कत्थ वि पडिव्वाओ, पुणोवि राइणा भणियं एग्गो चोरो हणिऊणं लोहकुंभीए पक्खित्तो, दित्तमुवरि लोहपिहाणं सत्तहिं दिणेहिं अवलोईओ तत्थ दिट्ठा बहवो कीडयपुंजा, ते तत्थ लोहकुंभीए कहं पविट्ठा, गुरुणा भणियं लोहगोलो धम्मिओ अग्गिणा अभिवणो जायई, तत्थ अग्गी कहं पविट्ठो । पुणरवि राइणा भणियं तरुणो कोवि पुरिसो धणुहेण बाणं दूरे खिवति, को वि बुढो वि बाणं खिवति तं बाणं दूरे न जाति, दूरं बाणखिवणे असत्तो वुद्धो, तेण जाणामि सरीरमेव जीवो त्ति । गुरुणा भणियं जो तरुणो पुरिसो जइ धणुहं पवरं होइ बाणंपि पवरं होइ तो तं बाणं दूरे खिवत्ति, जइ सिढिलं धणुहं बाणं वंकं होइ तो तं बाणं नो दूरे जाति तत्थ सामग्गीकारणं, तरुणपुरिसो हु स एव तो कहं सरीरमेव जीवो त्ति । पुणो वि राइणा भणियं को वि तरुणो पुरिसो भारं वहति तारिसं भारं वुढो असमत्थो नो वहईत्ति तेण सरीरमेव जीवो त्ति । तत्थ सरीरस्स एव सामत्थत्तं । गुरुणा भणियं तत्थ नवा सज्ञा ववहंगीया लट्ठी होइ नवाओ सज्ञाओ सिक्खियाओ

भवन्ति तो सो तरुणपुरिसो लोहाइभारं वहंगियाइ सामग्गीए वहति, जिण्णवहंगीया सिक्कगाईहिं नो वहति त्ति । पुणोवि राया भणइ, को वि चोरो मए जीवमाणो विआ तोलाविओ, पच्छा छविच्छेयं विणा मओवि तोलाविउ तत्थ कोवि विसेसो भारविसए न जाओ त्ति तेण जाणामि सरीरमेव जीवो । गुरु भणइ वायपुणचम्मकोत्थलो वायरित्तो वि सो कोत्थलओ तप्पमाणो एव भवइ त्ति, तथा जीवे गए वि तप्पमाणमेव सरीरंति, राया पुणो वि भणई एगो चारो मए सयसहस्सखंडो खंडं काऊण मज्झे बाहिं वा जीवो विलोईउ परं न दिट्ठो जीवो त्ति । गुरु भणइ केहिं वि पुरिसेहिं अडविं पविसमाणेहिं को वि पुरिसो भणिओ गिण्हहि छगणेण अग्गिं इमं च धत्तं मज्झण्हं अम्हे आगच्छिस्सामो ताव तुमं अन्नपागं कुणसु, जइ अग्गी वि न ज्झयइ वो तुमं अस्सिं च अरणिकट्ठम्मि अग्गी अत्थि तेण पागं कुज्जा, एवं भणिऊण ते गया, तउ थोववेलाए छगणग्गी बिज्झाओ तओ तेण अरणीकट्ठं विलोइयं, न दिट्ठो अग्गी, तओ अरणीकट्ठं खंडसो कयं न दिट्ठो अग्गी, तेण न जाओ, अन्नपागो ते सन्ना गया, न दिट्ठो अन्नपागो, पुच्छिओ सो पागकारी, तेण भणियं मए अग्गी न दिट्ठो तओ एगेण वियक्खणपुरिसेण अरणीकट्ठं घसिऊण अग्गी पयडीकओ विहिओपायो, तओ रायं जइ अग्गी तत्थ न होतो तो कहं निग्गओ, कहं च तेहिं दिट्ठो त्ति, तहा असंतो वि अमुत्तो जीवो, चम्मचक्खुपुरिसेहिं न दीसइ त्ति । तओ राइणा भणियं भयवं ! तुमं छेओ, तुमं दक्खो, उवएसलद्धिसंपन्नो, जइ मम करामलगमिव जीवं सरीरओ भिन्नं दंसेसि तो हं जाणामि जीवं सरीराओ भिन्नं ति । गुरुणा भणियं तिणं थावरं

वणस्सतिकायं वाएण चलमाणं राइणो दंसिऊण गुरु भणइ एअं तिणं देवो वा दाणवो वा चालइ, राया भणइ न देवो वा दाणवो वा चालइ, गुरुणा भणियं तो को चालइ । राइणा भणियं वाएणं । गुरुणा भणियं दंसेहि वायं । मम करे काउणं ति ।

पुणो वि राइणा भणियं हत्थिस्स कुंथुस्स य जीवो समाणो समप्पएसो जेहि पएसएहिं हत्थिसरीरं पूरियं ते पएसा कहं कुंथुस्स सरीरम्मि पमायंति कुंथुसरीरपएसा कहं हत्थिसरीरं पूरेई । गुरु भणई कोवि पुरिसो कोट्ठगेहं पविसिऊण सव्वओ दाराणि पिहिऊण य मज्झे पईवं कुणई स पईवो तं कोट्ठगिहं सव्वओ उज्जोवेई न कोट्ठगिहांतो दीवोज्जोयं बाहिं निस्सरई, सो चेव पईवो केणावि पुरिसेणाईव लहुभायणे मुत्तो तओ स पईवो तं चेव भायणं उज्जोहेई, पुणो वि सो चेव पईवो महइकोट्ठगिहे मुत्तो पुणो तं कोट्ठगिहं उज्जोवेइ ण वा ? एवं जीवपएसा वि अह राइणा भणियं एवं बहुजुत्तिदिट्ठंतेहिं मणसरीराओ जीवो भिन्नो मन्निओ परं सरीरमेव जीवो न सरीरओ भिन्नो जीवो एरिसा पइन्ना मम पियामहस्स वि आसि । तेण ममावि परंपरा एसा पइन्ना भवउ त्ति । गुरु भणइ रायं लोहवाहगपुरिस इव मा पच्छा पच्छातावं काहिसि । राया भणइ को लोहवाहगो त्ति । गुरु भणइ यथा केवि पुरिसा धणत्थिणो विदेसं गच्छमाणा अडवीए लोहागरं दट्ठूण जहिच्छं तेहि लोहं गहियं तओ अग्गे गच्छंतेहि तेहिं तवुआगरो दिट्ठो, तओ तत्थ बहूहिं लोहं मुत्तूण तं तवु गहीयं, गहीयलोहपुरिसेण गहीयं लोहं न तवुं, तेहिं भणिओ मुंच लोहं गिण्हाहि तवुं, न मुंचइ, तओ ते अग्गओ चलिया, अग्गे तंबं गहीयं तवुं मुत्तं एवं अग्गउ रूप्पं, अग्गउ सुवण्णं । तउ अग्गे रयणागरं, दिट्ठूणं सुवण्णं मुत्तूण रयणाणि गहिऊण आगया नियगेहाइं, लोहगाहगेण न मुत्तं लोहभारं, रयणगाहगा जहिच्छं विलसंति ।

लोहगाहगो ते दट्ठूण पच्छायावं करेई तहा तुमं पि लोहगाहगस्स व मा पच्छा पच्छायावं; एवं बहुप्पयारेण गुरुणा चोईओ राया, जहा कुलक्कमागओ वाही, कुलक्कमागयं दारिद्दं वा न पुव्विइ त्ति तेण किं कुलागयधम्मेणं, जो जुग्गो धम्मो सो चेव किज्जइ त्ति, तओ संजायतत्तनिण्णएण राइणा पडिवण्णो सावयधम्मो । ततो निरईयारं सावयधम्मं अणुचरं ततो विसएसु अरज्जंतो नत्थियवायं अजुग्गधम्मं मणंतो सासयसोक्खदायगं च जिणुत्तं धम्मं भावमाणो रज्जं पालेई । तओ विसयामिसचित्तं रायाणं जाणिऊण विसयासत्ताए सूरीकंताए भारियाए पुत्तो भणिओ तव पिया धम्मी जाओ न करेइ सो रज्जचिंतं, तो देहि विसं तेण तं न अंगीकयं । तओ तीए तवस्स पारणए दिन्नं विसं, तओ विण्णाय पिया दुट्ठकिच्चो वि मणसि संवेगपरो संसारसरूवो भावमाणो कयजिणगुरुसिद्धायधम्मविहियसरणो अणसणं काउण समाहिणा कालं काऊण सोहम्मे कप्पे सूरियाभविमाणे सूरियाभो देवो जाओ त्ति । जओ भणियं -

"बहुमुक्खसयनरयगइ गमणपडिहत्थए ।" इत्यादि ।।३६५।।

धम्मस्स णं के सवणम्मि जुग्गा, के सुणंति जे बुद्धिगुणेहि निच्चं ।
धम्मं खु निद्दा विगहाइमुक्का, के गुरूण भत्ती सुरया तिगुत्ता ।।३६६।।

भगवन् ! धर्मस्य श्रवणविषये णमिति वाक्यालंकारे । के भविका योग्या इति प्रश्नः । गुरूत्तरः - ये भव्याः बुद्धिगुणैर्धीगुणैर्युक्ता नित्यं जिनधर्मं शृण्वन्ति, तत्र बुद्धिगुणा यथा -

"सुश्रुषा श्रवणं चैव, ग्रहणं धारणं तथा । ऊहापोहोऽर्थविज्ञानं, तत्त्वज्ञानं च धीगुणाः ।।१।।" [आचा.उप. ४३]

तथा चोक्तं-

"सुस्सूसइ पडिपुच्छइ, सुणेइ गिन्हइ य इहए वावि । तत्तो अपोहए वा, धारेइ करेइ वा सम्मं ।।" [नन्दि. ८८]

श्रवणविधिश्च यथा –

"मूयं हुंकारं वा, वोढक्कार पडिपुच्छ वीमंसा । तत्तो पसंगपारायणं, चापरिनिट्ठं सत्तमए ।।१।।" [नन्दि. ८९]

प्रथमं मूकं शृणोति, द्वितीये हुंकारं ददाति, तृतीये बाढक्कारमेवमेतन्नान्यथेति, चतुर्थे किञ्चिद्विज्ञः सन् प्रतिपृच्छां करोति कथमेतदिति, पञ्चमे मीमांसाप्रमाणजिज्ञासाम्, षष्ठे प्रसङ्गः प्रश्नोत्तररूपः, सप्तमे परिनिष्ठा गुरुवदनुभाषते, किं विशिष्टाः श्रोतारो धर्मश्रवणयोग्याः, खुर्निश्चितम्, निद्राविकथामुक्ताः, निद्रायां सत्यां धर्मस्य श्रवणासंभवात्, विकथायां क्रियमाणायां च अन्येषां श्रोतृणां श्रवणव्याघातादन्तरायदोषादिसंभवात् तथा गुर्वादिधर्मकथकाचार्यादीनामाशातनादिदोषाश्च अत एव गुरुभक्तिरता भक्तिपरायणा आहारादिदानभक्तिं विना धर्मकथकाचार्यादिभिः शक्त्यभावात् कथितुमपि न पार्यते । पुनः किं विशिष्टाः श्रोतारो योग्याः ? त्रिगुप्ताः मनोवाक्कायगुप्ताः मनसा च सोपयोगा वचसा च त्यक्तवार्त्तान्तराः कायेन स्थिरासना इति ।।३६६।।

अथ धर्मश्रवणायोग्यानाह –

धम्मस्स के सवणे अजुग्गा, थेरी व मूढा बहिरासि (ढा) जे ।
वुग्गाहिया जे य कुदंसणीहिं, रत्ता य दुट्ठा तव सेला शुमा ।।३६७।।

धर्मस्य श्रवणे के पुरुषा अयोग्याः इति प्रश्नः । अथ गुरुनिर्वचनमिव - यथा सा कुग्रामवासिनी स्थविरा जरती मूढा धर्मश्रवणे मूढा अयोग्याः, तथा ये बधिरकुटुम्बतुल्यास्तेऽपि अयोग्यास्तथा ये कुदर्शनिभिर्व्युद्ग्राहिताः विप्रतारितास्तथा च ये रक्ता भार्यादिषु दृष्टिरागिणः, तथा च ये दुष्टा अतिदुष्टचित्ता इत्यादयो ये ते श्रवणायोग्या धर्मं न साधयन्ति । तत्र यथा कुग्रामस्थविरा यथा - गूर्जरनगरे कोऽपि पण्डितः श्रुति-वेद-पुराण-स्मृति-सुभाषितप्रमुखसर्वशास्त्रविचक्षणः, सुस्वरो वक्ता प्रौढवयाः वैयाकरणस्तेनानेके राजानो रञ्जिताः । एकदा तेन चिन्तितं मरुषु लोकः स्थूलबुद्धिः श्रूयते दुर्बोधश्च तानप्यहं बोधयिष्यामि इत्याशया तद्देशगमनसामग्रीं सूत्रयन् मित्रैरवादि व्यासपादाः कं कं दिशि जिगमिषवः सन्ति । स आह मरून् प्रति यास्यामः । मित्रैरवादि व्यासः ते लोका मुग्धाः पशुप्रायाः युष्मद्व्युत्पत्त्या न गृह्यते । यत उक्तं च –

"व्युत्पत्तिरावर्तितकोविदोऽपि, न रञ्जनाय क्रमते जडानाम् । न मौक्तिकछिद्रकरी, शलाका प्रगल्भते चर्मणि टङ्ककायः ।।१।।"

इति वार्यमाणोऽपि बालकवत् जगाम तत्र देशे कञ्चित् महान्तं ग्रामं प्रविवेश, तत्र क्वचिद्गृहे तत्रैकां[१] वृद्धां कृषिवलजातीयां आशीर्वादयामास । उच्चैस्तनैः काव्यानि कथाः प्रबन्धाश्च कथयति स्म । उत्थाय गतः किंकरेणैकेन निर्द्रव्येन बुभुजे, दिनानि पञ्च-सप्तानुपजरसति गत्वा गत्वा जगर्ज । यदा व्यासो गाढस्वरेण वक्ति तदा तदा जरती अश्रूणि मुञ्चति तदा व्यासो मोदते तुष्टे यद्दास्यति बहुद्रव्यमिति । एकदा सा वृद्धा चतुरो निजान् पुत्रान् स्थूलस्कन्धान् मूर्खानूचे, हे पुत्राः ! एको वराकस्तपस्वी विप्रोऽन्यदेशीयो रोगार्तः सन् समागात्, रोगश्च तस्य सोऽस्मद्वत्सतर्या आसीत् येन बाढं बाढतारैरमुत्करोतीति, तं च दृष्ट्वा अहो दयेह रोगार्तोऽयमनाश्रितश्च, तेऽप्याहुः, अस्माभिरपि रारटन् शुश्रुवे । चिकित्स्योऽयं वराकः उदारडम्भदानेनेति ज्योसी जगाद । सुष्ठु मन्त्रितं, द्वितीयदिनकथार्थं निषण्णं व्यासं चत्वारोऽपि सुताः संभूय प्रबद्धपरिकरास्तं पातयित्वोपर्योपविश्य सग्रहं कृत्वा व्यासं डम्भयन्ति स्म । व्यासो बुबूयति । तैरूचे न दम्भा मर्मणि, लग्नेषु सुखेन नेत्रे निमील्य तिष्ठेत् । अयं तु बुबूयति पुनरपि दीयते । व्यासो नेत्रे निमील्य हितः मा पुनरपि डम्भयन्तु, तैस्तु पुनरपि डम्भितः, इत्थं स्वच्छन्दं कदर्थयित्वा युक्तः डम्भव्रणेषु रूढेषु स्वगृहमगात् । लोकैराख्यायि किं तत्र गत्वाऽर्जितं तेनापि साट्टहासं दर्शिता डम्भाः, एतान्याभरणानीति कथां सर्वां कथयित्वा इष्टानेवमशिषत्,

"अगुणज्ञेषु गुणितान्, दर्शयन्नात्मनो गुणान् । कुग्रामपामरैर्व्यासः, परितुष्टैः कदर्थितः ।।१।।"

१. तत्रैका वृद्धा प.।

"गुणा गुणज्ञेषु गुणीभवन्ति, ते निर्गुणं प्राप्य भवन्ति दोषाः । सुस्वादु तोयं प्रवहन्ति नद्यः, समुद्रमासाद्य भवन्त्यपेयाः ।।२।।"

एवंविधायोग्येषु धर्मो न प्रकाश्यः । अथ बधिरा यथा –

"सूक्तमपि वैधेयं, मध्ये स्यादसमञ्जसम् । बधिरस्य कुटुम्बस्य, कथाऽत्रार्थे निशम्यताम्★ ।।३।।"

एकस्मिन् ग्रामे बधिरकुटुम्बं वसति वृद्धश्वश्रू-श्वसुरौ युवानौ च वधूवरौ सर्वेऽपि बधिराः । श्वश्रू सूत्रं कर्तयति राध्नोति च, श्वसुरो कणादिकं रक्षयति, वधू क्षेत्रे भक्तं नयति, वधूपतिस्तु हलं कृष्यति । एकदा हलं खेटयन् मार्गासन्नायातैः पान्थैः पृष्टः अयं मार्गः अमुकग्रामं याति नवा ? स तु हालिको वक्ति रे चौराः ! गृहज्ञातपोषिताविमौ बलीवर्दौ, ब्रूत ब्रूत मदीयाविमौ इत्याकर्ण्य वातकी पिशाचकी वाऽयमितः अवगणय्य गतास्ते । मध्याह्ने तत्पत्न्यानीतं भक्तं भोक्तुं निषण्णः । पत्न्याः पुरः श्मश्रुस्पर्शपूर्वं वक्ति, मया ते पान्थाः प्रगल्भतया एवं निरस्ताः । वधू वक्ति भक्तं सलवणं वा रूक्षं वा स्निग्धं वा मम किं ज्ञातं जननी जानातीति तामेव तर्जयेति गता सा श्वश्रूं प्रतिक्षेपं पत्युक्तं वक्ति । श्वश्रूचे सूक्ष्मं वा बादरं वा कर्तयामि अत्र कारर्वा, स्थाले मापि मम शाटको भावी एवं जरती साऽश्रुमुखी जरतं जल्पति । वृद्धोऽपि सभ्रूत्क्षेपं शीघ्रं जल्पति स्म अरे ! यदि मम रक्षितः एकोऽपि कणो विनश्यति तदा फालं गृह्णामि यद्वा तद्वा दिव्यं करोमि । वृद्धा तु यथातथा विगोपयति मामिति बधिरकुटुम्बे वृद्धोऽन्यत् वक्ति, वृद्धा ततोऽप्यन्यत्, वधूरपि अन्यत्, वधूपतिस्तु अन्यत् श्रुत्वा तां ताडयति प्रतिदिनं परस्परं विवदन्तीति, एवंविधा धर्मश्रवणायोग्याः, एवं कुदर्शनिव्युद्ग्राहिता अभिनिवेशमिथ्यादृष्टयः एवं रक्तास्तथा शठाः –

★ आवश्यकनिर्युक्तिप्रारम्भे अनुयोगश्रवणायोग्यशिष्यवर्णनाऽवसरे । इदमुदाहरणं हारिभद्रीयवृत्तौ दृश्यते प्राकृतभाषया ।

"दिहंबबरकूलां, दिट्ठाइं स तुज्झ चरियाइं । अन्ने वंदसु सावय, जे तुज्झ गुणा न याणंति ।।१।। इति यथा शिवश्राद्धवत्।।३६७।।

पीउसओ वि किमिहं, अइमहुरं अमियतो इ देवाणं । जह थेरीए पीअं, पणतीसगुणं च वीरगिरं ।।३६८।।

जीवा के वि अजुग्गा, नाहियवायाइभासिणो पापा वि । निग्गंतूण निगोआ, भमंति पावेहिं भवमज्झं ।।३६९।।

नास्तिकवादभाषिणः केऽपि अयोग्या जीवाः पापाः स्वयं पुण्य-पापादिफलानुभवाज्जीवस्वरूपिणोऽपि 'नास्ति जीवाजीवपुण्य-पापादिफलं' इति परोपदेशेन पापभाजः । कथमपि निगोदान्निर्गत्य पुनरपि मद्यादिप्रमादाचरणैर्निगोदे यान्ति, उपलक्षणत्वात् ते यास्यन्तीति ।।३६८-३६९।।

तत्र प्राप्तव्यवहारराशिसम्यक्त्वानां कालप्रमाणमाह -

विगय विणोयनिगोए, पुग्गलपरियट्टसयसहस्साइं । भविया वि अभविया इव, भमंति के बोहिरहिया ते ।।३७०।।

विगतो विनोद आनन्दो बहुधौकस्त्वात् समरणत्वात् यस्मात् स एवंविधो यो निगोदस्तस्मिन् विगतविनोदनिगोदे के भविका भव्यसत्त्वा अपि अभव्या इव भ्रमन्तीति प्रश्नः । अथ गुरूत्तरः - ते बोधिरहिताः येऽप्राप्तबोधयस्ते भ्रमन्तीति ।।३७०।।

अथात्र लोके किंचित् निगोदस्वरूपं यथा -

लोए असंखजोअण-माणे पइ जोअणंगुला असंखा । पइ तं असंखअंसा, पइअंसमसंखया गोला ।।३७१।।
गोलो असंखनिगोओ, सोणंतजिओ जियं पइपएसा । अस्संखपइपएसं, कम्माणं वग्गणाणंता ।।३७२।।
पइ वग्गाणं अणंता, अणूपइ अणूय अणंतपज्जाया । एवं लोगसरूवं, निगोयजीवाइयं णेयं ।।३७३।।

व्याख्या – चतुर्दशरज्ज्वात्मके जीवलोके योजनसंख्यायां चिन्त्यमानायां असंख्यातानि योजनानि भवन्ति १ । प्रतियोजनं त्वसंख्याताङ्गुलानि २ । पुनरेकस्मिन् एकस्मिन् अङ्गुले अंशा भागा असंख्येयाः ३ । पुनरेकस्मिन् एकस्मिन् अंशे प्रदेशा निर्विभागा ते असंख्येयाः ४ । पुनरेकस्मिन् एकस्मिन् प्रदेशे गोला असंख्येया भवन्ति १ । अत्र गोलकशब्देन किमुच्यते, असंख्येयनिगोदानामेकत्र संघातो मिलनरूपो गोलक उच्यते तादृशे एकस्मिन् गोलके असंख्येया निगोदा सन्ति । तत्र निगोदाः कीदृशाः ? अनन्तजीवानामेकं यच्छरीरं तद् निगोदः कथ्यते । तस्मिन् एकस्मिन् निगोदे अनन्तजीवाः सन्ति । एकस्य जीवस्य प्रदेशाः असंख्येयाः सन्ति । यदि जीवो योऽपि सोऽपि एकः निजप्रदेशान् विस्तारयति तदा संपूर्णचतुर्दशरज्ज्वात्मकजीवलोकः पूर्णो भवति एकजीवप्रदेशैरेव, एकस्मिन् जीवप्रदेशे अनन्ताः[१] कर्मवर्गणाः सन्ति । तत्र वर्गणाः कीदृशीः कथ्यन्ते, अनन्ताः कर्मपुद्गला एकत्र स्थाने मीलिताः स्युः, एवंविधस्कन्धस्य वर्गणा नाम उच्यते । तस्यां वर्गणायामेकस्यामनन्ताः परमाणवः सन्ति, एकस्मिन् परमाणौ अनन्ताः पर्यायाः सन्ति, पर्यायाश्च धवल-श्याम-नील-पीत-

१. अनन्त्यः प्र छ ।

रक्त-सुगन्ध-कर्कश-सुकुमार-रूक्ष-स्निग्ध-कटु-क्षार-मधुरेत्यादयः, एवंविधा अनन्तपर्याया एकस्मिन् सूक्ष्मपरमाणोर्मध्ये सन्तीति, एवंविधमेवंविधनिगोदादिबहुविधषड्द्रव्यरूपं लोकं ध्यानकृते चिन्त्यं, अनवगमे च यज्ञिनो वक्ति तत् सत्यम्, ।।३७१-३७३।। अथ पुद्गलपरावर्तेषु भ्रममाणो जीवो नरकादिषु यथा याति तथा पृच्छति -

बहुसोए दुहजोए, नवोवओए य तत्तवुत्तोए । कहं अमोए णरए, जंति जिया विविहपावेहिं ।।३७४।।

एवंविधे नरके जीवाः कथं केन प्रकारेण यान्तीति प्रश्नः । किंविशिष्टं **बहुशोके**त्ति बहवः शोका पापपश्चात्तापरूपा यत्र, बहुधा शोकः स यत्र तत्र, तथा **दुहजोए** त्ति, दुक्खयोगा मनो-वाक्-कायरूपा यत्र, तथा **नवोवओएत्ति** – नवानां संख्या उपयोगाः ज्ञानत्रया-ज्ञानत्रयदर्शनत्रयरूपा यत्र, तथा तप्तत्रपुरूपतोयं पानपानीयं यत्र, तथा च अमोए न विद्यते मोदो हर्षो यत्र दुःखबाहुल्येन प्रमोदावकाशाभावात्, उपपातकाले च कश्चित् सातं वेदयते । कथं ? यो हि प्राग्भवे देहच्छेदादिव्यतिरेकेण मृतोऽनतिसंक्लिष्टः समुत्पद्यते । तदानीं तस्य न प्राग्भवानुबद्धे साधिरूपं दुःखं न क्षेत्रजं निजपरमाधार्मिककृतं नापि परस्परोदीरितं देवकर्मणा वा पूर्वसांगतिकदेवप्रयुक्तः क्रियया, स च देवकृतो वेदनोपशमो मनाग् कालकृत एव, तत ऊर्ध्वं नियमात् क्षेत्रस्वभावा वेदना अन्या वा प्रवर्तते तथास्वाभाव्यात् । अथ विमाननिमित्तं वा सातं स्यात्, सम्यक्त्वोत्पादकाले हि जात्यन्धस्य लोचनलाभ इव महान् प्रवर्तते तथास्वाभाव्यात् आमोदो जायते, तदुत्तरकालमपि जातुचित् तीर्थकरगुणानुमोदनाद्यनुगतविशिष्टभावनां भावयतः, क्षेत्रवेदनासद्भावेऽप्यन्तः सातोदयो विजृम्भते अथवा कर्मानुभावेन

तीर्थकरजन्मादिकल्याणकादि बाह्यनिमित्तमधिकृत्य तथाविधसातवेद्यकर्मणोऽनुभावेन विपाकोदयेन कश्चित् सातं वेदयते, एवंविधे नरके जीवा कथं यान्तीति प्रश्नोत्तरः, विविधैः पापकर्मभिः तत्र बहुपापानि यथा –

"जो मारइ जीवाणं, अलियं जंपइ परधणं हरइ । परदारं विय वञ्चइ, बहुपावपरिग्गहासत्तो ।।१।।"

"चंडो माणी थद्धो, मायावी निट्ठुरो खरो पावो । पिसुणो संगहसीलो, साहूणं निन्दओ अहम्मो ।।२।।" [रत्नसञ्चय ५३६-५३७]

"पंचिंदियघायकरो, मणुयामिसभक्खगो कुबुद्धीओ । यदु निद्दयहियओ, दुट्ठो सरिऊं णरयम्मि सो जायइ ।।३।।"

तथा च दुहजोए त्ति कर्कशदाघशाल्मलीवृक्षादिक्षेत्रवेदनादियोगा यत्र, उक्तं च यथा –

"नरएसु जाइ अइकक्खडाइ दुक्खाइं परमतिक्खाइं । को वन्नेही ताइं, जीवंतो वासकोडी वि ।।१।।"

"कक्खडदाहं सामलि, असिवणवेयरणिपहरणसयाइं । जा जायणा उ पावंति, नारया तं अहम्मफलं ।।२।।" इति ।।३७४।। (उप.माला. २७९-२८०)

अथ नारकाणां सामान्यतो लेश्या दर्शयति –

किण्हाई तिलेसाणं, परिणामेहिं च नारया हुंति । परिणामेहिं हुंति य, देवा तेऊलेसाइं★ तिण्हं च ।।३७५।।

★ सामान्यतः सङ्ग्रहणिगाथा अत्रेमाः- "किण्हा नीला काऊ, तेऊ लेसा य भवणवंतरिया । जोइससोहम्मीसा-ण तेउलेसा मुणेयव्वा ।।१।।
कप्पे सणंकुमारे, माहिंदे चेव बंभलोए य । एएसु पम्हलेसा, तेण परं सुक्कलेसा उ ।।२।।

पढवी आउ वणस्सइ, वायर-पत्तेय लेस चत्तारि । गब्भयतिरियनरेसुं, छल्लेसा, तिन्नि सेसाणं ।।३।। प्रज्ञा० १७ पद २ उ० ।

(२०) लक्षणद्वारम् -

पंचासवप्पमत्तो, तीहिं अगुत्तो छस्सु अविरओ य । तिव्वारंभपरिणओ, खुद्दो साहस्सिओ नरो ।।२१।।
निद्धंधसपरिणामो, निस्संसो अजिइंदिओ । एयजोगसमाउत्तो, कण्हलेसं तु परिणमे ।।२२।।
इस्साअमरिसअतवो, अविज्जमाया अहीरिया । गेही पओसे य सढे, पमत्ते रसलोलुए ।।२३।।
सायगवेसए आरंभायविरओ, खुद्दो साहस्सिओ नरो । एयजोगसमाउत्तो, नीललेसं तु परिणमे ।।२४।।
वंके वंकसमायारे, नियडिल्ले अणुज्जुए । पलिउंचग ओवहिए, मिच्छदिट्ठी अणारिए ।।२५।।
उप्फालगदुट्ठवाई य, तेणे अवि य मच्छरी । एयजोगसमाउत्तो, काउलेसं तु परिणमे ।।२६।।
नीआवित्ती अचवले, अमाई अकुऊहले । विणीयविणए दंते, जोगवं उवहाणवं ।।२७।।
पियधम्मे दढधम्मे, वज्जभीरू हिएसए । एयजोगसमाउत्तो, तेउलेसं तु परिणमे ।।२८।।
पयणुक्कोहमाणे य, मायालोभे य पयणुए । पंसतचित्ते दंतप्पा, जोगवं उवहाणवं ।।२९।।
तहा य पयणुवाई य, उवसंते जिइंदिए । एयजोगसमाउत्तो, पम्हलेसं तु परिणमे ।।३०।।
अट्टरुद्दाणि वज्जित्ता, धम्मसुक्काणि झायए । पसंतचित्ते दंतप्पा, समिए गुत्ते य गुत्तिसु ।।३१।।
सरागे वीयरागे वा, उवसंते जिइंदिए । एयजोगसमाउत्तो, सुक्कलेसं तु परिणमे ।।३२।।

पञ्चाश्रवाः-हिंसादयस्तैः प्रमत्तः-प्रमादवान् पञ्चाश्रवप्रमत्तः पाठान्तरतः पञ्चाश्रवप्रवृत्तो वा अतस्त्रिभिः प्रस्तावान्मनोवाक्कायैः अगुप्तः-अनियन्त्रितो मनोगुप्त्यादिरहित इत्यर्थः, तथा षट्सु-पृथ्वीकायादिषु अविरतः अनिवृत्तस्तदुपमर्दकत्वादेरिति गम्यते, अयं चातीव्रारम्भोऽपि स्यादत आह-तीव्र उत्कटाः स्वरूपतोऽध्यवसायतो वा आरम्भाः-सावद्यव्यापारास्तत्परिणतः-तत्प्रवृत्त्या तदात्मतांगतः, तथा क्षुद्रः-सर्वस्यैवाहितैषी कार्पण्ययुक्तो वा, सहसा-अपर्यालोच्य गुणदोषान् प्रवर्त्तत इति साहसिकः, चौर्यादिकृदिति योऽर्थः, नरः-पुरुषः

उपलक्षणत्वात्स्त्र्यादिर्वा 'णिद्धंधस' त्ति अत्यन्तमैहिकामुष्मिकापायशङ्काविकलोऽत्यन्तं जन्तुबाधानपेक्षो वा परिणामोऽध्यवसायो वा यस्य स तथा 'णिस्संसो' त्ति नृशंसः-निस्तृंशो जीवान् विहिंसन् मनागपि न शङ्कते, निःशंसो वा-परप्रशंसारहितः । अजितेन्द्रियः-अनिगृहीतेन्द्रियः, अन्ये तु पूर्वसूत्रोत्तरार्द्धस्थान इदमधीयते तच्चेहेति, उपसंहारमाह एते च ते अनन्तरोक्ता योगाश्च-मनोवाक्कायव्यापारा एतद्योगाः-पञ्चाश्रवप्रमत्तत्वादयस्तैः समिति-भृशमाङित्यभिव्याप्त्या युक्तः अन्वितः एतद्योगसमायुक्तः कृष्णलेश्यां तुः-अवधारणे कृष्णलेश्यामेव परिणमेत् तद्द्रव्यसाचिव्येन तथाविधद्रव्यसम्पर्कात्स्फटिकवत्तदुपरञ्जनात्तद्रूपतां भजेत्, उक्तं हि-"कृष्णादिद्रव्यसाचिव्यात्परिणामो य आत्मनः । स्फटिकस्येव तत्रायं, लेश्याशब्दः प्रयुज्यते ।।१।।" एतेन पञ्चाश्रवप्रमत्तत्वादीनां भावकृष्णलेश्यायाः सद्भावोपदर्शनादमीषां लक्षणत्वमुक्तम्, यो हि यत्सद्भाव एव भवति स तस्य लक्षणं यथौष्ण्यमग्नेः, एवमुत्तरत्रापि लक्षणत्वभावना कार्या। नीललेश्यालक्षणमाह-ईर्ष्या च परगुणसहनम्, अमर्षश्च-अत्यन्ताभिनिवेशः, अतपश्च-तपोविपर्ययः अमीषां समाहारनिर्देशः, 'अविज्ज' त्ति अविद्या-कुशास्त्ररूपा माया-वञ्चनात्मिका अह्रीकता च-असमाचारविषया निर्लज्जता गृद्धिः-अभिकाङ्क्षा विषयेष्विति गम्यते, प्रदोषश्च-प्रद्वेषः मतुब्लोपादभेदोपचाराद्वा सर्वत्र तद्वान् जन्तुरुच्यते अत एव शठः अलीकभाषणात् प्रमत्तः प्रकर्षेण जात्यादिमदासेवनात् पाठान्तरतः शठश्च मत्तः, तथा रसेषु लोलुपो-लम्पटो रसलोलुपः, सातं-सुखं तद्गवेषकश्च-कथं मम सुखं स्यादिति बुद्धिमान् आरम्भात्-प्राण्युपमर्दात् अविरतः-अनिवृत्तः क्षुद्रः-साहसिको नरः एतद्योगसमायुक्तो नीललेश्यां परिणमेत्, तुः-प्राग्वत् पुनरर्थो वा ४ वक्रः-वचसा 'वक्रसमाचारः' क्रियया, निकृतिमान्-मनसा, अनृजुकः-कथंचिदृजूकर्त्तुमशक्यतया 'पलिउंचग' त्ति प्रतिकुञ्चकः-स्वदोषप्रच्छादकतया उपधिः-छद्म तेन चरत्यौपधिकः, सर्वत्र व्याजतः प्रवृत्तेः, एकार्थिकानि वैतानि नानादेशजविनेयानुग्रहायोपात्तानि, मिथ्यादृष्टिरनार्यश्च प्राग्वत्, 'उप्फालग' त्ति उत्प्रासकं यथा पर उत्प्रास्यते दुष्टं च रागादिदोषवद्यथा भवत्येवं वदनशील उत्प्रासकदुष्टवादी, चः-समुच्चये स्तेनः-चौरः चः-प्राग्वत् अपि च-इति पूरणे मत्सरः परसम्पदसहनं सति वा वित्ते त्यागाभावः, तथा चाहुः शाब्दिकाः-"परसम्पदामसहनं, वित्तात्यागश्च मत्सरो ज्ञेयः" इति, तद्वान् मत्सरी, एतद्योगसमायुक्तः कापोतलेश्यां 'तुः' इति पुनः परिणमेत् ।। 'णीयावित्ति' त्ति नीचैर्वृत्तिः-कायमनोवाग्भिरनुत्सिकः अचपलः-चापलानुपेतः अमायी-शाठ्यानन्वितः अकुतूहलः-कुहकादिष्वकौतुकवानत एव विनीतविनयः-स्वभ्यस्तगुर्वाद्युचितप्रतिपत्तिः, तथा दान्तः इन्द्रियदमेन योगः-स्वाध्यायादिव्यापारस्तद्वान्, उपधानवान्-विहितशास्त्रोपचारः प्रियधर्मा अभिरुचितधर्मानुष्ठानः द्रढधर्मा-अङ्कीकृतव्रतादिनिर्वाहकः किमित्येवम् ?, यतः 'वज्ज' त्ति वर्ज्यम् प्राकृतत्वादकारलोपे अवद्यं चोभयत्र पापं तद्भीरुः हितैषकः-मुक्तिगवेषकः, पाठान्तरतो हिताशयो वा-परोपकारचेताः पठ्यते च-'अणासवे' त्ति तत्र च न विद्यन्ते आश्रवा—हिंसादयो यस्यासावनाश्रवः, एतद्योगसमायुक्तस्तेजोलेश्यां तु परिणमेत् । प्रतनू-अतीवाल्पौ क्रोधमानौ यस्य स तथा, चः-पूरणे माया लोभश्च उक्तरूपाः । प्रतनुको यस्येति शेषः, अत एव प्रशान्तं-प्रकर्षेणोपशमवञ्चित्तमस्येति प्रशान्तचित्तः, दान्तः-

तत्र लेश्यापरिणामः

"कृष्णलेश्यान्वितो जीवो, निर्दयः कलहप्रियः । रौद्रानुबन्धवैरश्च, चौरो लोकस्य भावकाः ।।१।।"

"मन्दो बुद्धिविहीनश्च, मानी विषयलालसः । निद्रालुरलसो मानी, नीललेश्यान्वितोऽसुमान्[१] ।।२।।"

"कापोतीसंगतो व्यभात् तु सद्ध्यान्धप्रकाशकः । न प्रत्येति परं जातु, स्तूयमानस्तु तुष्यति ।।३।।"

"दयादानरतो नित्यं, कृत्याकृत्यं च वेत्त्यसौ । प्रेक्षते च समवर्षा, निजसीमायिनोऽसुमान् ।।४।।"

"त्यागो चोक्षः क्षमाशाली, पूज्यपूजापरायणः । अवक्रकर्मसंयुक्तः, पद्मलेश्यानुभावतः ।।५।।"

अहितप्रवृत्तिनिवारणतो वशीकृत आत्मा येन स तथा, योगवानुपधानवानिति च प्राग्वत्, तथा प्रतनुवादी-स्वल्पभाषकश्चशब्दो भिन्नक्रमो योक्ष्यते, उपशान्तः अनुद्धटतयोपशान्ताकृतिः जितेन्द्रियश्च-वशीकृताक्षः एतद्योगसमायुक्तः पद्मलेश्यां तु परिणमेत् ।। आर्त्तरौद्रे-उक्तरूपे ध्याने वर्जयित्वा परिहृत्य धर्मशुक्ले-प्रागुक्ते एव शुभध्याने साधयेत्-सततान्यासतो निष्पादयेत्, यः कीदृशः सन् ? इत्याह-प्रशान्तचित्तो दान्तात्मेति च प्राग्वत्, पाठान्तरतश्च ध्यायति यो विनीतविनयो दान्तः समितः-समितिमान् गुप्तश्च निरुद्धसमस्तव्यापारः गुप्तिभिः-मनोगुप्त्यादिभिः, तृतीयार्थे सप्तमी, स च सरागः-अक्षीणानुपशान्तकषायतया वीतरागो वा ततोऽन्य उपशान्तः, पाठान्तरतः शुद्धयोगो वा-निर्दोषव्यापारो जितेन्द्रियः प्राग्वत्, स एतद्योगसमायुक्तः शुक्ललेश्यां तु परिणमति, इह च शुभलेश्यासु केपाञ्चिद्विशेषणानां पुनरुपादानेऽपि लेश्यान्तरविषयत्वादपौनरुक्त्यम्, पूर्वपूर्वापेक्षयोत्तरोत्तरेषां विशुद्धितः प्रकृष्टत्वं च भावनीयम्, विशिष्टलेश्या वाऽपेक्ष्यैवं लक्षणाभिधानमिति न देवादिभिर्व्यभिचार आशङ्कनीय इति द्वादशसूत्रार्थः ।। उत्त० ३४ अ० ।।

१. पुमान् प्र छ ।

"अपक्षपाती सर्वत्र, न निदानविधायकः । राग-द्वेषविहीनश्च शुक्ललेश्यान्वितोऽसुमान् ।।६।।" ।।३७५।।

अत्र पुरुषषट्कदृष्टान्तः -

बहुपुग्गलपरियट्टा, कया य पुव्विं अगंठिभेएणं । जीवेण को वि ते वि य, सो अन्नोऽसंमत्तो वा करिस्सइ ।।३७६।। त्ति।

व्याख्या – अशुभकर्मवेष्टितेनानादिना जीवेन संसृतिपरिभ्रमणं कुर्वता बहुपुद्गलपरावर्त्ताः कृताः, किंविशिष्टेनात्मना ते कृताः ? **'अगंठिभेएणं'** ति न विद्यते ग्रन्थिभेदो यत्र जीवे सोऽग्रन्थिभेदस्तेन, तत्र को नाम ग्रन्थिर्यदुक्तं च - "मोहनीयकर्मनिर्मितोऽत्यन्तदुर्भेदरूपो ग्रन्थिः, भणियं च -"

"गंठि त्ति सुदुब्भेओ, कखडघणगूढरागगंठि व्व । जीवस्स कम्मजणिओ, घणरागद्दोसपरिणामो ।।१।।" (संबोध प्रक. ८६४)

तथा च कोऽपि जीवः, **'ते वि'** त्ति तान् पुद्गलपरावर्तान् बहून् **असंमत्तो** त्ति, अप्राप्तसम्यक्त्वः सन् करिष्यति, **'सोत्ति'** स पूर्वोक्तो जीवो बहून् पुद्गलपरावर्तान् करिष्यति अन्यो वा अप्राप्तसम्यक्त्वः सन् करिष्यतीति गाथार्थः ।।३७६।। तत्र पुद्गलपरावर्तस्वरूपं यथा -

दव्वे खित्ते काले भावे, चउहा दु बायरो सुहुमो । होइ अणंतुस्सप्पिणिपरिणामो पुग्गलपरिअट्टो ।।३७७।।

व्याख्या – द्रव्य-क्षेत्र-काल-भावानाश्रित्य चतुर्धा पुद्गलपरावर्त्तो भवतीत्युत्तरेण संबन्धः पुनरेकैको द्विधा द्विप्रकारो भवति, तथाहि बादरः सूक्ष्मश्च । अयमर्थः द्रव्य-क्षेत्र-काल-भावपरावर्ताश्चत्वारो भवन्ति ।

तेऽपि च प्रत्येकं बादराः सूक्ष्माश्च स्युः, कियत्कालप्रमाणः पुनरेकैक इत्याह । **'होइ अणंतु'** त्ति भवति जायते, उत्सर्पन्ति प्रतिसमयकालप्रमाणं जन्तूनां वा शरीरायुःप्रमाणादिकमपेक्ष्य वृद्धिमनुभवन्तीत्युत्सर्पिण्यस्ततो अनन्ता उत्सर्पिण्य उपलक्षणत्वादव[1] सर्पन्ति प्रतिसमयं कालमानं शरीरप्रमाणादिकमपेक्ष्य हानिमनुभवन्तीत्यवसर्पिण्यस्ताश्च परिमाणं यस्य सोऽनन्तोत्सर्पिण्यवसर्पिणीपरिमाणः पूरण-गलनधर्माणः पुद्गलास्तेषां चतुर्दशरज्ज्वात्मकलोकाकाशवर्तिसमस्तपरमाणूनां परावर्त औदारिकशरीरतया गृहीत्वा मोचनं यस्मिन् कालविशेषे स पुद्गलपरावर्तः, यद्यपि क्षेत्रादिविषयस्य पुद्गलपरावर्तत्वरूपोऽन्वर्थो न घटते तथापि अन्यथा व्युत्पादितस्य शब्दस्यान्यथा गोशब्दवत् प्रवृत्तिदर्शनात् समयप्रसिद्धेस्तमर्थं विषयीकरोतीति न दोष इति ।।३७७।। यथोद्देशनिर्देशमिति क्रमप्राप्तं बादर-सूक्ष्मपुद्गलपरावर्तस्वरूपं प्ररूपयन्नाह –

"उरलाइसत्तगेणं, एग जीओ मुअइ फुसिय सत्ततणू[2] । जत्तियकालि सथूलो, दव्वे सुहुमो सगन्नयरा ।।३७८।।"

सूचकत्वात् सूत्रस्य औदारिकादिसप्तकत्वेन औदारिकपरमाणूनौदारिकशरीरतया आदिशब्दाद् वैक्रियपरमाणून् वैक्रियशरीरतया तैजसपरमाणून् तैजसशरीरतया कार्मणपरमाणून् कार्मणशरीरतया भाषापरमाणून् भाषात्वेन प्राणापानपरमाणून् प्राणापानतया मनोवर्गणापरमाणून् मनस्त्वेन न पुनराहारकशरीरमप्यत्र ग्राह्यं कादाचित्कत्वात् तल्लाभस्येति स्पृष्ट्वा परिणय्य तथा परिणामं नीत्वा एकजीवो विवक्षितैकसत्त्वो मुञ्चति । सर्वाणूंश्चतुर्दशरज्ज्वात्मकलोकसमस्तपरमाणून्, **जत्तियकालत्ति**-यावता कालेन विभक्तिव्यत्ययश्च प्राकृतत्वात्,

१. ०सर्पति प्र० । २. सव्वतणू प्र० ।

स्वप्राकृतलक्षणे व्यत्ययोऽप्यासामिति । स इत्थं पुद्गलस्पर्शनेनोपमितिकालविशेषः स्थूलो बादरो **दव्वत्ति**-द्रव्यपुद्गलपरावर्तो भवतीति प्रक्रमः । इह किल संसारकान्तारे पर्यटन्नेकजीवोऽनेकैर्भवग्रहणैः सकललोकवर्तिनः सर्वानपि पुद्गलान् यावता कालेन औदारिक शरीरादिसप्तभावेन यथास्वं परिणमय्य मुञ्चति । स तावत् कालप्रमाणः द्रव्यतो बादरपुद्गलपरावर्तो भवतीति तात्पर्यम् । सूक्ष्मद्रव्य-पुद्गलपरावर्तमाह - सप्तनामौदारिकसप्तकस्य मध्यादन्यतरेण पुनरेकेन केनचिदौदारिकादिना पूर्वप्रदर्शितप्रकारेण सकललोकवर्तिपुद्गलानां स्पर्शने औदारिकादिशरीरतया गृहीत्वा मोचने सूक्ष्मद्रव्यपुद्गलपरावर्त्तो भवति । विवक्षितभेदावशेषैः षड्भिर्भेदैः परिणता अपि तद् गृह्यन्ते इति । एके त्वाचार्या द्रव्यपुद्गलपरावर्तस्वरूपं प्रतिपादयन्ति - तथाहि - यदैको जीवो अनेकैर्भवग्रहणैरौदारिक-वैक्रिय-तैजस-कार्मणशरीर-चतुष्टयरूपतया यथास्वं सकललोकवर्तिनः पुद्गलान् परिणमय्य मुञ्चति, शेषशरीरपरिणतास्तु न गृह्यन्ते एव, तदा सूक्ष्मो द्रव्यपुद्गलपरावर्तो भवतीत्युक्तो द्वेधाऽपि द्रव्यपुद्गलपरावर्तः, ।।३७८।। संप्रति क्षेत्र-काल-भाव- पुद्गलपरावर्तान् बादर-सूक्ष्मभेदभिन्नान् निरूपयन्नाह -

"लोगपएसोसप्पिणि, समया अणुभागबंधठाणा य । जह तह कममरणेणं, पुट्ठा खित्ताइ थूलियरा ।।३७९।।"

लोकस्य चतुर्दशरज्ज्वात्मकक्षेत्रखण्डस्य प्रदेशा निर्विभागा लोकप्रदेशाः, तथोत्सर्पिणिसमया अवसर्पिणिसमया अपि उपलक्षणतो दिनग्रहणेन रात्रिग्रहणवत् तयोः समया परमनिकृष्टा कालविशेषाः, समयस्वरूपं च पट्टशाटिकापाटनदृष्टान्ता उत्पलपत्रशतभेदोदाहरणाच्चावसेयम्, ततो द्वन्द्वः, तथाऽनुभागस्य रसस्य बन्धस्तस्य निमित्तानि स्थानानि कषायोदयविशेषलक्षणानि, अनुभागबन्धा-

ध्यवसायस्थानानि चः समुच्चये, ततश्चैते प्रत्येकं त्रयोऽपि पदार्थाः प्रत्येकं यथा तथा मरणेन क्रमोत्क्रमाभ्यां मरणेन स्पृष्टा व्याप्ता भवन्ति तदा क्षेत्रादयः, क्षेत्र-काल-भावपुद्गलपरावर्ता बादरा भवन्ति । यदा पुनस्त एव लोकाकाशप्रदेशा उत्सर्पिण्यवसर्पिणीसमया अनुभाग-बन्धाध्यवसायस्थानानि च प्रत्येकं क्रममरणेन पूर्वस्पृष्टाकाशप्रदेशादिभ्यो व्यवधानतो मरणेन स्पृष्टा भवन्ति तदा क्षेत्र-काल-भावपुद्गलपरावर्ताः क्रमेण सूक्ष्मा भवन्तीति गाथार्थः । भावार्थः पुनरयं-यदा अनन्तभवभ्रमणशीलो जन्तुरनन्तरेषु व्यवहितेषु वाऽपरापरा-काशप्रदेशेषु मृतस्ते न गण्यन्ते, अपूर्वास्तु दूरव्यवहिता अपि स्पृष्टा गण्यन्ते एवेति १ । कालतस्तु यदोत्सर्पिणीसमयेषु सर्वेष्वपि क्रमेणोत्क्रमेण नानन्तानन्तैर्भवैरेको जन्तुर्मृतो भवति तदा बादरः कालपुद्गलपरावर्तः । केवलं येषु समयेषु एकदा मृतोऽन्यदापि यदि तेष्वेव समयेषु म्रियते तदा ते न गण्यन्ते, यदा पुनरेकद्विसमयक्रममुल्लङ्घ्यापि अपूर्वेषु समयेषु म्रियते तदा ते व्यवहिता गण्यन्ते २ । अथ भावतः पुद्गलपरावर्त उच्यते, अनुभागबन्धाध्यवसायस्थानानि मन्दप्रवृद्धेतरादिभेदतोऽसंख्येयानि स्युः, एतेषां चासंख्येयत्वमुत्तरत्र वक्ष्यामः । ततो यदैकस्मिन्ननु-भागबन्धाध्यवसायस्थाने क्रमेणोत्क्रमेण म्रियमाणेन जन्तुना, असंख्येयलोकाकाशप्रदेशप्रमाणानि सर्वाण्यपि तानि स्पृष्टानि स्युस्तदा बादरो भावपुद्गलपरावर्तः । अत्रापि यदध्यवसायस्थानेषु तमेकदा मरणेन स्पृष्टं तदेवान्यदापि यदि स्पृशति तदा तन्न गण्यते । अपूर्वं तु दूरव्यवहितमपि स्पृष्टं गण्यते एवेति भाविता बादराः क्षेत्र-काल- भावपुद्गलपरावर्ताः - संप्रत्येत एव सूक्ष्मा भाव्यन्ते - इह यथाकाश-प्रदेशावगाढे जन्तुरेकदा मृतस्तेभ्योऽनन्तरेष्वेव नभःप्रदेशेष्वन्यदापि म्रियतेऽन्यस्यां च वेलायां तेषामप्यनन्तरेष्वेव नभःप्रदेशेष्वपरस्यां

वेलायां तेषामप्यनन्तरेष्वेवं तावन्नेयं यावदित्थमपरेषु नैरन्तर्यव्यवस्थितेषु नभःप्रदेशेषु म्रियमाणो जन्तुः सर्वानपि लोकाकाशप्रदेशान् स्पृशति, ये चापरप्रदेशावृद्धिरहिताः पूर्वावगाढा एव दूरस्था वाऽऽकाशप्रदेशा मरणेन स्पृष्टास्ते च न गण्यन्ते तदा सूक्ष्मः क्षेत्रपुद्गलपरावर्तः स्यादिति । पञ्चसंग्रहशास्त्रेषु द्विविधेऽपि क्षेत्रपुद्गलपरावर्ते मरणसमये जीवस्पृष्टानामाकाशप्रदेशानां त्वेकैक एव प्रदेशः प्रति मरणं गण्यते नान्ये गणनाः, एतत्प्रतिपत्तिस्तु जीवस्थानप्रदेशानामन्यतमं प्राधान्येन परिकल्प्य ज्ञेया एवं प्रभूतकालता स्यादिति । सूक्ष्मस्तु कालपुद्गलपरावर्तस्तदा स्यात् यदोत्सर्पिण्योऽवसर्पिण्यो वा प्रथमसमये कश्चिन्मृतः, पुनरपि स एव जन्तुः समयोनविंशतिसागरकोटाकोटीष्वतिक्रान्तासु तस्या एव द्विसमये म्रियते ततः पुनरपि कदाचित् तथैव तस्या एव तृतीये म्रियते, एवं चतुर्थपञ्चमषष्ठादिसमयक्रमेण यावत् सर्वेऽपि विंशतिसागरकोटाकोटीमानयोरुत्सर्पिण्यवसर्पिण्योः समयाः मरणेन व्याप्ता भवन्ति, ये तु प्रथमादिक्रममुल्लङ्घ्य व्यवहिताः समयाः पूर्वस्पृष्टा वा मरणेन व्याप्तास्ते न गण्यन्ते एवेति । सूक्ष्मभावपुद्गलपरावर्तस्तु एवं इहानुभागबन्धाध्यवसायस्थानानि बध्यमानकर्मपुद्गलेषु तादृशानुभागः पलिच्छेदनिर्वृत्तकान्यसंख्येयलोकाकाशप्रदेशमानानि भवन्ति, मन्दप्रवृद्धेतरादिभेदेन तत्र च सर्वस्तोकानुभागपलिच्छेदजनके कषायोदयरूपे अनुभागबन्ध्याध्यवसायस्थाने वर्तमानः कश्चिज्जन्तुर्मृतः पुनरपि तस्माद् विशेषाधिकानुभागपलिच्छेदजनकेऽनन्तरव्यवस्थिते द्वितीये वर्तमानो मृतः । पुनरपि तस्माद् विशेषाधिकानुभागपलिच्छेदजनकेन तृतीये एवं क्रमेण विशेषाधिकानुभागपलिच्छेदजनकाध्यवसायस्थानेषु वर्तमानस्य मरणं तावद् वाच्यम्, यावत्

सर्वोत्कृष्टानुभागपलिच्छेदजनकोऽध्यवसायस्थाने म्रियमाणेनानन्तानन्तैर्मरणैः सर्वाण्यपि स्पृष्टानि स्युः । व्यवहितानि पूर्वस्पृष्टानि च न गण्यन्ते, इति पुद्गलपरावर्तस्वरूपम् । एवंविधपुद्गलपरावर्ता जीवेन पूर्वमकृतग्रन्थिभेदेन कृतम्, कोऽप्यप्राप्तसम्यक्त्वो जीवः करिष्यति तान् बहुपुद्गलपरावर्तानिति गाथार्थः ।।३७९।। अथ येन ते पुद्गलपरावर्ताः छिन्नाः स उच्यते ।।३७९।।

पुग्गलपरिग्गहेहिं, अपरित्तो चिय स परित्तो । संसारो हु दयाए, विणु सम्मत्तेण मेहेणं परित्तो ।।३८०।।

(पयः) पुद्गलपरावर्तैरपरित्तः अपर्यन्तः संसारो वर्तते स संसारो दयापत्तिर्दयया करुणयाऽनुकम्पयेति यावत् मेघेन मेघकुमारेण परित्तः सपर्यन्तो निर्वर्तितः परित्तीकृतः, किंविशिष्टेन मेघेन विना सम्यक्त्वेन-सम्यक्त्वं विनापि केवलदयापरिणामेन हस्तिजन्मनीति भावार्थः । तस्य संक्षिप्तार्थो यथा – अन्नया कयाइ समणे भयवं रायगिहे समोसढे, पडिगता तत्थ पडिबद्धो सेणियपुत्तो मेघकुमारो, गहिया दिक्खा । अप्पिओ थेराणं तेहिं तद्दिवसे संथराविओ, सिज्जादुवारदेसे । तओ तत्थ आगच्छमाणाणं निगच्छमाणाणं निग्गंथाणं पायसंघट्टेहि रेणुगुंडणेहिं भग्गचरणपरिणामो पभाए आगओ सामिसमीवं णाओ भयवया तस्स परिणामो, कहिओ तस्स पुव्वहत्थिभववुत्तंतो, जइ मेहा तए पाणाणुकंपयाए भूयाणुकंपयाए जीवाणुकंपयाए सत्ताणुकंपयाए से पाए नो चेणं ससय उवरिं निक्खत्ते ततेणं तुमं मेहा ताए पाणाणुकंपयाए संसारे परित्तीकए माणुस्साऊए निबद्धे अपडिलद्धसम्मलंभेण से पाए पाणाणुकंपयाए अंतरा चेव धारिए नो चेव णं तस्स ससयस्सुवरि णिखत्ते तो किमंग ! पुण विपुलसमुब्भवेणं निग्गंथाणं हत्थयसंघट्टाइयं नो सम्मं सहसि नो खमसि, जाव नो अहियासेसि, ततेण तस्स मेहस्स

समणस्स भगवओ कहियं सव्वं सुमाणस्स शुभेणं परिणामेणं जाइसरणे समुप्पन्ने जाय दुगणसंवेगे समणं भयवं एवं वयासी अज्जप्पभित्ती णं भंते मम दो अत्थाणि मोत्तूणं अवसेसे काए समणाणं निग्गंथाणं णिसिट्ठेत्ति कट्टु दुच्चंपि गहियदिक्खो, ततो बारस भिक्खुपडिमा सम्मं आराहित्ता ततो गणरयणतवोकम्मेण सरीरे, अंते सट्ठिभत्ताइं छेदित्ता कालं काऊण विजयविमाणे देवत्ताए उववन्ने महाविदेहे सिज्झिस्सइ त्ति । आरामिएण केणय, थोवजलाओ य पउरजलमज्झे । सदएणं पंचमत्था, मुत्ता रज्जाइयं पत्तं ।।३८०।। इति धीयोग्यायोग्यं धर्मश्रवणयोः।

गुरो कह होई पढमलाहो, अपत्तसामाइयाण जीवाणं । सामाइयस्स चऊहा, पल्लयपमुहाण दिट्ठंता ।।३८१।।

गुरोः अप्राप्तसामायिकादिकजीवानां चतुर्धा सामायिकस्य सम्यक्त्वसामायिक-श्रुतसामायिक-देशविरतिसामायिकसर्वविरति-सामायिकरूपस्य संसारेऽनादिभ्रममाणानां प्रथमलाभः कथं केन प्रकारेण भवतीति । गुरूत्तरः – पल्यप्रमुखाणां दृष्टान्तात्, तान् दर्शयति-

पल्लयगिरिसिरिउवला, पिवीलिआ पुरिसपहजरग्गहिआ । कुद्दवजलवत्थाणि, ये सामाइयलाभदिट्ठंता ।।३८२।।

तत्र पल्लकदृष्टान्तो यथा – पल्लको लाटदेशे धान्यमानविशेषः, तत्र यथा कश्चिन्महति पल्ले धान्यं क्षिपति, स्वल्प-स्वल्पतरं चोपचिन्वन् बहु बहुतरं चाचिन्वन् क्षपयन् ग्रन्थिमासादयति पुनस्तामतिक्रमतोऽपूर्वकरणं भवति । सम्यग्दर्शनलाभाभिमुखस्य चानिवृत्तीति एष पल्लंकदृष्टान्तः १ । गिरिसरित्, तस्य उपलाः पाषाणाः, तद्वत् एतदुक्तं गिरिसरिदुपलाः परस्परं संनिघर्षेणोपयोगशून्या अपि विचित्राकृतयो जायन्ते । एवं जीवाः

यथाप्रवृत्तिकरणतस्तथाविधकर्मस्थितिविचित्रा जायन्ते । पिपीलिकाः कीटिकाः यथा तासां क्षितौ स्वभावगमनं यः संजातपक्षाणां च स्थाण्वारोहणं तस्मादुत्पतनं च स्थाणुमूर्धनि निवासावस्थानं कासांचित् स्थाणुशिरसः प्रत्यवसर्पणं एवमिह जीवानां कीटिकास्वभाववत् यथाप्रवृत्तिकरणम्, स्थाण्वारोहणकल्पं त्वपूर्वकरणम्, उत्पतनतुल्यमनिवृत्तिकरणमिति स्थाणुपर्यन्तावस्थानसदृशं तु ग्रन्थ्यवस्थानमिति । स्थाणुशिरसः प्रत्यवसर्पणसमानं तु पुनः कर्मस्थितिवर्धनम् । पुरुषदृष्टान्तो यथा – केचन त्रयः पुरुषाः महानगरगमनेच्छया महाटवीं प्रपन्नाः सुदीर्घमध्वानमतिक्रान्तः । कालातिपातभीरवो भयस्थानमाढौकमानाः शीघ्रतरगतयो गच्छन्तः पुरस्तादुभयतः समुत्खातकरवालपाणितस्करद्वयमालोक्य तत्रैकः प्रतीपमनुप्रयातः, परस्तु ताभ्यां गृहीतस्तथा अपरस्तु तावतिक्रम्येष्टं नगरमनुप्राप्तः । अयं दृष्टान्तोऽयमुपनयः - एवमिह संसाराटव्यां त्रयः पुरुषाः कल्पन्ते, पन्थाः अतिदीर्घा कर्मस्थितिः, भयस्थानं तु ग्रन्थिदेशः, तस्करद्वयं तु राग-द्वेषौ प्रतीपगौ यो यथाप्रवृत्तिकरणेन पुनः ग्रन्थिदेशमासाद्यानिष्टपरिणामः सन् कर्मस्थितिमुत्कृष्टामासादयति । तस्करद्वयावरुद्धप्रबलराग-द्वेषोदयः 'ग्रन्थिकसत्त्व' इत्यर्थः । अभिलषितनगरप्राप्तोऽपूर्वकरणतो राग-द्वेषचारावपाकृत्यानिवृत्ति-करणेनावाप्तसम्यग्दर्शनमुपदेशतो लभते । उतानुपदिशन् एवेत्यत्रोच्यते उभयथाऽपि लभते, कथं ? पथपरिभ्रष्टपुरुषत्रयवत्, यथाहि कश्चित् पथपरिभ्रष्टः उपदेशमन्तरेणैव परिभ्रमन् स्वयमेव पन्थानं लभते-आसादयति । कश्चित् परोपदेशेन अपरस्तु नासादयत्येव, एवमिहाप्यत्यन्तापनष्टसत्पथो जीवः यथाप्रवृत्तकरणतः संसाराटव्यां परिभ्रमन् कश्चित् ग्रन्थिमासाद्यापूर्वकरणेन तमतिक्रम्या-निवृत्तिकरणमनुप्राप्य स्वयमेव सम्यग्दर्शनादिनिर्वाणपुरस्य पन्थानं लभते

कश्चित् परोपदेशेन, अपरस्तु प्रतीपगामी ग्रन्थिकः स्वेनैव लभते इति । इदानीं ज्वरदृष्टान्तः - यथा ज्वरः कश्चित् स्वयमेवापैति, कश्चिद् भेषजोपयोगेन, कश्चित् तु नैवापैति, एवं मिथ्यादर्शनमहाज्वरोऽपि कश्चित् स्वयमेवापैति । कश्चिदर्हदादिवचनभेषजोपयोगादपरस्य तु सर्वौषधप्रयोगेऽपि नापैति । करणत्रययोजना स्वयमेव कार्या । कोद्रवदृष्टान्तः, यथाहि – केषांचित् कोद्रवाणां मदनाभावः स्वयमेव कालान्तरेणापैति तथा केषाञ्चिद् गोमयादिपरिकर्मतः अपरेषां नापैति, एवं मिथ्यादर्शनभावोऽपि केषां स्वयमेवापैति कषांचित्तूपदेशकर्मणा अपरेषां तु नापैति । इह च भावार्थः, स हि जीवोऽपूर्वकरणेन मदनार्धशुद्धकोद्रवानि च दर्शनं मिथ्यादर्शनसम्यग्दर्शनभेदेन त्रिधा विभजते । ततोऽनिवृत्तिकरणविशेषात् सम्यक्त्वं प्राप्नोति । एवं करणत्रययोगवतो भव्यस्य सम्यग्दर्शनप्राप्तिरिति । अभव्यस्यापि कस्यचिद्ग्रन्थिमासाद्यार्हदादिविभूतिदर्शनतः प्रयोजनान्तरतो वा प्रवर्तमानस्य श्रुतसामायिकलाभो भवति नात्रालाभः ६ । इदानीं जलदृष्टान्तः - यथाहि जलं मलिनार्धमलिनशुद्धभेदेन त्रिधा भवति एवं दर्शनमपि, मिथ्यादर्शनादिभेदेनापूर्वकरणेन त्रिधा करोति, भावार्थस्तु पूर्ववदिति । एवं वस्त्रदृष्टान्तोऽपि योजनीय इति गाथार्थः । एवं सम्यग्लाभोत्तरकालेऽवशेषकर्मणः पल्योपमपृथक्त्वस्थितिपरियो(ह्रा)सोत्तरकालं देशविरतिरवाप्यते, पुनः शेषायाः संख्येयेषु सागरोपमेषु स्थितेरपगतेषु सर्वविरतिरवाप्यते । पुनरवशेषस्थितिरपि संख्येयेषु सागरोपमेषु क्षीणेषु उपशमश्रेणीं अनेनैव न्यायेन क्षपकश्रेणीति । इयं च देशविरत्यादिप्राप्तिरेतावत् कालभेदैव मनुष्येषु उत्पद्यमानस्याप्रतिपतितसम्यक्त्वस्य नियमेनोत्कृष्टदृष्टान्तोऽन्यथाऽन्यतरश्रेणिरहित-सम्यक्त्वादिगुणप्राप्तिरेकभवेनाप्यविरुद्धेत्युक्तं च । श्रीआवश्यकभाष्यकारेण –

"सम्मतम्मि य लद्धे, पलियपुहुत्तेण सावओ हुज्जा । चरणोवसमखयाणं, सागरसंखंतरा होति ।।१।।"

एवमप्परिवडिए, सम्मत्ते देव-मणुयजम्मेषु । अण्णतरसेढिवज्जं, एगभवेणं च सव्वाइं ।।२।। ।।३८२।। [पंचवस्तु-९१९-९२०]

किं सामाइयमुत्तं, जो समभावो हु अत्तपरिणामो । तह सम्माओ लाहो, चउहा सम्माइ जीवगुणो ।।३८३।।

अथ सामायिकस्वरूपं पृच्छति, यथा – भगवन् ! सामायिकं किमुक्तमिति प्रश्नः । अथ गुरूत्तरः – सामायिकं तत् सामायिकं तु समभावरूपो जीवाध्यवसायरूपं सम्यक्त्वसामायिकश्रुतसामायिकदेशविरतिसामायिकसर्वविरतिसामायिकरूपश्चतुर्धा आत्मपरिणामः, तथा च सम्यगायो लाभो वा सामायिकम्, तच्च सम्यक्त्वादिकमात्मगुणरूपं सम्यक्त्वसामायिकम्, आदिशब्दाच्छ्रुतसामायिकं ति ।।३८३।।

पसिणकरो बुद्धो तं कहं लब्भइ इमेहिं हेऊहिं जीवेहिं ।

अणुकंपकामनिज्जरबालतवे दाणविणयविब्भंगेण । संयोगविप्पओगो वसणसवइड्ढिसक्कारे ।।३८४।।

कोऽप्यात्मा अनुकम्पया सामायिकं लभते, कोऽप्यकामनिर्जरया, कोऽपि बालतपसा, कोऽपि दानधर्मतः, कोऽपि विनयेन, कोऽपि च विभङ्गज्ञानहेतुना, कोऽपि संयोगवियोगाभ्याम्, कोऽपि व्यसनपतिततत्वेन, कोऽपि चात्मतः, कोऽपि ऋद्ध्या सत्कारेण च । एतेषां दृष्टान्ताभिधानानि यथा –

"विज्ञा-मंते तह इंद-नागकयउत्तपुप्फसाले य । सिवदुवसरविणियभाउग आभीरदस इलापुत्ते ।।१।।"

एषां दृष्टान्तास्तु श्रीआवश्यकवृत्तितो ज्ञेयाः । तत्र शिवराजर्षिदृष्टान्तो विभङ्गज्ञाने संक्षेपतो यथा हस्तिनागपुरे शिवो राजा, धारिणी भार्या शिवभद्रः पुत्रस्तं राज्ये संस्थाप्य होत्तिआ १, सोत्तिया २, कुत्तिआ ३, जणई ४, सट्ठई ५, श्राद्धाः थालइ त्ति गृहीतभाजना इहुं पउडा त्ति ६। हुंडिका ७, दंतुखलिआ त्ति फलभोजिनः ८, उम्मज्जमा त्ति केचिदुन्मज्जनमात्रेण खाती ९, तिण सम्मज्जगा त्ति १०, केचिदुन्मज्जनस्यैव तत्करणेन ये स्नान्ति निमज्जंगासि ११, स्नानाध्वी निमग्नाए क्षणं तिष्ठन्तीति संपक्खाली १२, मृत्तिकादिघर्षणपूर्वकं योगं क्षालयन्ति १३, उत्तरकूलगा ये गङ्गाया उत्तराए स्थातव्यं वस्तव्यमिति १४ दक्खिणकूलिया ये गङ्गाकूले एवावस्थातव्यमिति १५, शङ्खं घ्मात्वा ये जेमंति कूलधमा १६, ये कूले स्थित्वा शब्दं कृत्वा भुञ्जते मियं लुद्धा १७, हत्थिता वसा १८ ये हत्थि(स्ति)नं मारयित्वा तेनैव भोजनं कृत्वा बहुलं यापयन्ति, जलाभिसेयकठिणरत्ता १९, ऊर्ध्वीकृतदण्डा ये चरंति अम्बुवासिणो २०, उदकेन दिशः प्रोक्ष्य ये फलपुप्फादि समुचिन्वन्ति वाउवासिणो त्ति २२, तथा जलवासिणो २३, अम्बुभक्खिणो २३, वाउभक्खिणो २४, सेवालभक्खिणो २५, मूलाहारा २६, कंदाहारा २७, पत्ताहारा २८,तयाहारा २९, पुप्फाहारा ३०, फलाहारा ३१, बीआहारा ३२, उद्दंडा ३३, रुक्खमूलिया ३४, वक्कलवा ३५, मंडलिया ३६, पंचालवासिणो दिसापोक्खिया-एतेषु तापसविशेषेसु दिशाप्रोक्षकतापसत्वं प्रपद्य यावज्जीवं षष्ठाभिग्रही ऊर्ध्वबाहुरातपमानाकृतप्रथमपारणके पूर्वां दिशं प्रोक्ष्य रक्षपुशिवराजर्षिप्रस्थानप्रस्थितं सोमो राजा अनुजानन्तु कन्दमूलादिनीत्युक्त्वा तानि गृहीत्वा उटजे प्राप्तः सन्

कुशसमिधादिभिः वैश्वदेवबलिं अतिथिपूजां च विधाय पारयति, द्वितीयपारणके दक्षिणस्यां यमं महाराजं तृतीयपारणके पश्चिमायां वरुणं चतुर्थपारणके उत्तराया वैश्रमणमनुज्ञापयति इति दिक्चक्रवालनाम्ना तपसा भद्रप्रकृतिरुत्पन्नविभङ्गज्ञानः सप्तद्वीपसमुद्रान् प्रेक्ष्य लोकेषु प्ररूपयति । अन्यदा श्रीगौतमस्तत्रागतो जनेभ्यः सप्तद्वीपसमुद्रान् श्रुत्वा श्रीवीरं पृष्टवान्, श्रीवीरेणासंख्यातेषु प्रोक्तेषु तच्च श्रोतृजनाभ्यां संख्यातांस्तान् श्रुत्वा जातशङ्कस्य शिवराजर्षेर्विभङ्गज्ञानं क्षिप्रं पतति स्म । ततः श्रीवीरं वन्दितुं प्राप्तो भग्नसंशयः प्राप्तसम्यक्त्व सामायिकसर्वविरतिसामायिकाद्येकादशाङ्गप्राप्तश्रुतसामायिकश्च सिद्धः इत्यर्थतो भगवती ११ शतक ९ उद्देशके ततः प्रारभ्येति पृच्छति सम्यक्त्वोत्पत्तितः शुभभावात्, कथं यावत् सजोगि त्ति सप्रयोगकेन लित्तिं संयोगकेवलिनं यावत् । यत उक्तं च

समत्तुप्पत्ती सावए, अविरए अणंतकम्मंसे । दंसणमोहक्खवए, उवसामंते य उवसंते ।।३८४।।

अथ सम्यक्त्वादिप्राप्तिसमये यथोत्तरं असंख्यगुणश्रेणिजीवो भवतीति दर्शयति –

पक्खए अक्खीणमोहे, जिणे अ सेढी भवे असंखिज्जं । तव्विवरीओ कालो, असंखिज्जगुणाइ सेढीए ।।३८५।।

व्याख्या – सम्यक्त्वस्योत्पत्तिः सम्यक्त्वोत्पत्तिः । तस्यां विवक्षितायामसंख्येयगुणा श्रेणिर्भवति, इत्युत्तरका गाथार्द्धान्ते क्रियामपेक्ष्य संबन्धोऽवगन्तव्यः । कथमसंख्येयगुणा श्रेणिर्भवतीत्युच्यते इह मिथ्यादृष्टयो देशोनकोटीकोटीकर्मस्थितिका ग्रन्थिकसत्त्वास्ते

कर्मनिर्जरामाश्रित्य तुल्याः धर्मपृच्छोत्पन्नसंज्ञास्तेभ्योऽसंख्येयगुणनिर्जरकास्तपो पिप्रच्छिषुः सन् साधुसमीपं जिगमिषुस्तस्मादपि क्रियाविशिष्टः, पृच्छतो धर्मं प्रतिपित्सुः अस्मादपि क्रियाविशिष्टः प्रतिपद्यमानस्तस्मादपि पूर्वप्रतिपन्नोऽसंख्येयगुणनिर्जरक इति । इति सम्यक्त्वोत्पत्तिर्व्याख्याता, तदनन्तरं विरताविरतिं प्रतिपत्सुप्रतिप्रद्यमानपूर्वप्रतिपन्नानामुत्तरोत्तरस्यासंख्येयगुणनिर्जरा योज्या । एवं सर्वविरतावपीति, ततोऽपि प्रतिपन्नसर्वविरतेः सकाशात् अणंतकम्मं से त्ति, पदैकदेशे पदप्रयोग इति, यथा भीमसेनो भीमः, सत्यभामा सत्या, एवमनन्तशब्दोपलक्षिता अनन्तानुबन्धिनः, ते हि मोहनीयांशभागास्तांश्च चिक्षिपयिषुः, असंख्येयगुणनिर्जरकः, ततोऽपि क्षपकस्तस्मादपि क्षीणासप्तक एवोपशमश्रेण्यारूढोऽसंख्येयगुणनिर्जरकस्ततोऽप्युपशान्तमोहस्तस्मादपि चारित्रमोहनीयक्षपकस्ततोऽपि क्षीणमोहोऽत्र चाभिमुखादित्रयं यथासंभवमायोज्यम्, अस्मादपि जिनो भवस्थकेवली तस्मादपि शैलेश्यवस्थोऽसंख्येयगुणनिर्जरकस्तदेव कर्मनिर्जरायै असंख्येयलोकाकाशप्रदेशप्रमाणनिष्पादितचयं यमस्थाने प्रचयोपात्तश्रेणिः सानन्तरोत्तरेषामसंख्येयगुणा उत्तरोत्तरप्रवर्धमानाऽध्यवसायकण्डकोपपत्तेरिति । कालतस्तु तद्विपरीतोऽयोगिकेवलिनः आरभ्य प्रतिलोमतया असंख्येयगुणया श्रेण्या नेयम्, इदमुक्तं भवति - यावता कालेन यावत्कर्माऽयोगिकेवली क्षिपति तावन्मात्रं कर्म सयोगिकेवली संख्येयगुणेन कालेन क्षपयति एवं प्रतिलोमतया यावद्धर्मप्रतिपित्सुस्तावन्नेयमिति गाथाद्वयार्थः । इति श्रीआचाराङ्गवृत्तिगतगुणस्थाननिर्जराऽल्पबहुत्वम्, अथ सयोगकेवलिनः, अरिहसमयक्षेत्रे भवति ।।३८५।। - अथ परमार्थतो जीवानां धर्मस्वरूपं दर्शयति –

के निच्छएण धम्मो, सुहपरिणामा जिणुत्तमग्गो जो । संखाइया लोग-प्पएसतुल्ला हु ते हुंति ।।३८६।।

भगवन् ! जीवानां निश्चयेन निश्चयनयेन को धर्मः इति प्रश्नः । अथ गुरूत्तरः – जीवानां यः शुभपरिणामः शुभाध्यवसायरूपो मनो-वाक्कायव्यापारः स निश्चयनयेन धर्मः । अत उक्तं च –

"तम्हा परिणामो च्चिय, साहइ कज्जं विणिच्छओ एसो । ववहारनयमएणं, लिंगग्गहणंपि णिद्दिट्ठं ।।१।।"

[पुष्पमाला-२२७] तथा च -

'दानेन पाणिर्न तु कङ्कणेन, धनेन कान्तिर्न तु चन्दनेन । मानेन तृप्तिर्न तु भोजनेन, ध्यानेन मुक्तिर्न तु दर्शनेन ।।१।।"

अथ ते जीवपरिणामा अध्यवसायस्थानानि कति भवन्ति ? कति संख्याकानि स्युः, ते च परिणामा असंख्येयलोकाकाशप्रदेशतुल्याः सन्ति, अलोके असंख्येयलोकाकाशप्रदेशतुल्यास्ते परिणामाः सन्ति उपलक्षणत्वात् कर्मबन्धहेतवोऽपि संसारहेतवोऽपि तावन्त एव, ते निश्चयनयेन अधर्म एव । उक्तं च –

"जे जत्तिया य हेऊ, भवस्स ते चेव तत्तिया मुक्खे । गणणाइया लोगा, दुण्ह वि तुल्ला भवे पुण्णा ।।१।।३८६।।" [पुष्पमाला-२४२]

अथ धर्मिणा व्यवहारनयमतेन धर्मलिङ्गं विना गुणा न पूज्यन्ते इति दर्शयति -

धम्मीण धम्मलिंगं, विणा य ववहारओ न धराणं । पुज्जिजंति न केहिं वि, गुणलिंगं तेण धरियव्वं ।।३८७।।

धर्मिणां सर्वधर्मधाराणां सर्ववस्तुगुणानां वा व्यवहारेण विना वस्तुलिङ्गं तेषां गुणानङ्गीक्रियन्ते न पूज्यन्ते यथा द्वितीयां चन्द्रबिम्बदर्शनं विना तद् न प्रमाणं क्रियते, तथा मुनिलिङ्गं विना व्यवहारेण मुनयो मुनिगुणाज्ञातकैरपि पूज्यन्ते, तेन हेतुना गुणलिङ्गं धर्तव्यम् । गुणलिङ्गमिति कोऽर्थः ? गुणयुतं लिङ्गं साधुगुणसमन्वितं लिङ्गं धरणीयम्, विना गुणलिङ्गं धरणं तु अप्रमाणमेव, यतः उक्तं च –

"वेलंबगाइएसु वि, दीसइ रूवं न कज्जसंसिद्धी । पत्ताइं व भवोहे, अणंतसो दव्वलिंगाइं ।।१।।" [पुष्पमाला-२२६]

तथा च –

"ते सोऽवि अप्पमाणो त्ति, लिंगं किं लिंगविडुधरीधारणेण कज्जम्मि । अठिरठाणे राया, न होइ सयमेव धारिऊं चामरोडोवं ।।१।।"

लिङ्गे सति अपगुणा यथा –

"अहरगइपट्ठिआणं, किलिट्ठचित्ताण नियडिबहुलाणं । सिरतुंडमुंडणेणं, न वेसमित्तेण साहारो ।।१।।३८७।।" [पुष्पमाला-२२५]

अथ पार्श्वस्थादि किञ्चित् स्वरूपं दर्शयति –

पासत्थाइयसमणा, न वरा नाणाहिया वरा तेसिं । सासणपभावगा जे, वरा य संवेगपक्खिया ।।३८८।।

पार्श्वस्थ आदिर्यत्र ते पार्श्वस्थादिकास्ते च वराः न, प्रधानाः न स्युः । यत उक्तं च –

"पासत्थोसन्नकुसीलनीयसंसत्तजणमहाच्छंदं । नाऊण तं सुविहिया, सव्वपयत्तेण वज्जंति ।।१।।" [उप.माला-३५३]

तेसिं नाणाहिया वरा त्ति – तेषां पार्श्वस्थादीनां मध्ये ज्ञानाधिकाः शुद्धप्ररूपकाश्च वरास्तेषां वैयावृत्त्यादिकं विधेयम्, यत उक्तं च–

"हीणस्स सुद्धपरूवगस्स नाणाहियस्स कायव्वं । जणचित्तगणत्थं, करंति लिंगावसेसेवि ।।१।।" तथा –

"नाणाहियस्स नाणं, पुज्जइ नाणा पवत्तए चरणं । जस्स पुण दुन्हमिक्कंपि, नत्थि तस्स पुज्जए काइं ।।२।।"

"नाणाहिउ वरतरं, हीणो वि हु पवयणं पभावंतो । न य दुक्करं किरिंतो, सुट्ठु वि अप्पागमो पुरिसो ।।३।।"

[उप.माला-५२६-४२४-४२३] तथा –

"दंसण-नाण-चरित्तं, तव-विणयं तत्थ जत्तिअं जाणे । जिणपन्नत्तं भत्तीए, पूयए तं तिहं भावं ।।४।।"

[यतिलक्षण समु. १२४]

गृहिणोऽपि पार्श्वस्थादयो भवन्ति । तेऽपि वरा तीव्रजिनवचनभावितात्मानो भवन्ति, तेषामपि कारणे वैयावृत्यं विधेयम्, यत उक्तं च –

"ओसन्तस्स गिहिस्स व, जिणपवयणतिव्वभावियमइस्स । कीरइ जं अणवज्जं, दढसमत्तस्सवत्थासु ।।१।।" [प्रव. सारो-३५२]

गृहस्था अपि पार्श्वस्थादयो भवन्ति । यत उक्तं – यथा काकन्द्यां नगर्यां ३३ गृहपतयोऽन्योऽन्यं सखायः श्रमणोपासकाः पूर्वमुग्रविहारिणः पश्चादवसन्नीभूताश्चमरेन्द्रस्य त्रायस्त्रिंशद्देवत्वेनोत्पन्नाः, एवं बलीन्द्रादीनामपि त्ति । तथा च उसन्नस्स पुव्वगुरुस्स पाएसु सिरेण निवडइ असागारिएत्ति, सीसो पुच्छइ भयवं ! असंजयस्स कहं चलणे निवडिज्जइ । आयरिओ भणइ – "दुप्पडिआरं च जओ तिण्हं दुक्खं उवगारिस्स' त्ति, निशीथचूर्णौ । तथा संवेगपाक्षिका अपि केचिद् वरा ये शुद्धप्ररूपकाः, यथा –

"वंदय न य वंदावइ, किइकम्मं कुणइ कारवे नेव । अत्तट्ठा न वि दिक्खइ, देइ सुसाहुणं बोहेऊं ।।१।।३८८।।" [उप.माला. ५१६]

संवेगा निव्वेया, जिणुत्तमग्गं समं जिउ धरइ । विणु संवेगं सव्वं, उज्झइ ते सव्वपासत्थो ।।३८९।।

संवेगतो जीवो मोक्षाभिलाषादिगुणान् दधाति । यथा चोक्तं श्रीउत्तराध्ययने – **"संवेगेणं भंते ! जीवे किं जणइ ? संवेगेणं अणुत्तरं धम्मसद्धं जणइ । अणुत्तराए धम्मसद्धाए संवेगहव्वमागच्छई तओ अणंताणुबंधिकोहमाण-माया-लोहे खवेइ । नवं च कम्मं न बंधइ, तप्पच्चइयं च णं मिच्छत्तविसोहिं काऊणं दंसणआराहगे भवई । दंसणविसुद्धीए अत्थेगइए तेणेव भवग्गहणेणं सिज्झइ, सोहीएणं विसुद्धीए तच्चं पुण भवग्गहणं नाइक्कमइ ।"** [उत्त. अध्य. २९-१]

निर्वेदाच्च विषयेषु च शब्द-रूप-रस-गन्धादिषु कामभोगेषु निर्वेदं चिन्तयति । यत उक्तं – **निव्वेएणं भंते जीवे किं जणइ ? निव्वेएणं दिव्व-माणुसतिरिच्छएसु कामभोएसु निव्वेयं हव्वमागच्छइ सव्वविसएसु विरज्जइ, सव्वविसएसु विरज्जमाणे आरंभपरिच्चायं करेइ । आरंभपरिच्चायं करेमाणे संसारमग्गं वोछिंदइ, सिद्धिमग्गं पडिवन्ने भवइत्ति ।** (उत्त.अध्य. २९-२) तथा च संवेगान्निर्वेदसुष्ठुसामग्रीं सर्वां शुभसामग्रीं दुर्लभां चिन्तयति ।।३८९।।

अथ दुर्लभधर्मसामग्रीत्वं दर्शयति –

किं दुलहं जीवाणं, दसदिट्ठंतेहिं मणुअजम्मं जए । पत्तावि केवि तं पुणो, पुण्णेहिं दयावरा दुल्लहा ।।३९०।।

सुगमा । तत्र दशदृष्टान्तैः सुकुलनरत्वं प्राप्ता अपि बहवो दृश्यन्ते परं दयावरा नरा दुर्लभा । यतो दयया सर्वसुखानि स्युः, तत्र दयासु सुखदृष्टान्तो यथा –

"अरुग्गसोहग्गासु भोगवग्गं च सयं निरुवसग्गत्तं । सिवमग्गमहमवसग्गं दयावरा सययं पावंति ।।१।।"

'विहवं रूवं रज्जं, सुभज्जखज्जं च सययं कल्लाणं । सयं सुदाहनीकं, दयालुमणुया हु पावंति ।।२।।"

'पुत्तसुहंमि सुखितं, सुक्खं सुकित्तिसुक्खं च । चरणत्तं चित्ते सुक्खं, दयालुमणउआ य पावंति ।।३।।३९०।।"

परमोहनिद्रया सुप्तानां परदुक्खं परिज्ञातं स्यात् । तेन निद्रास्वरूपं पृच्छति –

का जियचेअणमुद्दा, सा दुविहा दव्व-भावओ निद्दा । इह पंच दव्वनिद्दा, मोहन्नाणं च भावेणं ।।३९१।।

भगवन् ! जीवस्य चेतना जीवचेतना, तस्या मुद्रा मुद्रणं पिधानं का इति प्रश्नः । अथ गुरूत्तरः – सा द्विविधा निद्रा एका द्रव्यनिद्रा अपरा भावनिद्रा ।।३९१।। तत्र द्रव्यनिद्रा पञ्च, यत उक्तं –

'सुहपडिबोहा निद्दा, निद्दानिद्दा य दुक्खपडिबोहा । पयला ठिओवविट्ठस्स, पयलापयला उ चंकमओ ।।१।।"

'दिणचिंतिअत्थकरिणी, थीणद्धी अद्धचक्किअद्धबला । महुलित्तखग्गधारा, लिहणं व दुहाओ वेयणीयं ।।२।।"

[कर्मग्रन्थ ११-१२]

साहूण वि य कुबुद्धी, होइ जओ कोहओ न मणसुद्धी । सा निद्दा थीणद्धी, तीए ताणं च हा धिद्धी ।।३९२।।

जओ त्ति – यतो निद्रायाः साधूनामपि कुबुद्धिः स्यात् । तथा क्रोधतश्च तेषां मनःशुद्धिरपि न स्यात् सा स्त्यानर्द्धिनिद्रा धिग्, तस्याः निद्रायाः **ताणं च**त्ति तेषां येषां सा निद्रेति स्त्यानर्द्धिनिद्रोदयोदाहरणानि, यथा –

"पोग्गलमोयगदंते, फरसगवडसालभंजणे चेव । थीणद्धियस्स एए, आहरणा हुंति णायव्वा ।।"

स्त्यानर्द्धिनिद्रोदयवर्तिनामेतानि पुद्गलादीन्युदाहरणानि ज्ञातव्यानि भवन्ति । तद्यथा - पोग्गल इत्यादि । तत्र समयभाषया पुद्गलं मांसमुच्यते । तदुदाहरणं यथा - एकस्मिन् ग्रामे कुटुम्बिकः कोऽप्यासीत्, स च मांसगृद्धः आमानि पक्वानि तलितानि केवलानि तीमनादिमध्यप्रक्षिप्तानि च मांसानि भक्षयति । अन्यदा गुणातिशायिभिः स्थविरैः प्रतिबोधितः, दीक्षां कक्षीकृतवान् तेन च ग्रामानुग्रामं विहरता कस्मिंश्चित् प्रदेशे मांसलोलुपैः कैश्चिद् विकृत्यमानो महिषः समीक्षांचक्रे, तं च समीक्ष्य तदामिषभक्षणे तस्याप्यभिलाषः समजायत । स च अभिलाषोऽस्य भुञ्जनास्य विचारभूमीग्रस्तस्य चरमां सूत्रपौरुषीं प्रतिक्रमणक्रियां प्रादोषिकपौरुषीं कुर्वन्तः अनिवृतः, किं बहुना ? तदभिलाषवर्ती एव प्रसुप्तोऽसौ, ततस्तस्य स्त्यानर्द्धिनिद्रोदयो जातः । ततस्तदुदये चोत्थाय ग्रामात् बहिर्महिषमण्डलमध्ये गत्वा तत्र महिषमेकं निहत्य तदामिषं भक्षितवान्, तदुद्धरितशेषं च समानीयोपाश्रयोपरि क्षिप्त्वा प्रसुप्तः समुत्थितश्च प्रभाते मयेवंभूतः स्वप्नो दृष्टः इत्येवं गुरुसमीपे आलोचयामास । साधुभिश्चोपाश्रयोपरि तदामिषमदृश्यत, ततः स्त्यानर्द्धिनिद्रोदयोऽस्यास्तीति ज्ञातम् । तदा च संघेन लिङ्गमपहृत्य विसर्जितः इति प्रथमज्ञातम् । अथ द्वितीयं मोदकोदाहरणमुच्यते - यदा एकः कोऽपि साधुर्भिक्षां पर्यटन् क्वचित् गृहे पवित्रभाजनभृतान् प्रचुरान् सुरभिसुस्निग्धमधुरमनोज्ञान् मोदकान् अद्राक्षीत् । तेन चोर्ध्वस्थितेन ते सुचिरं वीक्षिताः । न च किमपि तन्मध्याल्लब्धं ततः सोऽप्यछिन्नाभिलाष एव सुप्तः । स्त्यानर्द्धिनिद्रोदये च रजन्यां तद्गृहं गत्वा स्फोटयित्वा कपाटानि, स्वेच्छया मोदकान् भक्षयित्वा उद्धरितांस्तु पतद्गृहे क्षिप्त्वा उपाश्रयमागत्य पतद्गृहकं स्थाने मुक्त्वा प्रसुप्तः, उपस्थितेन च तथैवालोचितं गुरुणा, ततः प्रत्युपेक्षणासमये भोजनादि प्रत्युपेक्षमाणेन साधुना

पतद्गृहके मोदकान् दृष्ट्वा ततः स्त्यानर्द्धिनिद्रोदयीति निश्चित्य संघेन लिङ्गं गृहीत्वा बहिर्विसर्जितः । अथ तृतीयदन्तोदाहरणं – यथा एकः साधुः दिवा द्विरदेन खेदितः कथमपि प्रपलाय्योपाश्रयमागतः, तं च दन्तिनं प्रत्यवच्छिन्नकोप एव निशि प्रसुप्तः स्त्यानर्द्धिनिद्रोदयश्च जातस्तदुदये च वज्रऋषभनाराचसंहननतः केशवार्द्धबलसंपन्नता समये निगद्यते अतस्तेन चारकपाटानि भङ्क्त्वा मध्यं गत्वा तं हस्तिनं व्यापाद्य दन्तद्वयं गृहीत्वा स्वोपाश्रयद्वारि क्षिप्त्वा च सुप्तः प्रबुद्धेन स्वप्नोऽयमिति, आलोचितं दन्तदर्शने च ज्ञातः स्त्यानर्द्धिनिद्रोदयः, तथैव संघेन लिङ्गं गृहीत्वाऽतिसर्जितः । अथ चतुर्थमुच्यते – फरसगशब्देन समयभाषया कुम्भकारोऽभिधीयते, तदुदाहरणं – एकः कुम्भकारो महति गच्छे प्रव्रजितः, अन्यदा सुप्तस्य स्त्यानर्द्धिनिद्रोदयो जातः । ततोऽसौ पूर्वं यथा मृत्तिकापिण्डानत्रोटयत् तथाऽभ्यासात् साधूनां शिरांसि त्रोटयित्वा कबन्धैः सह एकान्ते उज्झयांचकार, ततः शेषाः केचन साधवोऽपसृताः, प्रभाते ज्ञातं तस्य सर्वं चेष्टितम्, संघेन तथैव विसर्जितः । अथ वटशाखाभञ्जनोदाहरणं - कोऽपि साधुर्मार्गाद् गोचर्यां विधाय प्रतिनिवृत्तः स चोष्णाभिहतो भृतभाजनस्तृषितो बुभुक्षितः, छायार्थी मार्गस्थवटवृक्षस्याधस्तादागच्छन्नतिनीचशाखया घटितो मस्तके बाढं च परितापितः, अविच्छिन्नकोपश्च प्रसुप्तः स्त्यानर्द्धिनिद्रोदये रात्रौ गत्वा वटशाखां भङ्क्त्वा उपाश्रयद्वारे क्षिप्त्वा प्रसुप्तः । स्वप्नो दृष्ट इत्यालोचिते स्त्यानर्द्धिनिद्रोदयी ज्ञातः, लिङ्गापनयनं विधाय संघेन विसर्जितः इत्येतान्युदाहरणानि निशीथभाष्यादेव ज्ञेयानि । स्त्यानर्द्धिनिद्रोदयेन-केसवबलाउ अद्धबलं भवइ, तं च पढमसंघयणिणो, न इयाणि रयाणं पुण सामन्नबला दुगणं चउग्गुणं वा भवई । जइ तेणेव भवग्गहणेणं केवलमुप्पाडेति तह वि से लिंगं न दिज्जई, एस नियमो **'अणइसइणो'**

अतिशयै रहितस्य जो पुण अवधिनाणाइसयउ जाणति सो जाणई । न उण एयस्स थीणहा दोसो भवति-ततो देइ से लिंगं अरहा ण देईत्ति, निशीथचूर्णौ ३६ ।।३९२।।

को जीवियं हारइ, सच्चविज्जं मुत्तुण लज्जं सुकुलस्स भज्जं ।
जो सेवए सच्चइ वण्णभज्जं, पावेई किं नो णरयम्मि सिज्जं ।।३९३।।

सत्या विद्या विज्ञानं आकाशिनीप्रमुखा वा विद्या यत्र जीविते यत्रायुषि तत् सत्यविद्यम्, एवंविधं जीवितं प्राप्ते इति गम्यम् । कः पुमान् हारयति त्यजतीति प्रश्नः । अथ गुरूत्तरः – यः पुमान् अन्यभार्यां सेवते । किं कृत्वा सेवते ? स्वकुललज्जां मुक्त्वा, तथा सुकुलस्य भार्यां विशुद्धकुलपत्नीं त्यक्त्वा । क इव सेवते ? सत्यकिवत् । सत्यकिविद्याधर ईदृशः पुमान् किं, नरके शय्यां कर्कशमहाग्निभूमिशयनरूपां किं न प्राप्नोति ? अपि तु प्राप्नोति सत्यकिवद् यथा – अन्नया पेढालाभिहाणेण विज्जाहरेण स विज्जानिक्खेवपत्तमालोईअं, न दिट्ठं तारिसं पत्तं, तओ तेण बंभचारिणीउअराओ पुत्तं उप्पाडिऊण तम्मि विज्जं निक्खिवामीति चिंतिऊण सुजेट्ठा णाम अज्जाए उयरो पुत्तो उप्पाईओ सच्चई त्ति कयं तस्स णामं वड्ढिओ साहुणीणं मज्झे गहीअं साहुणीहिं भणमाणं गुणमाणं सुअं सोऊण तेण बहुसुअं, अन्नया कालसंदीवगविज्जाहरेण पुट्ठो भयवं महावीरो कुओ मे मरणभयं ति । तओ भगवया भणियं सच्चईओ त्ति । तओ तेण सो सच्चई वुत्तो रे तुमं मे मारइस्ससीति बहुं हीलिओ निंदिओ, पडिओ भूमीए, संचरणेहिं बला मोडिओ, ततो तस्स जाओ अमरिसो सच्चइस्स दिन्ना पिऊणं

तस्स विज्ञा । तं साहिऊं पवत्तो रोहिणिं विज्जं, तओ कालसंदीवगो उवसग्गे काऊं पवत्तो । वारिओ विज्ञाए सिद्धा अहमस्सेत्ति । सो सच्चई तीए पुव्वं रोहिणिं विज्जं साहमाणो पंच वारं हओ, छट्ठे भवे छम्मासावसेसजीविए सिज्झंतीए निसिद्धो । भणियं च भवंतरे सिज्झिस्सामि, अह इमम्मि भवे सा साहिज्जमाणी गाढमणुरत्ता सा भणई । निजमेगमंगं । तम्मि तव अंगम्मि पविसामि, तेण दंसियं नियं भावं तं विदारिऊण पविट्ठा णिडालदेसे, तीए तुट्ठाए तत्थ लोयणं जायं तिलोयणो त्ति विक्खाओ । अह तेण चिंतियं मम जणणी बंभयारिणी, अणेण पावेण धरिसियं, इय संजायामरिसेण वावाईउ पेढालो, तओ णट्ठो कालसंदीवगो पणस्समाणो दिट्ठो अणेण, लग्गो तस्स पिट्ठीए ततो तेण आगासे कयं मायाजालरूवं तिपुरं तस्स मारणट्ठा, जायं परोप्परं बहुजुद्धं । धाईओ सो गच्छंतो लवणसमुद्दपायाले, केचि भणंति भगवईओ, महावीरचरणमूलोसरणं गओ, तत्थ जाओ कोहोवसमो । ततो सो जायविज्ञाबलोक्करिसो पडिमल्लयाए जहेच्छाए रायंतेऊरीणं पट्टोसओ य दिजवण्णकन्नाणं रिसिपत्तीणं च भुंजमाणो विहरई तिसंज्झं च भगवंताणं जिणाययणेसु वंदणपूयणगीअनट्टाइयं कुणमाणो जहिच्छं भूमिमंडलं च विहरइ । अन्नया उज्जेणीणं चंडपज्जोएणं चिंतियं, णणूं एयं दुरायारं खलु मारयामीति, महयामरिसेण रायसहाए भणियं को वि एयं दुरायारं मारेज्जति तस्स बहुप्पसाओ कीरइ त्ति । तओ उमाए गणियाए भणियं जइ रायादेसो तो हम्मित्ति । राइणा भणियं एवं कुणसु त्ति, अन्नया सा उमा गणिया नियगवक्खगया, विकसियकमलं मुकुलियकमलं च हत्थे काऊण उवट्ठिया आसि, तओ सो सच्चई विमाणारूढो गयणाउ, अन्नया अवयरई तओ तेण दिट्ठा गणिया, तओ तीए विकसियकमले स करं पसारेई न मुकुलियकमले । तओ तीए भणिओ जुग्गो,

तुमं ईईसाणं न पुणा विकसियाणं जो तुं मुद्धबुद्धी सो पत्थेई । न पुणो अम्हारिसीत्ति, पोढगणियाओ, ततो नीए वयणकोसल्लयाए आवज्जियं तस्स हिययं, ठिओ तीए विलासमंदिरे, जातओ तस्स तीए उवरि बाढमणुरागो सिणेहपरवसो तत्थेव चिट्ठइ, उप्पाइओ तीए वीसासो पुच्छितीए कम्मि अवसरे तुज्झ विज्ञा तव समीवओ अपसरइत्ति, सिणेहपरवसेण अणाहोइऊण गणियाचरिअं । यत उक्तं च –

"दिवा पश्यति नो घुकः, काको नक्तं न पश्यति । अपूर्वः कोऽपि कामान्धो, दिवा-नक्तं न पश्यति ।।१।।" तथा –

"विकलयति कलाकुशलं हसति शुचिपण्डितं विगोपयति । अधरयति धीरपुरुषं, क्षणेन मकरध्वजो वीरः ।।२।।"

तओ जेण तीए सिणेहभंगभीए सा साहिया मेहुणावसरे, एवं सुणिऊण तीए निवेदियं पचंडपज्जोयस्स, तओ तस्स घायणत्थं निजोईया अप्पणो वीसासिया पुरिसा, तीए भणियं मम रक्खणं कहं भविस्सइ त्ति, तओ तेहि तीए उयरोवरि कमलदलच्छेयं दंसिऊं, तीए उप्पाओ जीवणवीसासो, तउ चंडपज्जोयराइणा भणिया ते पुरिसा जुअलं पि हुतव्वं मा होज्ज अन्नो वि कोवि अणत्थो त्ति । तउ तेहिं घाईओ सज्जइ मेहुणासत्तो सह गणियाए, तओ तस्स सीसो विज्जाहिं अहिट्ठिओ, महई सिला णयरस्सुवरिं विऊव्विया । तेण भणियं णयरलोगाणं मम गुरुघायगणे न मोक्खो त्ति । चूणिस्सामि णयरं तओ तस्स दाणपुरस्सरं राइणा णयरलोएहिं भणियं अजाणएहि अम्हेहि पयं ति । तओ अह पसन्नो होहिसि, तओ तेण भणियं जइ एवं तओ एयावत्थाणं एएसि पूया कायव्वा, पइट्ठा य देवउलं काऊणं, तओ पडिवण्णं सद्धेहिं,

पवत्तिओ तस्स महिमा, तओ सो सच्चई तत्थ मरिऊण गओ णरयंति । एवं परभार्याभोगिनो नरकादिषु यान्तीति ज्ञेयम् ।।३९३।।

अथान्यानामुत्तमं कृत्यं पृच्छति –

धन्नेहि किं किच्चं णरेहि कज्जं, भुंजंति धन्ना न कया अखज्जं । हीलंति धन्ना न य धम्मपुज्जं, निच्छंति धन्ना सुविणेवि रज्जं ।।३९४।।

भगवन् ! धन्याः पुण्यवन्तो नराः अखाद्यं मांसादिकं न भुञ्जन्ति अभक्ष्यं नादन्ति । यत उक्तं च –

"नाकृत्वा प्राणिनां हिंसां, मांसमुत्पद्यते क्वचित् । न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्जयेत् ।।१।।"

"चिखादिषति यो मांसं, प्राणिप्राणापहारतः[1] । उन्मूलयत्यसौ मूलं, दयाख्यं धर्मशाखिनः ।।२।।" तथा च –

"मांसाशने न दोषोऽस्तीत्युच्यते यैर्दुरात्मभिः । व्याधगृध्रवृकव्याघ्रशृङ्गालास्तैर्गुरुकृताः ।।३।।" [यो.शा.प्र. ३ गा. २२-१८]

"न धर्मो निर्दयस्यास्ति, पलादस्य कुतो दया । पललुब्धो न तद् वेत्ति, विन्द्याद्वोपदिशेन्न हि ।।४।।"

"केचिन्मांसं महामोहादश्नन्ति न परं स्वयम् । देवपित्रतिथिभ्योऽपि कल्पयन्ति यदूचिरे ।।५।।"

"मन्त्रं संस्कृतमप्यद्याद्, यवाल्पमपि नो पलम् । भवेज्जीवितनाशाय, हालाहललवोऽपि हि ।।६।।"३९४।।

[यो.शा.प्र. ३, आं.श्लो-१९६-२००-२०१-२०३]

१. प्राणिप्राणापहारकम् प्र छ।

तथा च जे जिया अवरमंसभोइणो अणुहवंति दुहं णरयंति ते -

जा कामभोएसु अईवरत्ता ईच्छा वि मंसाईसु ता पसत्ता ।
सा रेवईवा णरयम्मि पत्ता, पिबंति मज्जं न वुहासु सत्ता ।।३९५।।

रेवई महासतगसावगस्स भारिया, तद्यथा - रायगिहे महासयगो णामं सावगो, तस्स रेवईपमुहाओ ते सभारियाओ । अण्णया तीए रेवईए चिंतियं अहं ण खलु इमां हि दुवालसण्हं सवत्तीणं भोगांतरायकारिणीहिं नासचाएमि महासयगेणं सद्धिं भोगाइं भुंजित्तए, तं सेयं मम एयासिं अग्गिपओएणवावि सप्पओएण वा जीवियाओ ववरोवित्तए, तओ अण्णया तासिं छिद्दाइं लहिऊण छसवत्तीओ सत्थप्पओएण मारिया छसवत्तीओ विसप्पओएणं मारियाओ, तओ तासिं पत्तेयं एगमेगं हिरण्णकोडिं पडिवज्जति । तओ महासयगेणं सिद्धं भोगाइ भुंजंति, तएणं सा रेवई मंसलोलुआ मंसमुच्छिया बहुविहे मंसे सोल्लेहिं तलिएहिं सुरं च महुं च मेरं च वसं च सीधुं च आसादेमाणी विहरति । अण्णया रायगिहं अमारिघोसणं जायं तओ तीए कोलघरिए सद्दावित्ता, तासिं भणियं देवाणुप्पिया तुब्भे ममं दुवे गोणपोयए उद्दवित्ता मंसं उवणेह तओ ते पुरिसा पइदिवसं दुवे गोणपोयए मारिऊण ताण मंसं उवणेई, मंसं भुंजमाणी विहरई, अण्णया महासयगो पोसहसालाए धम्मपण्णत्ति उवपज्जित्ताणं विहरई, तओ सा रेवई मंसमत्ता वियण्णकेसी उत्तरिज्जं वि कड्ढमाणी सयगं एवं भणइ हं भो महासयगा धम्मकामया किं तुज्झं धम्मेण वा पुण्णेण वा मुक्खेण वा सग्गेण वा किं मए सिद्धिं उरालाइ भोगाइ णं भुंजसि त्ति तओ महासयगो रेवई नो आढाई नो परियाणेइ

तओ सा पडिगया तओ महासयग्गो उवासगपडिमं अहालद्धं जाव एक्कारसपडिमं आराहेइ, अण्णया सुज्झवसाएणं अपच्छिममारणंतियं संलेहणेण तत्तं पच्चक्खात्ति, तओ तस्स सुहेणं अज्झवसाएणं ओहिणाणे समुप्पन्नं तिओ पुणो वि सा रेवई मंसमत्ता, जाव उत्तरिज्जं यं वि कड्ढमाणी एवं भणई हं भो महासय ! मा धम्मकामया किं ते तुज्झ धम्मेण किं सग्ग-मोक्खेण, किं ण मम सद्धि उरालाइ कामभोगाइं भुंजतित्ति एवं दोच्चंपि तच्चंपि भणइ, तएणं महासयगे आसुरत्ते, जाव ओहिं पऊंजति, ओहि पऊंजिऊणं रेवई पइ एवं भणति । हं भो रेवइ ! अत्थि एवं खलु तुमं अंतो सत्तरत्तस्स अलसएणं बाहिणा अभिभूआ समाणी अट्टदुहट्टसंवसट्टा असमाहिपत्ता कालमासे कालं किच्चा अहे रयणप्पभाए णरयपुढविए चउरासीवाससहस्सठिई लोलुए णरयावासे उववज्जिहिसि, तओ सा एवं वुत्ता समाणी भीया तट्ठा संजायभया सणियं सणियं पच्चोसकई जेणेव सए गेहेओ नागच्छइ उहयमणसंकप्पा जावडियाइ, तओ अंतो सत्तरत्तस्स अलसएणं वाहिणा अभिभूया समाणी अट्टदुहट्टवसट्टा कालमासे कालं किच्चा रयणप्पभाए णरयपुढवीए उप्पन्ना, तओ णं महासयगोवि अणसणमाराहित्ता कात्तिमासे कालं किच्चा सोहम्मे कप्पे चत्तारि पलिओवमठितीए उववन्ने । पिबंति मज्जं न कया खु सत्ता । धन्याः पुण्यवन्तः पुरुषा मद्यमपि न पिबन्ति । यत उक्तं च –

"विवेकः संयमो ज्ञानं, सत्यं शौचं दया क्षमा । मद्यात् प्रलीयते सर्वं, तृण्या वह्निकणादिव ।।१।।"

"मदिरापानमात्रेण, बुद्धिर्नश्यति दूरतः । वैदग्धीबन्धुरस्यापि, दौर्भाग्येणेव कामिनी ।।२।।"

"पापाः कादम्बरीपानविवशीकृतचेतसः । जननीं हा प्रियीयन्ति, जननीयन्ति च प्रियाम् ।।३।।"

"न जानाति परं स्वं वा, मद्याच्चलितचेतनः । स्वामीयति वराकः स्वं, स्वामिनः किङ्करीयति ।।४।।"

"दोषाणां कारणं मद्यं, मद्यं कारणमापदाम् । रोगातुर इवापथ्यं, तस्मान्मद्यं विवर्जयेत् ।।५।।"

[यो.शा.प्र.३ गा.१६-८-९-१०-१७]

मद्याच्चलितचेतोऽसि - शाम्बादिकुमारैः, द्वीपायनर्षिः कुट्टितः, ततश्च महान् अनर्थो जातो यथा चोक्तं –

द्वीपायनर्षिं ध्यानस्थमग्रे तं गिरिमाश्रितम् । ददृशुर्मद्यपानान्धाः, क्रीडन्तस्ते कुमारकाः ।।६।।

"शाम्बो बभाषे स्वानित्थमयं मे नगरी कुलम् । हन्ता तद्धन्यतामेष, हनिष्यति हतः कथम् ।।१।।"

"ततस्ते कुपिताः सर्वे, लेष्टुभिः पादताड़नैः । चपेटाभिर्मुष्टिभिश्च तमाजघ्नुर्मुहुर्मुहुः ।।२।।"

"पातितं तं महापृष्ठे, मृतप्रायं विधाय ते । ययुः पुरीं द्वारवतीं, विविशुः स्वस्ववेश्मसु ।।३।।"

"तथाऽज्ञासीच्चरैः कृष्णो, दध्यौ चैवं विषादभाग् । अहो दुर्दान्तताऽमीषां, कुमाराणां कुलात् (कुतः) ।।४।।"

"ततः कृष्णः सरामोऽगात्, तत्र द्वीपायनं मुनिम् । अपश्यत् कोपरक्ताक्षं, महाहिमिव दृग्विषम् ।।५।।"
"अज्ञानैर्मद्यपानान्धैरपराद्धं ममात्मजैः । ततः सह महर्षे ! त्वं, मामर्षो युज्यते न ते ।।६।।"
कृष्णेनेत्युच्यमानेऽपि स नाशाम्यत् त्रिदण्डिकः । इत्यूचे च कृतं कृष्ण ! भवतः सान्त्वभाषितैः ।।७।।
त्वत्पुत्रैस्ताड्यमानेन, निदानं विहितं मया । सलोकां द्वारिकां दग्धुं, न मोक्षोऽत्र युवां विना ।।८।।
कृष्णं न्यषेधद् रामोऽपि, मा बान्धव ! मुधैव हि । परिव्राजमनुनयासुकं वारितया मुकम् ।।९।।
वक्त्रांहिनासिकाहस्ताः स्थूलौष्ठरदनासिकाः । विलक्षणाङ्ग हीनाङ्ग, शान्तिं यान्ति न जातुचित् ।।१०।।
अस्मिन् खलूक्त्वा भ्रातर्न नाशो भावि वस्तुनः । सर्वज्ञभाषितं चापि, सर्वथा नान्यथाऽभवत् ।।११।।
ततश्च शोकसंतप्तः कृष्णः, स्वसदनं ययौ । द्वैपायननिदानं च, द्वारिकायां प्रकट्यभूत् ।।१२।।
अथोऽपतद् द्वितीयेऽह्नि, नगर्यामिति शार्ङ्गभृत् । विशेषाद् धर्मनिरतास्तिष्ठतातः परं जनाः ।।१३।।
तथाऽऽरेभे जनः सर्व, उपेत्य भगवानपि । श्रीनेमिः समवासार्षीत्, तत्र रैवतकाचले ।।१४।।
तत्र गत्वा च नत्वा च, कृष्णः शुश्राव देशनाम् । जगन्मोहमहानिद्राविद्रावणरविप्रभाम् ।।१५।।

प्रद्युम्नः शाम्बो निषध, उल्मुकसारणादयः । कुमाराः प्राव्रजन् केऽपि, श्रुत्वा तां धर्मदेशनाम् ।।१६।।
रुक्मणी-जाम्बवत्याद्याः, बह्व्यश्च यदुयोषितः । स्वामिनः पादपद्मान्ते, भवोद्विग्नाः प्रवव्रजुः ।।१७।।
आचख्यौ नृपपृष्टं च सर्वज्ञो भगवानिदम् । द्वेपायानो द्वादशेऽब्दे धक्ष्यति द्वारिकामिमाम् ।।१८।।
दध्यौ च कृष्णो धन्यास्ते, समुद्रविजयादयः । येऽग्रेऽपि प्राव्रजन् धिग् मां, राज्यलुब्धमदीक्षितम् ।।१९।।
ज्ञात्वा तदाशयं स्वामी, प्रोचे कृष्णः कदापि हि । न शार्ङ्गिणः प्रव्रजन्ति, निदानेन कृतार्गलाः ।।२०।।
गच्छन्त्यवश्यं तेऽधर्मात्, त्वं गामी वालुकाप्रभाम् । श्रुत्वेति कृष्णः सद्योऽपि, नितान्तं विधुरोऽभवत् ।।२१।।
भूयोऽभ्यधत्त सर्वज्ञो, मा विषीद जनार्दन ! तत उद्धृत्य मर्त्यस्त्वं, भावी वैमानिकस्ततः ।।२२।।
ततोऽपि देवतश्च्युत्वा[१] भाव्यत्र भरते पुमान् । शतद्वारपुरेशीतुः, जितशत्रोः सुतोऽर्हस्त्वम् ।।२३।।
द्वादशो नामतोऽममः ।।२३।।
ब्रह्मलोकं बलो गामी मर्त्यो भावी ततश्च्युतः । ततोऽपि देवतश्च्युत्वा[१] भाव्यन्ते भरते पुमान् ।।२४।।

१. देवाच्च्युत्वा प, छ।

उत्सर्पिण्यां प्रसर्पन्तः मत्समाख्यस्य केशव ! । तीर्थनाथस्य ते तीर्थे स मोक्षमुपयास्यति ।।२५।।
इत्युदित्वा जगन्नाथो, विहरन्नन्यतो ययौ । तं नत्वा वासुदेवोऽपि, जगाम द्वारिकापुरीम् ।।२६।।
तथैव घोषणां कृष्णः, पुनः पुर्यामकारयत् । विशेषतो धर्मनिष्ठो, लोकः सर्वो बभूव च ।।२७।।
मृत्वा द्वैपायनोऽप्यग्निकुमारेषूदपद्यत । सस्मार पूर्वं वैरं च, द्वारिकामाजगाम च ।।२८।।
चतुर्थ-षष्ठाष्टमारतं, दृष्ट्वा तत्राखिलं जनम् । देवपूजाप्रसक्तं चापश्यद् द्वैपायनः सुरः ।।२९।।
धर्मप्रभावतस्तत्रोपसर्गं कर्तुमक्षमः । छिद्राण्यन्वेषयन् सोऽस्थाद्, वर्षाण्येकादश क्रुधीः ।।३०।।
प्राप्तेब्दे द्वादशे लोकाः, प्रमादे पतितास्ततः । दग्धा द्वैपायनेनैषा, पुरी सर्वजनान्विता ।।३१।।
षष्ठिबाह्यां कुलकोटी, द्व्यशीति तु मध्यगाम् । स पिण्डद्वारिकां ययौ, पुरोऽग्निमदीपयत् ।।३२।।
वसुदेवं देवकीं च, रोहिणीं च रथे हरिः । आरोपयन् सरामोऽपि, तानाकृष्टुं प्रदीपनात् ।।३३।।
न चेलुः सुरगास्तत्र, न चेलुर्वृषभा अपि । सुरेण स्तम्भितास्तेन, मान्त्रिकेणेव पन्नगाः ।।३४।।
अथ द्वारं कपाटाभ्यां, झटित्येवासुरः प्यधात् । रामः पार्ष्णिप्रहारेणाभाङ्क्षीत् तौऽनृत्कपाटवत् ।।३५।।

भुजाग्रस्त इव रथस्तथापि निरगान्न हि । सोऽपि देवोऽवदद् रामकृष्णौ किं सहे एष वाम् ।।३६।।

तेषु द्वैपायनो चाग्निं[१], ववर्षानलमेघवत् । विपद्य च ययुः स्वर्गं, वसुदेवादयस्त्रयः ।।३७।।

राम-कृष्णौ बहिः पुर्याः, जीर्णोद्यानेऽथ जग्मतुः । इत्याद्यनर्थमूलं तु, मद्यपानमभूद् भुवि ।।३८।।

"निच्छंति धन्ना सुविणे वि रज्जं" त्ति गाथाचतुर्थपदविवरणं त्ति कओ णिच्छंति रज्जं ति जओ रज्जं हि णाम पायाल व्व दुप्पूरं जिणभवणं पिव सुलहविवरं, खलसंगयं पिव विरसाणंदवेसत्थिया, हिययं पिव अत्थवल्लहं, वम्मीअं पिव बहुभुअंगं, जीवलोयं पिव अणिट्ठियकज्जं सप्पकरंडयं पिव जंतपरिपेलणिज्जं वेसाजोव्वणं पिव बहुजणाभिलासणीयं अकारणं च सुद्धपरलोयमग्गस्स, तथा च – अवितत्तं राजा राज्यं नरकान्तं यन्न, यतः

"नरकान्तं तदा राज्यं, यदि राजा न धार्मिकः । धार्मिके तु परं तन्त्रसौख्यमत्र परत्र च ।।१।।" तथा च –

"न्यायधर्मो दर्शनानि, तीर्थानि सुखसंपदः । यस्याधारे प्रवर्तन्ते, जायाद्धर्मी नृपो भुवि ।।१।।"३९५।।

अथ येन प्राणान्तेऽपि सावद्यं नोक्तं तद् दर्शयति –

केण य नो सावज्जं, उत्तं वुत्तं च केण मरंते । कालियसावज्जेहिं य, सुयेऽपि चरितं इमं तेसिं ।।३९६।।

१. योऽग्निं प्र छ।

भगवन् ! महासत्त्ववता मनःस्थैर्यं कृत्वा प्राणान्तेऽपि सावद्यं नोक्तम्, केन च मनःस्थैर्यं कृत्वा सावद्यमुक्तं भाषितं इति प्रश्नः । अथ गुरूत्तरः - कालियत्ति - भीमो भीमसेनवदिति कालिकाचार्येण सावज्जेहि य त्ति - सावद्याचार्येणेति । तुरविणिणयरीए दत्तो णामं बंभणो मंती, तेण रज्जं वसीकाऊण जियसत्तुराया निक्कासिओ, रज्जं तेण अहिट्ठियं, तेण बहवो जण्णा कया । अण्णया आगया तत्थ कालियायरिआ, तस्स माउलो सो जणणीपेरिओ गओ माउलवंदणत्थं, वंदिया, पुट्ठं जण्णफलं । आयरिएहि भणियं धम्मो अहिंसामओ, न हिंसामओ धम्मो त्ति, तओ तेण भणियं जण्णफलं पुच्छामि आयरिएहिं भणियं हिंसा कुगइकारणं, किं अपुच्छियं भणह, तओ गुरुणा भणियं जण्णाण फलं णरयगमणं, तेण भणियं को इत्थ पच्चओ, आयरिएण भणियं सत्तमे दिणे, आसाइया सुइलवो कुंभीपाके णरए तं च पडणं होहि एस पच्चओ, दत्तेण भणियं तुमं कत्थ गच्छसि, धम्मपहावेण देवलोयं ति । तओ सो दुरप्पा कोहेण गुरुनिरोहगपुरिसे निजोइऊण सोहाविया सेसरायमग्गो सत्तदिवसे य भवणओ न निग्गओ । सत्तमे दिणेति मारयामि तं दुट्ठसमणं त्ति चिंतिय निग्गओ रायभवणाओ । तओ रायमग्गे गच्छंतस्स अइवेगपीडियमालागारेण रायमग्गे विट्ठं मुत्तुणं तं पुप्फभरेण पिहियमत्थि । रायतुरयखुराहया सा विट्ठा तस्स मुहे पविट्ठा । तद्दिणे तेण पच्चएणं जायं तस्स मरणभयं, निवत्तिओ गिहं पई, तओ गहिओ जियसत्तुरायपुरिसेहिं, पविट्ठो णयरं जियसत्तु राया, पक्खित्तो सो सतुरओ कुंभीए पक्को विलवंतो कुंभीए, महाकिलिसेण गओ णरयं, गया कालयायरिया निरवज्जं सामण्णं परिपालिऊणं देवलोगंमिति । अथ सावद्याचार्यस्वरूपं - अन्यथा प्ररूपणं सावद्यमिति तत् स्वरूपं यथा - अस्या ऋषभादिचतुर्विंशतिकायाः प्रागनन्तकाले या अतीता चतुर्विंशतिका तस्यां

मत्सदृशः सप्तहस्तधनुर्धर्मश्रीनाम चरमतीर्थङ्करो बभूव । तत्तीर्थे सप्ताश्चर्याण्यभूवन् तत्रासंयतपूजायां अनेके द्रव्यलिङ्गिनः, श्राद्धेभ्यो गृहीतद्रव्येण स्वस्वकारितचैत्यनिवासिनोऽभूवन्, अन्यदा तत्रैका मरकतच्छविः कुवलयप्रभो नामा अनगार उग्रविहारी महातपस्वी शिष्यगणवृतः समागात्, तैश्चैत्यवासिभिर्वन्दित्वोक्तमत्रैकं वर्षारात्रिकं चतुर्मासकं तिष्ठ यथा त्वदाज्ञयाऽनेके चैत्यालया भवन्ति, कुरु अस्माकमनुग्रहम्, तनोक्तं सावद्यमिदं नाहं वाङ्मात्रेणापि कुर्वे, तदेवं भणता तेन तीर्थकरनामकर्मार्जितम्, एकभवावशेषीकृतश्च भवोदधिः, ततस्तैः सर्वैरेकमतं कृत्वा तस्य सावद्याचार्यमिति नाम कृतं प्रसिद्धिप्राप्तं तथापि तस्येषदपि न कोपोऽभूत् । अन्यदा तेषां लिङ्गमात्रप्रव्रजितानां मिथः आगमविचारो बभूव, यथा श्राद्धानामभावे संयता एव मठदेवकुलानि रक्षन्ति पतितानि स समारचयन्ति, अन्यदपि यत् तत् करणीयं तदारम्भे क्रियमाणे यतेरपि न दोषः । केप्याहुः – संयमो मोक्षं नेता केचिदूचुः प्रासादावतंसके पूजासत्कारबलिविधानादिना तीर्थोत्सर्पणयैव मोक्षगमनम्, एवं तेषां यथेष्टं प्रलपतां अन्यः कोऽप्यागमकुसलो नास्ति यो विवादं भनक्ति सर्वैः सावद्याचार्य एव प्रमाणीकृतः आकारितश्च । स दूरदेशात् सप्तमासैर्विहरन् समागतः । एकया आर्यया श्रद्धावशात् प्रदक्षिणीकृत्य झगिति मस्तकेन पादौ संघट्टयित्वा ववन्दे, तैर्दृष्टो वन्द्यमानः । अन्यदा स तेषामग्रे श्रुतार्थकथने अस्यैव महानिशीथपञ्चमाध्ययनस्य व्याख्याने समागते इयं गाथा समागता यथा –

"जत्थित्थीकरफरिसं, अंतरियं कारणे वि उप्पन्ने । अरहा वि करिज्ज सयं, तं गच्छं मूलगुणमुक्कं ।।१।।" [गच्छा.प. ८५]

तदात्मशङ्कितेन तेन चिन्तितं साध्वीवन्दनमेतैर्दृष्टमस्ति । सावद्याचार्य इति नाम च पुरा कृतमस्ति । सांप्रतं तु यथार्थकथनेऽन्यदपि

असमञ्जसं किमपि करिष्यन्ति अन्यथा प्ररूपणे तु महाशातनापत्त्याऽनन्तसंसारित्वं स्यात् । तत् किं कुर्वे अथवा यद् भवति तद् भवतु यथार्थमेव व्याकरोमीति ध्यात्वा व्याख्याता यथार्थगाथा, ततस्तैः पापैरुक्तं यद्येवं तत् त्वमपि मूलगुणहीनः, साध्व्या वन्दमानया पृष्टस्ततोऽयशोभीरुः स दध्यौ किमुत्तरं ददे, आचार्यादिना किमपि पापस्थानं न सेवनीयं त्रिविधेन यः सेवते सोऽनन्तसंसारे भ्राम्यतीति, तैर्विलक्षं दृष्ट्वा प्रोचे किं न वक्ष्यसि स दध्यौ किं वदामि, ततस्तेन सुचिरं परिचर्योक्तं अयोग्यस्य श्रुतार्थो न दातव्यः । यतः –

"आमे घडे निहित्तं, जहा जलं तं घडं विणासेइ । इय[1] सिद्धंतरहस्सं, अप्पाहारं विणासेई ।।१।।" [पुष्पमाला-२७]

तैरूचे – किमसंबद्धं भाषसे, अपसर दृष्टिपथात् । अहो त्वमपि संघेन प्रमाणीकृतोऽसीति । ततस्तेन दीर्घसंसारित्वमङ्गीकृत्योक्तं उत्सर्गापवादैरागमः स्थित इति यूयं न जानीत । एगंतं मिच्छत्तं जिणाणमाणं अणेगंतो, ततस्तैर्हृष्टैर्मानितं तद्वचः सप्रशंसम् । स एकवचनदोषेणानन्तसंसारत्वमुपार्ज्याप्रतिक्रान्तो मृत्वा व्यन्तरो बभूव, च्युत्वोत्पन्नः प्रोषितपतिकायाः प्रतिवासुदेवपुरोहितदुहितुः कुक्षौ बालविधवत्त्वेन कुमार्गाचरणेन कुलकलङ्कभीताभ्यां पितृभ्यां निर्विषयीकृता, क्वापि स्थानमलभमाना दुर्भिक्षे कल्पपालगृहे दासीत्वेन स्थित्वा मद्यमांसदोहदोऽस्याः संजातः, बहूनां मद्यपानानां भोजनेषूच्छिष्टं मद्य-मांसं च भुङ्क्ते कांस्यदूष्यद्रविणानि च चोरयित्वा अन्यत्र विक्रीय मद्य-मांसे भुङ्क्ते । गृहस्वामिना राज्ञे निवेदितं, राज्ञा च प्रसूतिसमयं यावद् रक्षितुमर्पिता चाण्डालानां अप्रसूता न हन्यते इति तत्कुलधर्मात्, सा च

१. तह पृ छ।

प्रसूता सती बालकं विमुच्य नष्टा, राज्ञा पञ्चसहस्रदानेन बालकः पालितः । सूनाधिपतौ मृते राज्ञा स एव तद्गृहस्वामी कृतः पञ्चशतानामीशः, मृत्वा सप्तमनरके ३३ सागरायुः उद्धृत्यान्तरद्वीपे एकोरुकजातिर्जातः मृत्वा महिषः २६ वर्षायुः, ततो मनुष्यः, ततो वासुदेवः, ततः सप्तमे नरके, ततो गतकर्णो मनुष्यो मांसाहारी, मृत्वा पुनः सप्तमनरके गतः, ततः महिषः, ततो बालविधवा बन्धकीब्राह्मणसुताकुक्षौ उत्पन्नः, गर्भशातन-पातनक्षारचूर्णयोगैरनेकव्याधिगतोऽनेकरन्ध्रगलकुष्ठीकृमिलक्षमाणो गर्भान्निर्गतो लोकैर्निन्द्यमानः क्षुधादिपीडितो दुःखी सप्तवर्षशतानि द्वौ मासौ सप्तदिनानि जीवित्वा मृतो व्यन्तरो जातः, ततः सूनाधिपो मनुष्यस्ततः सप्तम्याम्, ततः चाक्रिकगृहे वृषभः वाह्यमानः कुथितस्कन्ध-पृष्टिस्तत्स्वामिना निःसारो मुक्तः काककृमिस्वानादिभिर्लुप्यमानः २९ वर्षायुः मृतो बहुव्याधिरिभ्यपुत्रो वमनविरेचनादिदुःखैरेव तस्य गतो मनुष्यभवः, एवं चतुर्दशरज्ज्वात्मकं लोकं जन्ममरणैः परिपूर्यानन्तकालेनापरविदेहे मनुष्यः, तत्र लोकानुवृत्त्यागततीर्थकरनत्या प्रतिबुद्धः स प्रव्रज्य सिद्धोऽत्र त्रयोविंशतितमश्रीपार्श्वनाथकाले, गौतमोऽप्राक्षीत् किं निमित्तस्येदृग्दुःखं स्वाम्याह- उत्सर्गापवादैः रागः स्थित इति, इत्यादि यद् भणितं तन्निमित्तं यद्यपि च उत्सर्गापवादावनेकान्तश्च प्रज्ञाप्यन्ते तथापि सति नीरभोगेऽग्रिकायारम्भो मैथुनं चैकान्तेन निषिद्धानि ।।३९६।।

को पासइ मियावई व्वेह जो हु नियदोसे । को न य वयइ परदोसे, मेयज्जरिसीव्व मरणे वि ।।३९७।।

भगवन् ! कः पश्यति परमार्थतः सलोचनः पुमान् क इति प्रश्नः । अथ गुरूत्तरः - संपश्यति स कः य आत्मदोषान् पश्यति । यत उक्तं च -

"असंख्याः परदोषज्ञा, गुणज्ञा अपि केचन । स्वयमेव स्वदोषज्ञा, विद्यन्ते ते तु पञ्चषाः ।।१।।"

तथा –

"गुण-दोषसमाहारे, गुणान् गृह्णन्ति साधवः । क्षीरनीरसमाहारो, हंसाः क्षीरमिवामलम् ।।२।।"

दुःखागमेऽपि निजकर्मदोषमेव चिन्तयति, यतः –

"न परो करेइ दुक्खं, न च सुहं को वि कस्सइ देइ । जं पुण सुचरियदुचरिअं, परिणमइ पुराणयं कम्मं ।।१।।" [देशनाशतक-९५]

केवात्मदोषान् सुधीः स पश्यतीति मृगावतीवेह❖ । तत्स्वरूपं च यथा – कोसंबीए णयरीए अण्णया समणं भगवं महावीरे समोसढे, तत्थ य विणिम्मिअं चउव्विहेहिं देवेहिं समोसरणं, आगया य भगवओ वंदणत्थं सविमाणा चंद-सूरा, गया य ते वंदिऊण, तओ गयासु चंदणाअज्जासु मिगावईए कालमाणं ण णायं, तेण ठिया तत्थ किंचि कालं मिगावई, चंद-सूरेसु गएसु वित्थरियमन्धयारं, ससंब्भमा सा गया वसहीए, तओ कयावस्सया संथारगगया दिट्ठा चंदणा मिगावईए, अणत्थावत्थादोसनिवारणत्थं उवालंभिया, जहा – अणुचियं तुम्हारिसीणं पहाणकुलसमुब्भवाणं अयालसंचरम्मि त्ति । तओ मिगावईए चिंतियं हा, अहं गुरुणी संतावकारिया त्ति, विगलियअस्सुलोयणा भणइ मिगावई, भगवई खमसु ममावराहदोसे मम मंदभाइणीए पमाइखलियं न पुणो एवं करिस्सामि त्ति वयमाणी पडिया चंदणापाएसु मिगावई । तओ पवट्टसुक्कझाणाणले दड्ढं कम्ममलेंधणं, उप्पन्नकेवलनाणा तहेव चिट्ठइ । इत्थंतरे पसुत्ता अज्जचंदणा, इओय तत्थ भुअंगमे आगच्छमाणे

मिगावईए संथारगबहिट्ठिओ चंदणाबाहु उप्पाडिऊणं ठविओ संथारए । तओ चंदणाए भणियं विबुद्धाए मिच्छा मि दुक्कडं निद्दापमाएणं, मए तुमं न विसज्झिया त्ति । किं तए मम बाहु चालिओ त्ति । तओ भणियं आगच्छइ भुअंगमो त्ति । भणियं चंदणाए कहं जाणासि ? तीए भणियं अइसएणं । चंदणाए भणियं कयरेण ? सा भणइ केवलेणं । एवं सोऊण गया चंदणा पच्छायावं पडिया मिगावईपाएसु हा दुट्ठकयमिति सुहज्झवसायपराए चंदणाए वि समुप्पन्नं केवलनाणं । जओ भणियं च –

"पडिवज्झिऊ दोसे, नियए सम्मं च पायवडियाए । तो किर मिगावईए, उप्पन्नं केवलं नाणं ।।१।।" [उप.माला. ३४]

इति गाथापूवार्द्धम्, अथोत्तरार्द्धं च –

"को न वयइ परदोसे मेअज्जरिसिव्व मरणे वि' त्ति - कः पुमान् परदोषान् न वदतीति प्रश्नः। अथोत्तरः – मरणेऽपि मेतार्यवत् परदोषान् परापराधान् पश्यमानोऽपि सुजनः परदोषान् न वदति, यत उक्तं च –

"न ब्रूते परदूषणं परगुणं वक्त्यल्पमप्यन्वहं, संतोषं वहते परर्द्धिषु पराबाधासु धत्ते शुचम् ।
स्वलाघां न करोति नोज्झति नयं नौचित्यमुल्लङ्घयत्युक्तोऽप्यप्रियमक्षमां न रचयत्येतत् सतां लक्षणम् ।।१।।" (सूक्तमुक्ता०-६४) तथा –

"स्वगुणं परदोषं च, वक्तुं याचयितुं परम् । अर्थिनं च निराकर्तुं, सतां जिह्वा जडायते ।।२।।" तत्र मेतार्यवद् यथा, उक्तं च –

"रायगिहम्मि य पुरवरे, समुदायट्ठा कयाइ हिंडंतो । पत्तो य तस्स गेहे, सुवण्णयारस्स पावस्स ।।१।।
निप्फेडियाइं दुन्नवि, सीसावेढेण जस्स अच्छीणि । न य संजमाउ चलिउ, मेअज्जो मंदरगिरि व्व ।।२।।"
"नवपुव्वी जो कुंचगमवराणमहिणमवि दयाइ नाइक्खे । तं नियजियनिरवेक्खं, नमामि मेयज्जमंतगडं ।।३।।"३९७।।

(ऋषिमण्डल २०, २१-६८)

अथ येषां मुनीनां तिर्यञ्चोऽपि लज्जां वहन्ति तान् पृच्छति -

वहंति केसिं तिरिया वि लज्जं, कुणंति जे उग्गतवाइकज्जं ।
रामु व्व मुत्तूण य पिज्जं, वहंति तेसिं तिरिया वि लज्जं ।।३९८।।

भगवन् ! केषां महर्षीणां विवेकविलासास्तिर्यञ्चोऽपि लज्जां मर्यादां वहन्तीति प्रश्नः, अथोत्तरा ये महर्षयः सर्वत्र प्रेम मोहप्रतिबन्धं स्नेहमिति यावत् मुक्त्वा विमुच्य उग्रतपादिकृत्यं कुर्वन्ति तेषां रामवत् बलभद्रवत् तिर्यञ्चोऽपि लज्जां मर्यादामाज्ञां वहन्तीति शेषः, यत उक्तं च -

"पयरयमिव रज्जसिरि, उज्झिय गहियव्वए अयलपमुहे । अट्ठवि बलदेवरिसी, थुणामि निव्वाणमणुपत्ते ।।"

जेणुग्गतवं तत्तं, अवराहं दट्ठुं नियरूवस्स । तुंगियगिरिवरसिहरे, सो राममुणी जयउ ।।२।।

रामो तवप्पभावा, सुपत्तदाणाओ झत्ति रहकारो । अणुमोअणाओ हरिणो, संपत्ता बंभलोगम्मि ।।३।।३९८।। (ऋषिमण्डल-१२-१४)

वणवासिणो वि धन्ना, ते तिरिया जेसिं साहुणो सेवा । अधण्णा विय ते सधणा, राममुहा लिंति धम्मधणं ।।३९९।।

सधणा वि निद्धणा के, मणभवणे जेसि नत्थि धम्मधणं । वीरेण य धम्मधणो, पसंसिओ मद्दुअसड्ढो ।।४००।।

शुद्धसम्यक्त्वादिधर्मधनो स मद्दुकश्राद्धो धन्यो यो वीरेण भगवता प्रशंसितः । यथा साहुणं मद्दुआ तुमं अण्णं उ त्ति एवं वयासि जेणं मदुया अट्ठं वा हेऊं वा पसिणं वा वागरणं वा, अण्णातं अदिट्ठं अस्सुअं अविण्णातं बहुजणमज्झे आघतेति, पण्णवेति जाव उवदंसेति से णं अरहंताणं आसायणाए वट्टति, अरहंतपन्नत्तस्स धम्मस्स आसायणाए वट्टति केवलीण आसायणाए वट्टंति केवलिपन्नत्तस्स धम्मस्स आसायणाए वट्टंति ।।३९९-४००।। तथा च –

को पासइ सो पासई, पासणजुग्गं हियट्ठरूवं जो । पासंतो वि अचक्खू, जो परमट्ठं न पासेइ ।।४०१।।

"वेआ केण विरइया, भरहेण बंभणायारा । जण्णोपवीतिधरका, तेहिं तया बंभणा सद्धा ।।४०२।।"

आर्या वेदा केन विरचिता इति पृच्छा, उत्तरं भरतेन किं ब्राह्मणाचारा निवेदितास्तदा यज्ञोपवीतिधरका श्राद्धा जाताः ।।४०१-४०२।।

रइया केण अणज्ञा, वेया पसुपमुहमारणे सज्जा । सपिया हुओ सभज्जो, सप्पिप्पलाओ कि वाणज्ञो ।।४०३।।

भगवन् ! अनार्या वेदा केन रचिता केन निष्पादिताः ? किंविशिष्टा वेदाः ? पशुप्रमुखजन्तुमारणे **सज्ञा**-तत्पराः । तथा च केन सभार्यो निजपिता यज्ञे हुतो होमे भस्मीकृतः इति प्रश्नः । अथ गुरूत्तरः - स अनार्योऽनाचारोत्पन्नः पिप्पलाद इति । तदुत्पत्तिश्च यथा - - पूर्वं आर्यान् वेदान् भरतचक्री कृतवान् । तद्यथा -

"अन्यदा भगवानष्टापदाद्रौ समवासरत् । भरतोऽपि प्रभुं नन्तुं, ययावानन्दनिर्भरः ।।१।।"

शकटानां पञ्चशतीनामादायाहारसंभृताम् । न्यमन्त्रयत् ततो भक्त्या, सकुटुम्बमपि प्रभुम् ।।२।।

स्वाम्यूचे राजपिण्डोऽयमाधाकर्माहतं तथा । अस्माकं युज्यते नैतदपथ्यमिव रोगिणाम् ।।३।।

विषण्णोऽथावदच्चक्री, लुब्धोऽहं बन्धुराज्यहृत् । चक्रे पूज्यैरपाक्तेयः, किमेतन्मे कृतस्य च ।।४।।

स्वाम्यूचे मा विषीद त्वं, व्यवस्था रागिणामियम् । अस्माकं वीतरागाणां, नोष्णं किञ्चिन्न शीतलम् ।।५।।

शक्रः स्वामिनमप्राक्षीत्, तद्विषादोपशान्तये । अवग्रहाः कति स्वामिन् ?, भगवानाह पञ्चधा ।।६।।

शक्रचक्रेशराष्ट्रेशवेश्मवद्यत्यवग्रहाः । तदाकर्ण्य प्रणम्योचे, देवन्द्रस्त्रिजगत्पतिम् ।।७।।

मयात्मावग्रहः स्वामिन्ननुज्ञातोऽनगारिणाम् । भरतोऽपीन्द्रवत्सर्वमन्ववददवग्रहम् ।।८।।

चक्री शक्रमथाप्राक्षीत्, कथं कार्यमिदं मया । भक्तं भूरि समानीतं, शक्रस्तस्योपदिष्टवान् ।।९।।

गुणाधिकेभ्यो राजेन्द्र !, तद्विश्राणय भक्तितः । बीजमुप्तं हि सुक्षेत्रे, जायते शतमेधिकम् ।।१०।।

दध्यौ राजा मुनीन् मुक्त्वा, मत्तः केऽन्ये गुणाधिकाः । ज्ञातं वा देशविरतास्ततस्तेभ्यो ददौ स तत् ।।११।।

चक्री शक्रं पुनः स्माह, रूपं किं वः स्वभाव्यदः । इत्युक्ते मूलरूपे मे दर्शयास्ति कुतुहलम् ।।१२।।

शक्रः स्माह-महाराज ! मर्त्यैः सह्यं न तन्महः । परं व्यर्थाऽर्थना मा भूत्तवेत्यैक्षयदङ्गुलीम् ।।१३।।

मदुक्तं विफलीचक्रे, न शक्रेणेति चक्र्यपि । तत्कृते स्तम्भमुत्तभ्य, चक्रे शक्रमहं मुदा ।।१४।।

दध्यौ चक्र्यथ साधूनां, किञ्चित् कल्पिष्यते न मे । दातुं श्राद्धेभ्यो वाऽनेकान्, सत्रागारानकारयत् ।।१५।।

अभ्यधादथ स श्राद्धान्, भोज्यं सत्रेषु नः सदा । कृष्यादि न विधातव्यं, स्थेयं धर्मैकतत्परैः ।।१६।।

भुञ्जानेषु ततस्तेषु, तन्मिषादपरेष्वपि । अतिप्राचुर्यनिर्विन्नैर्विज्ञप्तः सूपकारकैः ।।१७।।

अर्द्धं वर्षादर्धवर्षात्, परीक्ष्य ज्ञातुमार्षभिः । वैकक्षमिति काकिण्याः, तेषां रेखात्रयं व्यधात् ।।१८।।

जितो भवान्[१] वर्धते भीस्तस्मान्मा हन मा हन । इति पेठुर्नृपोक्तास्ते द्वार्यन्तःपुरगे नृपे ।।१९।।

दध्यौ चक्री च तच्छ्रुत्वा, विषयैर्विजितोऽस्म्यहम् । वर्धते च भयं तेभ्यस्तस्मान्मास्माङ्गिनोऽहनम् ।।२०।।

इत्थं चिन्तयतो राज्ञः संवेगावेगशालिनः । प्रावर्ततान्वहं ध्यानक्षणं दुष्कर्मशोधनम् ।।२१।।

आर्यान् वेदांश्च ते चक्रिकृतानध्यैषतानिशम् । तेभ्योऽथ राजपूज्येभ्यः, श्रद्धयाऽन्योऽप्यदाज्जनः ।।२२।।

माहनोच्चारिणः श्राद्धाः, ख्यातास्ते ब्राह्मणाः क्रमात् । काकिणीरत्नरेखास्तु ययुर्यज्ञोपवीतताम् ।।२३।।

ते च प्रायः सुतान् साधुपार्श्वे व्रतमजिग्रहन् । परीषहासहत्त्वेन श्राद्धा एव स्वयं स्थिताः ।।२४।।

यदादित्ययशोराज्यस्वर्णयज्ञोपवीतिनः । श्राद्धाः क्रमाद् रूप्यपट्टसूत्रतन्तूपवीतिनः ।।२५।। [आ.नि.तिलकाचार्यवृत्तौ गा. ३६१]

इति आर्यवेदोत्पत्तिः ।। आर्यान् भरतचक्री माणवकनिधेरुद्धृत्य प्रतिदिनभोज्यमानश्राद्धपठननिमित्तं तीर्थकरस्तुतिरूपान् श्राद्धधर्मप्रतिपादकांश्चेति दृश्यते ।

---

१. भवात् प्र।

अथानार्यवेदोत्पत्तिर्यथा – अनार्यास्तु सुलसायाज्ञवल्क्यादिभिः[१] कृता इति भावार्थः । इह सुलसासुभद्रानामतः परिव्राजिकाद्वयमासीत् तत्र सुलसा दृतीवानेकशास्त्रकोविदा, अत्रान्तरे यज्ञवल्कनाम्ना परिव्राजकेन यो मां वादे विजयते तस्याहं शिष्य इत्युद्घोषणापूर्वं पटहो दापितः, सुलसया च जितोऽसौ तच्छिष्यत्वं चानेन प्रतिपन्नम् । अतिपरिचयेन तयोरकार्यप्रवृत्तिरभूत् । गर्भश्च सुलसायाः समभवत् । विज्ञाते सुभद्रया निष्ठुरमुपालब्धाऽसौ प्रच्छन्ने धृता, अन्यस्मिंश्च वासरे पुत्रं प्रासूत् । अविज्ञातायुःसुभद्रया पिप्पलवृक्षस्याधस्तात् पुत्रं परित्यज्य परिव्राजकेन सह रजन्यामेव निर्जगाम । प्रातश्च पदानुसारेणान्वेषयन्त्या सुभद्रया डिम्भो दृष्टः । अयं च बुभुक्षावशतो विस्रमानः पिप्पलफलं मुखे पतितमास्वादितवानिति पिप्पलादनाम तस्य कृतम्, वृद्धिं नीतः, पाठितश्चासौ सुभद्रया, वाग्मी चातीव जातः श्रुतो मातृसंबन्धः । मातरि पितरि च प्रद्वेषमापन्नोऽनार्यान् वेदांश्चकार । तेषु वेदं प्ररूपितवान् । यदुत राजभिरश्वादिशान्तिनिमित्तं स्वर्गावाप्तये च पशुतुरगगजमानुषादिभिश्च यागो विधेयः इति । तस्य च *अलियवया वसुराया* इत्यादिकथानकप्रसिद्धः पर्वतको नाम मित्रमभूत् तेन चोक्तं अजैर्यष्टव्यमिति वेदेऽपि प्रतिपादितमेवेति शोभनं त्वया कृतम्, अपरं च मधुनामा राजपुत्रः, कुत्रचित् स्वयंवरमण्डप-मिलितसमस्तराजवर्गेणापमानितः, ततस्तेषु च द्वेषमापन्नो मृत्वा व्यन्तरेषूत्पन्नः, स चाचिन्तयत् भव्यमिदं परिव्राजकपुत्रेण परिकल्पितं यद्येतद्राजाऽनुतिष्ठति तदा सर्वेऽप्यमी नरकं यान्तीति मम वैरसिद्धिर्भवतीति तमुवाच प्ररूपय त्वमिदम् । लोके साहाय्यं करिष्यामीति

१. सुलसा या याज्ञ. प्र छ।

अभिधाय सर्वत्र रोगानुत्पादितवान् । परिव्राजकेन च राजानोऽभिहिताः यदि पश्वादिभिर्यज्ञं कुरुत तदा सर्वमिदमुपशाम्यति, ते च पश्वादयो यज्ञे निहता दिवं यास्यन्ति नात्र कश्चिद्दोष इति, राजानोऽपि च तथैवानुष्ठितवन्तः । त्रिदिवगमनप्रतीतिनिमित्तं च यज्ञनिहितपश्वादीन् विमाने समारोप्य नभसा गच्छतो मधुदेवश्च दर्शयति रोगांश्च सर्वानुपशमयतीति लोकस्यात्र प्रस्थिता बभूव, ततश्च पिष्पलादेनेत्थं प्ररूपयता गच्छता कालेन राज्ञः सकाशात् आनाय्य मोक्षमेतौ गमिष्यत इति व्याजेन मातापितरौ यज्ञे हुतौ, तदर्थत्वादेव सर्वारम्भस्येति तत्कालादारभ्यानार्यवेदप्रवृत्तिरिति संक्षेपतो व्यासार्थिना तु हरिवंशोऽन्वेषणीय इति आवश्यकबृहद्वृत्तिटिप्पनेऽस्ति ।।४०३।।

गमणागमणमुहेसु य, कुणंति जयणं जियाण केसिं सया । अथिरतणूण पढमं, पच्छा मुणिणो थिराणं च ।।४०४।।

भगवन् ! गमनागमनमुखेषु गमनागमनादिषु साधुव्यापारेषु मुनयः प्रथमं केषां जीवानां यतनां कुर्वन्तीति प्रश्नः । अथ गुरूत्तरः -- सदा निरन्तरं अस्थिरतनूनां द्वीन्द्रियादित्रसजीवानां प्रथमं यत्नं कुर्वन्ति पश्चात् स्थिराणां स्थिरशरीरिणां पृथ्वीप्रमुखेन्द्रियाणां च यतनां रक्षां रचयन्ति ।।४०४।। यत उक्तं च -

तसकायरक्खणट्ठा, काएसु वि हुज्ज कारणे पेह । नइहरणपुत्तणायं, तणूए थूरम्मि पुत्तम्मि ।।४०५।।

व्याख्या – त्रसा द्वीन्द्रियाद्याः बीजानि शाल्यादीनि तेषामस्थिरसंहननां रक्षार्थं कारणतः प्रत्युपेक्षणा न च प्रायश्चित्तं आह तेषु प्रतिष्ठितः

प्रत्युपेक्षणं कुर्वन् संघट्टनादिबाधाविधानात् कथं न दोषभाग्भवतीत्युच्यते, नदीहरणोपलक्षितं पुत्रज्ञातमत्र भवति । 'तणुए थूरे अपुत्त मिति । यथा कश्चित् पुरुषस्तस्य द्वौ पुत्रौ, एकस्तनूकः द्वितीयः स्थूरः, स चान्यदा ताभ्यां सह क्वचित् ग्रामं गच्छन्नन्तराले अपारां नदीमवतीर्णवान् स च नेदीष्टतया सुखेनैव तरीतुं शक्तः परं पुत्रावद्यापि तरणकलायामज्ञौ । तत्र पुत्रद्वये मारयितुं प्राप्ते सति स किं करोतीत्याह –

"जइ सेह विज्ञ सत्ती, उत्तारिज्जा तओ दुवग्गेऽपि । थूरो पुण तणुयरं, अवलंबंतो वि बोलेइ ।।१।।"

यदि तस्य शक्तिस्ततो द्वावपि तारयेत्, अथ नास्ति सामर्थ्यं ततो यो लघुवपुस्तं तारयति, तस्य सुखेनैव तारणीयत्वात् । यः स्थूरः स तनुकतरस्तोकमप्यवलम्बमानः शरीरभारेणात्मानं तं च नद्यां बोलयति । अत्रार्थोपनयः पितृस्थानीयः साधुः पुत्रस्थानीयाः स्थिरास्थिरसंहननः पृथ्वीकायादयः, ततः साधुना षडपि कायाः प्रथमं रक्षणीयाः । अन्यतरेषां गमनमन्तरेणाध्वगमनादिषु प्रत्युपेक्षणैव स्यात्, ततः स्थिरसंहननां पृथ्व्यादीनां विराधनामभ्युपेत्याप्यस्थिरसंहननः त्रसादयो रक्षणीया इति । अमुमेवार्थं स्पष्टयति -

"अंगारखुड्डुपडिअं, दट्ठूण सुअं बिइ अमन्नं । पंचलिल्लेणीणेत्तो, किं पुत्ते न कुणइ पायं ।।१।।"

तं वा अणुक्कमंतो, चयइ सुअं तं च अप्पगं चेव । निच्छिन्ने हुरुयाई, तं पिहु तारेज्ज जो पडिओ ।।२।।

पृथिव्यादिभ्यः पूर्वं त्रसादीनां रक्षा कार्या इति विचारः ।।४०५।।

अथ कर्मजीवयोः सबलनिर्बलत्वं पृच्छति –

को कम्माण जियाणं, बलवं जीवो सरीर-मणबलवं । सो धिइ तणु बलहाणो, जया तया सबलकम्माइं ।।४०६।।

भगवन् ! कर्मणां जीवानां च मध्ये परस्परं को बलवान् इति प्रश्नः । अथोत्तरः – यदा शारीरमनोबलवान् भवति स यदा धृतिसंहननबलोपेतः स्यात् तदा जीवः सबलः सन् द्रव्य-क्षेत्र-काल- भावशुभयोगेन स कर्माणि क्षपयति । यदा च स धृतितनुबलहीनः स्यात् तथाविधाशुभद्रव्यक्षेत्रादियोगतो निर्बलसामग्रीभावेन सबलकर्मवशपतितो जीवः स्यात्, तदा कर्माणि सबलानीति । यत उक्तं च –

"ववहारनयं पप्पओ, गुरुआ लहुआ य मीसगा चेव । लेट्ठुगपईवमारुअ, एवं जीवाण कम्माइं ।।"

यानि तिर्यगूर्ध्वं वा क्षिप्तान्यप्यधः पतन्ति तानि द्रव्यानि लेष्टुप्रमुखानि गुरुकानि, यानि तूर्ध्वगतिस्वभावितानि लघुकानि दीपकलिकादीनि, यानि तिर्यग्गतिधर्माणि तानि गुरुलघूनि यथा मारुतः, एवं कर्माण्यपि, यैर्जीवा अधोगतिं नीयन्ते तानि गुरुकाणि, यैस्तूर्ध्वगतिं तानि लघुकानि, यैः पुनस्तिर्यक्षु मनुष्येषु वा गतिं वा कार्यन्ते तानि गुरु-लघूनि । ननु जीवा यथा स्ववशाः कर्म बध्नन्ति तथा गतिरपि स्ववशतयैव किं न स्यात् ? उच्यते –

"कम्मं चिणंति सवसा, तस्सुदयंमि य परवसा हुंति । रुक्खं दुरुहइ सवसो वि, गलइ य परवसो तत्तो ।।१।।"

जीवाः स्ववशा एव मिथ्यात्वाविरत्यादिभिः कर्म चिन्वन्ति परं तस्योदये ते परवशा भवन्ति, यथा कश्चिद् वृक्षमारोहन् स्वतन्त्र एवारोहति, स च दुःप्रमादात् ततो विगलन् स्वकाममन्तरेणैव विगलति, ननु तर्हि संसारिणः किं सर्वथा परवशाः ? न, यतः

"कम्मवसा खलु जीवा, जीववसाइं कहिंचि कम्माइं । कत्थइ धणिओ बलवं, धारणिओ कत्थइ बलवं ।।१।।"

संसारिजीवाः प्रायेण कर्मवशा एव परं कुत्रचित् प्रबलधृतिबलादिसद्भावे कर्माण्यपि जीववशानि, यथा जनपदमध्यवर्तिनि विद्यमानविभवे वा धारणिके ऋणधारके धनिको बलीयानवधारणिकं प्रत्यन्तग्रामे पल्ल्यां वा गत्वा स्थितः न वा तथाविधं तस्य द्रव्यमस्ति ततो धारणिको बली तथाऽत्रापि ।।४०६।।

धणियसरिसं तु कम्मं, धारणिसमाउ कम्मिणो हुंति । संतासंतगुणा, जह धारणगधिइ तणू एवं ।।४०७।।

धनिकसदृशं कर्म, धारणिकसमाः कर्मिणः सुख-दुःखादिभोगा अपि ऋणधारकत्वात्, यथा च सदसद्धना धारणिका भवन्ति, सद्धने धारणिके धनिको राजकुलादिबलेन तं धृत्वा बलादपि स्वलभ्यं गृह्णाति, धारणिकश्च तस्मिन् दत्तेऽनृणीस्यात् यस्य तु ते न स्तः स कर्मणा वशीकृतः दुःसहं दासत्वादिदुःखमनुभवति, एवमत्रापि यस्य विशिष्टधृतिबलं शरीरबलं च स्तः स कर्म क्षपयित्वा सुखेनैवानृणीभवति, यस्य तु ते न स्तः स कर्मणा वशीकृतः शारीरमानसदुःखानि भुङ्क्ते, ।।४०७।। आह- धृतिसंहननबलोपेतो यत् कर्म क्षपयति किमुदीर्णमनुदीर्णं वा ? उच्यते -

सहणोऽसहणो कालं, जहे धणिओ एवमेव कम्मं तु । उदियाणुदिए खवणा, हुज्ज सिया आउवज्जेसु ।।४०८।।

धनिको द्विधा सहिष्णुर्यः कालं प्रतीक्षते, इतरस्त्वसहिष्णुः एवं कर्मापि किञ्चित् तु स्वकालपूर्तौ, किञ्चित् तु तामन्तरेणापि स्वविपाकं दर्शयतीत्येवमुदीर्णस्यापि च कर्मणः क्षपणां धृत्यादियुक्तस्य स्यात्, **सियत्ति** – स्यात् कदाचित् कस्याप्येवं भवति, न सर्वस्य, यस्तु संहननबलविहीनः स नवरमनुदीर्णकर्म लेशतः क्षिपेत्, न सर्वतः । **आउवज्जेसु** त्ति – आयुर्वर्जानां शेषकर्मणामनुदीर्णानामपि क्षपणं भवति । आयुषस्तु उदीर्णस्यैव क्षपणमिति भावः, एवं जीवकर्मणोर्धनिकधारणिकदृष्टान्तेन तुल्यमेव बलीयस्त्वमुक्तं –

"दृग्नाशो ब्रह्मदत्ते भरतनृपजयः सर्वनाशश्च कृष्णे, नीचैर्गोत्रावतारः चरमजिनपतेर्मल्लिनाथेऽबलात्वम् ।
निर्वाणं नारदेऽपि प्रशमपरिणतिः स्याच्चिनी (-)सुतेऽपि, इत्थं कर्मात्मवीर्ये स्फुटमिह जयतः स्पर्धया तुल्यरूपे ।।

इति श्रीकल्पो उद्दे. १, द्वितीयखण्डे ।।४०८।। अथ – जीवस्य वैरविषयं पृच्छति –

कस्सासीविसविसओ, उक्कडविसओ हु वेरविसओ सो । अग्गिसम्मतावसस्स, असंखकालेण नुत्तिन्नो ।।४०९।।

भगवन् ! आसीविषविषतः कस्य विषस्योत्कटविषयः, कस्योत्कटगोचर इति प्रश्नः । अथोत्तरः – वैरो विषविषयः, स वैरविषयः अग्निशर्मतापसस्य असंखकालेऽपि न उत्तीर्णः, तस्य तु द्वात्रिंशदधिकैकशतसागरोपमेषु गतेष्वपि समरादित्यजीवगुणसेननृपोपरितो नोत्तीर्ण

इति । तत्र अग्निशर्मतापसाख्यानं समरादित्यचरित्रे, तत्राशीविषविषयस्वरूपं यथा आस्यो दंष्ट्रास्तासु विषं येषां ते आसीविषास्ते च द्विधा, जातितः कर्मतश्च तत्र जातितो वृश्चिक-मण्डूक-सर्प-मनुष्यजातयः क्रमेण बहु-बहुतर-बहुतमातिबहुतमविषविषया यथा – वृश्चिकविषं हि उत्कृष्टतोऽर्धभरतक्षेत्रप्रमाणं शरीरं व्याप्नोति । मण्डूकविषं तु भरतक्षेत्रप्रमाणं सर्पविषं तु जम्बूद्वीपप्रमाणं मनुष्यविषं तु समयक्षेत्रप्रमाणं शरीरं व्याप्नोति, कर्मतश्च पञ्चेन्द्रियतिर्यञ्चो मनुष्या देवाश्च आसहस्रारात्, एते हि तपश्चरणानुष्ठानतोऽन्यतो वा गुणत आशीविष-वृश्चिक-भुजङ्गमादिसाध्यां क्रियां कुर्वन्ति, शापदानादिना परं व्यापादयन्तीत्यर्थः । देवाश्च पूर्वं मनुष्यभवे अर्जिताशीविषलब्धयः सहस्रारान्तदेवेषु उत्पन्नाः अपर्याप्तावस्थायां प्राग्भवाशीविषलब्धिमन्तो द्रष्टव्याः । ततः परं शापादिना परव्यापादनसामर्थ्येऽपि तल्लब्धिव्यपदेशनिवृत्तिरिति । तत्र तेषां शुक्ललेश्यापरिणामत्वात् अग्निशर्मतापसवैरविषनिर्माणस्वरूपं समरादित्यकेवलिचरित्रतोऽवसेयम् ।।४०९।।

अथ मोहनीयस्थानस्वरूपं पृच्छति –

के मणगिहमज्जघडा, जाणि जियाणं च मोहठाणाणि । विगला जेहिं मुणंति, न हियाइं अहियाइं कज्जाइं ।।४१०।।

भगवन् ! मनोगृहमद्यघटा के इति प्रश्नः । अथ गुरूत्तरः – यानि जीवानां मोहनीयस्थानानि तानि सर्वाण्यपि मद्यघटा, **मज्जं व मोहणियमिति** वचनात्, (कर्म. १ गा. १३) कुतो ? यतः – यैर्मोहनीयस्थानैः कृत्वा विकला मद्यपानिपुरुषवत् गतचेतना न हितानि अहितानि कार्याणि मन्वन्ति न विदन्ति, यत उक्तं –

"यदयं स्वामी यदिदं सद्म, सर्वं चैतन्मिथ्या छद्म । यदयं कान्तो यदियं कान्ता, सोऽयं मोहो हन्तदुरन्तः ।।१।।"

"जाता कति नहि सुखसंबन्धा, न विदन्त्येते जीवा अन्धाः । कटरे मोहनटस्य विलासः, सर्वो नव इव पुनराभासः ।।२।।"

"दारा परिभवकाराः बन्धुजनो बन्धनं विषयाः । कोऽयं जनस्य मोहो, ये रिपवस्तेषु सुहृदाशा ।।३।।"

मोहनीयस्थानानि यथा –

"वारिमज्झेवगाहित्ता, तसे पाणे वि हिंसई । छइत्तु मुहं हत्थेणं, अंतोनायं गलेरवं ।।१।।"

"सीसा वेढेण वेढित्ता, संकिलेसेण मारई । सीसम्मि जेहु आहम्म, दुहमारेण हिंसई ।।२।।"

"बहुजणस्स नेयारं, दीवं ताणं च पाणिणं । साहारणे गिलाणंमि, पिहु किच्चं न कुव्वइ ।।३।।"

"साहु अकम्म धम्माओ, जे भंसेई उवट्ठिअं । नेयाओयस्स मग्गस्स, अवगारम्मि पवट्टइ ।।४।।"

"जिणाणंणंत पाणीणं, अवन्नं जो उ भासए । आयरिय-उवज्झाए, खिंसई मंदबुद्धीए ।।५।।"

"तेसिमेव य णाणीणं, सम्मं नो पडितप्पइ । पुणो पुणो अहिगरणं, तित्थभेए य वट्टए ।।६।।"

"जाणं आहम्मिए जोए, पुणो पुणो पऊंजए । कामे दमित्ता पत्थेई, इहन्नभविए इय ।।७।।"
"भिक्खूणं बहुस्सुए हं ति, जे भासइ अबहुस्सुए । तहा य अतवस्सीओ, जो तवस्सीत्ति हं वए ।।८।।"
'जायतेएण बहुविहं, अंतो धूमेण हिंसई । अकिंच्चमप्पणो काऊं, कया मएण भासइ ।।९।।"
'निय उवहिं पणिहीए, पलिऊंचे साइजोगजुत्ते य । बेइ सव्वं मुसं वयसि, अज्झीण झंझए सया ।।१०।।"
"अद्धाणंमि पवेसित्ता, जो धणं हरइ पाणीणं । वीसंभित्ता उवाएणं, दारे तस्सेव लुब्भइ ।।११।।"
'अभिक्खमकुमारि त्ति कुमारित्तिं अहं वए । एवं अबंभयारीवि, बंभयारी त्ति हं वए ।।१२।।"
"जेणेविस्सरियं णीए, चित्ते तस्सेव लब्भइ । तप्पभावुड्ढिए वावि, अंतरायं करेइ से ।।१३।।"
"सेणावइं पसत्थारं, भत्तारं वावि हिंसई । रट्ठस्सं वावि निगमस्स, नायगं सेट्ठिमेव वा ।।१४।।"
"अपस्समाणो पस्सामि, अहं देवु त्ति वा वए । अवन्नेणं च देवाणं, महामोहं पकुव्वई ।।१५।।"
व्याख्या आवश्यकवृत्ति, पत्र-१६४, ।।४१०।।

अप्पा दुही भवइ किं किर कुव्वमाणो, चोरिक्कओ परधणाइ य गिण्हमाणो ।
आया दुही य वहधम्मुवएसमाणे, सो तावसो जह असच्चपरालदाणे ।।४११।।

भगवन् ! आत्मा **किं किर कुव्वमाणोत्ति** – किलेति निश्चये, आत्मा किं कुर्वाणः सन् दुःखी भवतीति प्रश्नः । अथ गुरूत्तरः - - आत्मा चोरिक्करा-चौर्येण चौरकर्मतया परधनादि च शब्दादन्यदपि अकृत्यं कुर्वाणः परधनादि गृह्णन् दुःखी स्यात् । यत उक्तं तथा च-

"चोरिक्कवंचणा कूडं, कवडपरदारदारुणमइस्स । तस्स च्चिय तं अहिए यं, पुणो वि वेरं जणो वहइ ।।१।।" [उप.माला. ४५७]

"चौर्यपापद्रुमस्येह, वधबन्धादिकं फलम् । जायते परलोके तु, फलं नरकवेदना ।।२।।" [योगशास्त्र प्रकाश-२ गा. १२५]

स तु चौरः सप्तविधः स्मृतः, यथा –

"चौरश्चौरार्पको मन्त्री, भेदज्ञः क्राणकः क्रयी । अन्नदः स्थानदश्चेति, चौरः सप्तविधः स्मृतः ।।१।।"

तथा – **"अनादानमदत्तस्यास्तेयव्रतमुदीरितम् । बाह्याः प्राणा नृणामर्थो हरता तं हता हि ते ।।२।।"**

तथा च आत्मवधधर्म उपदिश्यमानं जीववधो धर्म इति वदन् आत्मा दुःखी स्यात् । यतः –

"विश्वस्तो मुग्धधीर्लोकः, पात्यते नरकावनौ । अहो ! नृशंसैर्लोभान्धैः, हिंसाशास्त्रोपदेशकैः ।।१।।"

"हिंसा विघ्नाय जायेत, विघ्नशान्त्यै कृताऽपि हि । कुलाचारधियाऽप्येषा, कृता कुलविनाशिनी ।।२।।"

"कुणिर्वरं वरं पङ्गुरशरीरी वरं पुमान् । अपि संपूर्णसर्वाङ्गो, न तु हिंसापरायणः ।।३।।" [यो.शा. प्र.२ -८८-९०]

तथा – **किं ताए पढियाए, पयकोडीए परालभूयाए । जं इत्तियं न नायं, परस्स पीडा न कायव्वा ।।१।।** (संबोध प्र. ११३०) तथा चात्मा असत्यपरालदाने सति दुःखी स्यात् । यत उक्तं च भगवत्यां यथा –

जे णं भंते परं अलिएणं असब्भूएणं अब्भक्खाणेणं अब्भक्खाइ तस्स णं कहप्पगारा कम्मा कज्जंति ? गोअमा ! जेणं परं अलिएणं असंतएणं अब्भक्खाणेणं अब्भातिक्खई तस्स णं तहप्पगारा चेव कम्मा कज्जंति जत्थेव णं अभिसमागच्छति तत्थेव णं पडिसंवेदेति, शते ५, उद्दे. ६ ।।

स आत्मा कथं दुःखी स्यात्, यथा स तापसः, तत्संबन्धश्च यथा – जंबूद्दीवे बंगालजणवए कणयपुरे णयरे चंडसासणो जियसत्तूराया, तस्स केण य तक्करेण मुट्ठं भंडारसारं, तओ आउलीहूआ णायरा णयरारक्खिया गवेसाविज्जंति चोरा गंठिभेयगा जूआरा जूआरठाणाणि मुद्दिज्जंति भवणदुवाराणि सोहिज्जंति गिरिगुहाइठाणाणि, एवं गएसु केसु वि दिणेसु ताव तत्थेव रायपुरे रायपुरिसेहि रयणीपरिभमंतेहिं तावसवेसधारी सलोत्तरित्थो चेव सो गहिओ महाचोरो त्ति काऊ णीओ सुबुद्धिमंतिसमीवं, तेण चिय कावालिया परिव्वायगा लिंगधरा वि चोरियं करेंति त्ति नत्थि तेसिमन्नमकरणिज्जं कलिऊणं वज्झो समाणत्तो । तओ रायपुरिसेहिं मुंडावियं से मुंडं, विलित्तं गरुभूतीए से

अंगोवंगंमि सिविलत्तं से मुहं, कओ विगयवत्थो, विहियकओ कणवीरमालो, छित्तरकया य वत्तो कायपिच्छचामरो उब्भउरा सहारोविओ काहलडिंडिमसद्देए मिलियबहुजणपरिवेढिओ, धणियं दक्खिणदिसामसाणे तं च सुक्कपायवसाहानिलीणवायसं वायसरसंतकरयररवं भीसणयरं दड्ढमडयदुरहिगंधं, गंधवसा लुद्धरुरुवेतसाणं साणकंकालाइनिवहभासुरं भासुरकाङ्काइणी ति जणयं तत्थ भणियं व चोरमारगहिं अहो जणा ईमेण चोरेण मुट्ठं णयरे अज्जरायगहिओ सरित्थो, इमिणा अवराहेणाएसं विवाइज्जइ ता अण्णो वि कोइ कणगपुरे चोरियं करिस्सइ, तस्स वि एरिसो दंडो भविस्सति भणिऊणं भणिओ चोरमारएहिं भद्द समार हिट्ठदेवयं ताहि सग्गाभिमुहं ति, तओ तेण दीहं नीससिऊण सदुक्खं पेच्छिऊणं जणलोगं भणियं परिचिंतिअं च, तेण कहा मलियवयणं होहि, अइसयनाणिमुणिवयणं ति चिंतियं, अह इयाणि मज्झजुत्तं, जं जस्स मए सुढं तं तस्स संतियं रित्थं साहेमि, तं च सव्वधरणिगयं तओ किं तेण तत्थ ठिएण त्ति चिंतिऊण भणिया रायसंतिया पुरिसा अहो भद्दा मए जं जस्स गिहे मुट्ठं तं सव्वं आरामुज्जाणगिरिनइतीरे सुगोविअमत्थि, तओ तं घेत्तूण तुज्झे अप्पेह, जस्स जस्स तं तस्स तिणमित्तम्मि, सचिण्हं सव्वथाणं कहियं तं अप्पिऊ पच्छा मारेज्जह ममंति, तओ तेहि तं कहि मंतिस्स, तओ जोयाविय च तेणं नियवीसासिपुरिसेहिं दिट्ठं च तं सव्वं जम्मि ठाणे, दट्ठूण य तं दव्वं मंतिस्स मणे चिंता समुप्पन्ना एवं सुहपरिणामवासियहियओ, चोरकुलपुत्तो खु ण हवइ त्ति । तओ करुणापडिवन्नहियएण सद्दाविऊण सविणयं भणिओ, भो वं तावस ! अप्पियं ताव जं जस्स संतियं दव्वं, अहा तावसवेससहावचरिएण अम्हाणं अच्छरियं भासइ सा कहसु जं परमत्थं फुडत्थं च । किमेवं परुप्परविरुद्धं, एवं च कहिए

मंतिणा, भणियं तावसेणं एवं च कामभोगविसयासत्ताण जीवाण णत्थि किं चि परुप्परविरुद्धं अविय –

"जणणिजणयाण सुकयं, ण गणंति ण बंधु-मित्तसामीणं । विसयविसमोहियमणा, पुरिसा परलोगमग्गं च ।।१।।"

एवं च कहि मित्तो भणियं मंतिणा जुज्झए एयं हीणकुलुप्पणाणं विन्नाणदरिद्दाणं ण पुणो तुमए सरिसाणं ति ता साहेहि सव्वं सच्चं अवितहं परमत्थं परधणगहणस्स कारणं मज्झ लज्जं मुत्तुण त्ति, किं बहुणा भणिएणं, ति तओ एवं च भणिए भणियं तावसेणं निसुणसु भद्दं अवहिमणो मज्झ वुत्तंतं जहा मणओहिणाए मुणिणा कहियं – अत्थि इहेव भरहवासे कलिंगजणवओ तम्मि सुरपुरसरिसं कुसत्थलं णयरं हारिद्दागुत्तो अग्गिसम्मो माहणो वसेज्जा । तं संताणसुओ अग्गिसोमाभिहाणो पुत्तो अहं त्ति, पुरोहिया हि मारी बहुसत्थपारगो पसुवहाइणा धम्मकिच्चेण ठाणेण जण्णेण सग्गोत्ति कुसत्थोवएसं परूवेतो चिट्ठामि, तओ अन्नया केइ रायावराहं विणावि चोरोत्ति कलिऊण वज्झाणिज्जंति वेयं दट्ठूण भणियं मए महाभुअंगा इमे, वहजुग्गत्ति, वज्झा एव, तओ मम वयणं सुणिऊण एक्केण मग्गे गच्छमाणेण मुणिवरेण मम वयणं सुणिऊण भणियं अहो ! अन्नाणमोहंधयारा त्ति । अहो कट्ठं त्ति, अवि, अविवेगभासा त्ति तं च साहुवयणाणंतरं समुप्पण्णा मे मणचिंता मं उद्दिसिय एसो ससिव्व सोमदंसणो पसंतहियओ णाइदूरट्ठिओ किमिणं जंपइ त्ति पुच्छियव्वो इमो, तउ तस्समीवं गंतूणं मए चरणेसु निवडिऊण पुच्छिओ, भयवं ! को अन्नाणमोहंधयारो, किं कट्ठं, को अविवेगो त्ति, मुणिणा भणिअं निरावराहिपुरिसाणं वि आलप्पयाणं महाभुयंगमा त्ति कहणं वज्झजोग्ग त्ति, कहणमविवेगभासा त्ति, मए भणियं तं कहमित्ति, साहुणा भणियं जं इमे पुव्वकम्मपरिणइवसेणं

वसणपत्ते निरवराहे वि महाभुअंग त्ति कहणं कूडालप्पयाणं त्ति, अहिलवसि परपीडाकरणमहापावहेउत्ति । एसा वो सुत्ती, जहा अंधस्स अंधभणणे कुट्ठिस्स कुट्ठिकहणे असईए असीलवयणे चोराण चोरभणणे, तत्तुल्लभवणं तुल्लदोसो जं पुण पासमाणस्स अंधभणणं, नीरोगस्स कुट्ठिकहणं सईए असईकहणं, अचोराण चोरभणणे मिच्छापिहाणे पुण दुगुणे पावे तस्स उदयविवागो पुण जहा भणियं च –

"वह-मारण-अब्भक्खाणदाणपरधणविलोवणाईणं । सव्वजहन्नो उदओ, दसगुणिओ इक्कसि कयाणं ।।१।।"

"तिव्वयरे उ पउसे, सयगुणिओ सयसहस्सकोडिगुणो । कोडाकोडिगुणो वा, हुज्ज विवागो बहुतरो वा ।।१।।

[उप.माला. १७७, १७८] इति

अब्भक्खाणदाणं जं पुण पयुवहेण जं जण्णकिच्चेण सग्गो त्ति परूवेसि सो कुसत्थोवएसो, जओ ण जीवघाओ परलोए सुहफलविवाओ भवइ त्ति । जउ भणियं च – "सयलेहिं वि तित्थणायगेहिं, ण हिंसियव्वाणि सव्वभूयाणि" त्ति । अहवा –

"जो कोहेणाभिभूओ, घायइ जीवे सया निरणुकंपो । सो भवचारगवासं, पुणो पुणो पावए बहुसो ।।१।।" अविय,

'जम्मंतरदिण्णस्स य फलसेसमिहेव पाविहिसि जम्मे । थोवदियहेहिं बालय णवरं परआलदाणस्स ।।१।।"

मए भणियं भयवं ! केरिसो जम्मंतराब्भक्खाणदाणविवागो केरिसं वा तस्स फलमणुभअं मए, केरिसं वा फलं सेसं ति । मुणिणा भणियं भद्द ! सुण, अत्थि इहेव भारहे वासे दक्खिणावहे णयरीए माहणपुरे जण्णदेवो अग्गियहो त्ति माहणो, रेवई से भज्जा, तेसिं पुत्तो अतीयसत्तमे

भवे सुकंदाभिहाणो तुमं पुत्तो आसि अज्झाविओ वेयाइयविज्जं सुणावियाइं सत्थाइं, जण्णदेवेणं समुप्पण्णो ते विज्जामाहप्पो, मज्झिओ राइणा वि अण्णं बहुदिवणं बहुमण्णए तुज्झ लोगो गओ कोइ कालो, अण्णया य तम्मि चेव गामे तावसभत्ता, णयरसेट्ठिस्स पुत्ती बालविहवा गोमती नाम, सा अविवेयबहुलयाए इत्थियाजणस्स दुज्जयाए मोहस्स अहिलसणीयाए विसयगिद्धाणं पुरिसाणं वियारकुलघरआए जुव्वणस्स अणवेक्खिऊण नियकुलं अणालोविऊण आयइं तण्णयरवत्थव्वमरुआभिहाणेण वेडंबगेण समं निग्गया, ईओ य तम्मि चेव दियहे तीसे चेव गोमतीए पूयणिज्जो से समयायारपालणपरो अट्ठंगजोगविऊ जोगअप्पा नाम तावसो अप्पडिबंधयाए निस्संगयाए समणाणं च कज्जाभावे य संसियव्वस्स य अणाइक्खिऊण कस्सइ गओ अण्णगामणगराइसु । जाओ य लोगवाओ अहो गोमती पवसिआ । अहो गोमती केणावि समं णिगया त्ति विण्णायं च तुमए तावसगमणं तओ असुद्धयाए तवपरिणामस्स विचित्तचरियाए सत्ताणं समुप्पण्णा ते चिंता, णूणं सा तावसेणं सद्धिं पवसिया भविस्सइ त्ति । अण्णया रायकुले पवत्ता कहा सेट्ठिपुत्ती गोमती ण णिज्जकहं पविसिय त्ति, तओ तीए ऊज्झिण सत्थायारं अवलंबिऊण इयरपुरिसमग्गं अणाविक्खिऊण अत्तणो हलुअत्तं एवं जंपियं किमेत्थ जाणियव्वं अहं जाणामि । राइणा भणियं कहं ति, तए भणियं अओ चेव परकलत्ताइं पेच्छइ महाराय एवंविहा चेव सव्वे पासंडिणो ण एत्थं परमत्थबुद्धी कायव्वा त्ति । एवं च सोऊण विपरिणया धम्मम्मि केई तुच्छबुद्धिणो, एयं च सवणपरंपराए आयण्णियमिणं सेसपरिव्वायगतावसेहिं बज्झो कओ तेहिं परमत्थजाणएहिं, तओ तए एवंविहमिच्छापरिणामवत्तिणा बद्धं तए तिव्वकम्मं, अइक्कंतो कोइकालो, परिक्खीणं तुज्झमाऊअं तओ अपरिचत्तयाए आरंभस्स

मायाबहुलयाए य अणासेवणाए धम्मस्स, विचित्तयाए कम्मपरिणतीणं मओ समाणो एगम्मि सन्निवेसे अजापालगेहे समुप्पण्णो एलगत्ताए, अइक्कंतो कोइकालो, तक्कम्मदोसाओ सडिया ते जीहा, पडियां तत्थ बहवो कीडया, जाया महावेयणा थेवकालेणं चेव खीणं ते आऊअं तओ मरिऊण तक्कम्मदोसेण कोल्लागसण्णिवेसाडवीए समुप्पण्णो सीयालत्ताए जाओ तस्स हडक्कवाओ, तए दोसेण तए खद्धो एगो कोडंबिओ तेण तुह जीहं छुंदिऊण मारिओ तुमं, तओ मरिऊण तुमं जाओ तुमं वत्थधोवगस्स गेहे रासहत्ताए, तत्थ वि जाओ ते हडक्कवाओ, तेण दोसेण तए खद्धो वत्थधोवगस्स पुत्तो, तेण तुज्झ जीहं छिंदिया, जाया महावेयणा, मओ तत्थ, तओ मरिऊण जाओ सुणीयाउयरे साणो, तत्थ ते सडिया कण्णा, जाओ तत्थ वि हडक्कदोसो, खद्धो तं एगस्स बंभणपुत्तो मुहदेसे, तेण तुमं गहिओ, कुट्टियं मुहं, तुट्टिया जीहा, तओ मरिऊण जाओ गणियापुत्तो, पत्तो जुव्वणं, मज्जपसंगी, कयं अन्नया मज्जपाणं, ते तेण दोसेण महया इड्ढीए गच्छमाणो मग्गे राया उक्कोसिओ, दिण्णा ईइणो गाली, छिंदाविया राइणा ते जीहा, मासमेत्तेण छुहा-पिवासापीडिओ मओ । जाओ इमम्मि माहणपुरे माहणस्स जण्णदेवस्स पुत्तत्ताए यं अणुहूअं तए तओ मम एअं सोऊण समुप्पन्नो विराओ, चिंतियं च मए अहो ! दुक्खहेऊत्तणं पमायचरियस्स, पुच्छिओ साहू भयवं ! अहं केरिसं विवागसेसत्ति । तओ तेण अइसयणाणिणा विसेसेण इममवलोइऊण भणियं सकरुणेणं अविवेगिजणाणुरूवा सयललोए विडंबणा सेसंति । तओ मए समुप्पण्णवेरग्गेण मुणिवयणभीएण सुगहियणामपरिव्वायगुरुसमीवे गहिओ तावसवेसो, अइक्कंतो कोइ कालो । इओ य समागओ गुरुस्स परलोगगमणकालो दिण्णा गुरुणा दुवे विज्जा, एगा तालुग्घाडणी आगासगामिणी य महाविज्जा, भणिओ अहं,

गुरुणा वच्छ ! एयाओ धम्मकज्जं विणा न पउंजियव्वा कहंपि महावसरे चेव पऊंजियव्वाओ ण उण सया असारविसयसुहसाहणत्थओ, अण्णं च एयाओ धारयंतेण परिहासेणावि अलियं ण जंपियव्वं, पमायओ जंपिए समाणे य तक्खणं चेव णाहिप्पमाणविमलजलगएणं उद्धबाहुणा अणिमिसलोयणेण एयासिं चेव अट्ठसहस्सेणं जवो दायव्वो त्ति । तउ मए पावमोहियमणेणं साहुभणियं णियतिवसवत्तिणा अविज्ञाणुरायणडिएणं इहपरलोगमग्गविरुद्धं सव्वं पडिकूलमणुट्ठियं, जंपियं च मए कलं असंपत्ताए भयवतीए संझाए आवसहा सण्णारामबउलतलगएणं पमायओ तरुणरामाजणपुच्छिएणं अपरिहाससीलेण वि परिहासेण उभयलोगविरुद्धं अलियवयणं ति, मंतिणा पुच्छियं किं जंपियं त्ति, तावसेण भणियं पुच्छिओम्हि । अहं कलं तक्खणकयजलावगाहकीडाहिं आवसहदेवयादंसणत्थमागयाहिं महुरपरिकलंतवयणाहिं सविब्भमंतणयणाहिं तरुणीरामाहिं इय पुच्छियं मुंड भयवं ! कीस तुमं तरुणगो चेव, जीवलोअसारभूअं जम्मंतरे वि तवस्सिजणपत्थणिज्जं हरिहरचउराणणचंद-सूरपमुहसुरिंदसेवियं सयललोयसलाहणिज्जं विसयसोक्खं उज्झिऊण इमं ईरिसं दुक्करं वयविसेसं सरीरविडंबणापायं पवण्णोसि त्ति, तओ मए तासिं हिययगयं परिहासगब्भिणं भावं वियाणिऊण विमुक्कदीहणीसासं कालाणुरूवं अलियं चेव जंपियं जहा हिययाणुकूलपिययमाविरहसंतापपीडिएणं इमं इइसं दुक्खक्खयविसेसमब्भुवगयं ति जंपिऊण पमायओ चेव ण कओ गुरुजणोवइट्ठो जवो अकयजवो य वसणवसगो विव जाये य अट्ठरत्तसमए अत्थमिए पुण भवणदीवे चंदे पसुत्ते य णायरलोगणिवहे तिमिरदुस्संचरएसु रायमग्गेसु कहकहवि गंतूण पुव्वभंडियं पिव अकयपडिदुवारपिहाणं पविट्ठो सागरसेट्ठिगिहम्मि, तओ गहियसुवण्णरूप्पभण्डो णिगच्छंतो चेव

सागरसेट्ठिगेहाओ आयण्णियपुरिसपयसंचारो विज्ञाणुसरणदिण्णावहाणो खलियविज्ञाणहंगणगमणो सुमरियविज्ञाविहंगदीणभावो विसमभयवसपलायमाणो कुंत-करवालवावडग्गहत्थेहिं गद्दब्भसद्दारवपूरियदिसाचक्केहिं इतो ततो तुरियमवधावंतो गहिओ रायपुरिसेहिं अओ परमवगओ चेव ते मदीओ वुत्तंतो, संपति तुमं पमाणं ति भणिऊण तुण्हिक्को ठिओ तावसो । भणियं मंतिणा एत्थ एगदिवसावणीओ रायालंकारो नत्थि, तेण भणियं दिणो खु सो मए सावत्थिण रवइअस्स, मंतिणा [भणियं किं निमित्तं ? तेण भणियं सुण सावत्थीनिवासी गंधव्वदत्तो, तेण] तण्णयरणिवासिणो इंददत्ताभिहाणस्स सेट्ठिमहंतस्स पुत्ती मयणावली णेहाणुरायवसओ अदिण्णावि बंधुजणेहिं पत्थुए वीवाहमहूसवे जुव्वणाभिमाणिणा इहरहावि अत्तणो विणासमालोविय अवलंबिऊण पुरिसयारं अवहरिऊण परिणीअत्ति एयंवइयरम्मि रुट्ठो राया, अवहरिया मयणावली, निच्छूढो णयराओ, आगओ मे समीवं, जीवियाभिहाणवयंगसहाओ पुच्छिओ मए आगमणपओयणं, साहिअं च तेण, तओ मए तमणुट्ठिय रायालंकारकोसल्लियसहाओ पेसिउ णरिंदपच्चायणनिमित्तं जीविओ, गओ य सो सावत्थिं, अलंकारदरिसणपुव्वयं विण्णत्तो तेण राया एय.वइयरेण, कओ से पसाओ, पेसिया गंधव्वदत्तस्स सावत्थिपवेसणणिमित्तं महंतया, णीओ महंतएहिं पवेसिओ राइणा महाविभूइए, दिट्ठो जणयजणणीपमुहेहिं, पाविया तेण कंठगयपाणा नयणावली, एयं निमित्तं ति, मंतिणा भणियं साहु ववसियं मित्तकज्जं वच्छला चेव सपुरिसा हवंति, मंतिणा भणियं अह भयवं ! तुमए वि स विवेगाणुरूवमायरियव्वं ण पुणो उभयलोगविरुद्धं परदव्वावहरणं कायव्वं, अण्णहा इमेण तक्करकम्मवावारेण रायपुरिसहत्थलग्गो सूलारोवणाइदंडेहिं मा पुणो दुक्खी भवेज्जासि त्ति विसज्जिओ तावसो तओ तस्स

परदव्वावहरणवसदुप्परिचत्तयाए तवस्सिजणदोसदाणसहावत्तणे तरुणीरामाजणपरिहाससहावओ अलियवयणभासणत्तणेणं च । तहेव चोरियारियाइविरुद्धकरणवसणओ पविट्ठो कहं चि रायभवणे चोरियाए, गहिओ तेहिं पावोदएणं रायपुरिसेहिं सलोत्तओ, णीओ रायसमीवं, राइणा वज्झो आणत्तो, दिण्णो सूलाए, गओ णरयं ति गाथार्थः ।।४११।। (समरादित्यकथायां चतुर्थे भवे)

भल्लीव के पविट्ठा, हियए मारंति झत्ति जीवाणं । भीति सुहज्झवसाया, किण्हभया सोमिला इव ।।४१२।।

भगवन् ! भल्लीवत् शस्त्रविशेषवत् जीवानां हृदये प्रविष्टाः सन्तः, **झत्ति**त्ति शीघ्रं जीवान् के मारयन्तीति प्रश्नः । अथ गुरूत्तरः - - भीतिप्रमुखा अध्यवसायाः, यत उक्तं च -

"अज्झवसाण णिमित्ते, आहारे वेयणा पराघाए । फासे आणापाणू, सत्तविहं डज्झए आऊं ।।१।।" [आ.नि. ७२४]

अस्यार्थः - रागाध्यवसायेन आयुः क्षीयते यथा -

'एकस्य कस्यचिद् गावो, ह्रियन्ते स्म मलिम्लुचैः । वालनाय गवां जग्मुः, पत्तयः तस्कराननु ।।१।।"

"जलिता वालयित्वा गाः, तत्रैकस्तरुणः पुमान् । गृहीताङ्ग इवानङ्गः, तृषितो ग्राममभ्यगात् ।।२।।"

"तत्रैका ग्रामतरुणी, तमपीप्यत् पयः परम् । शिरो धूनयतोऽप्यस्य, निवृत्यै न न्यवर्तत ।।३।।"

"स उत्थाय युवा यासीत्सा तु तद्रूपमोहिता । अनुरागमहाधूर्तक्षिप्तचूर्णेव तद्वशा ।।४।।"
"निध्यायन्ती तमेवास्थात्, तन्मयत्वमिवेयुषी । अदृश्यत्वं गते तस्मिन्, तस्याः प्राणाः तमन्वगुः ।।५।।" तथा –
"स्नेहाध्यवसायेनापि, आयुः क्षीयते यथा - एकस्य वणिजो यूनः, प्रेयसी प्रौढयौवना । द्वयोरपि तयोः स्नेहः, यः कोऽपि वाचामगोचरः ।।१।।
स वाणिज्याय गत्वाऽथ, प्रत्यावृत्तः समेष्यति । एकाहेन निजावासं, यावत् तावत् परस्परम् ।।२।।
वयस्याश्चिन्तयामासुः, स्नेहः सत्योऽनयोर्नवा । पूर्वमेकस्तदा गत्वा, तस्य कान्तामवोचत ।।३।।
"मृतस्तव पतिः भद्रे !, श्रुत्वा वज्राहतेव सा । सत्यं सत्यमिदमिति, पृष्ट्वा वारत्रयं मृता ।।४।।"
'तत्स्वरूपं च वणिजः, कथितं सोऽपि तत्क्षणात् । एषोऽपि प्राप पञ्चत्वमेव प्रेम्णायुषः क्षयः ।।५।।"
अथ **किण्हभया सोमिला इव**त्ति भाति कृतो यथा सोमिलो वृतः । तद्यथा –
"नगरी द्वारवत्यासीत्, सर्वस्वर्णमयालया । क्षान्तः समुद्रमौर्वाग्निर्भेजे यत् प्रतिबिम्बवत् ।।१।।"
'वासुदेवोऽभवत् तत्र वसुदेवनृपाङ्गजः । देवकीकुक्षीकासारकलहंसः क्षितीश्वरः ।।२।।"
"द्विषः पौरुषवन्तोऽपि यद्बलैरबलाः कृताः । सृष्टिव्यत्यासकरणाज्जिग्ये स्रष्टाऽपि तैः स्फुटम् ।।३।।"

'स्तनं स्तनन्धयं ध्यापयन्तीं स्त्रीं वीक्ष्य काचन । अधृतिं देवकी चक्रे, पृष्टाऽरिष्टारिणा क्षणात् ।।४।।'
'अधृतिं किं विधत्सेऽम्ब, तयोक्तं जात[1] ! जातु मे । तनूजेन न वक्षोजपयः केनाप्यपीयत ।।५।।
वासुदेवोऽवदत् मातर्मा कार्षीस्त्वमिहाधृतिम् । कारयिष्यामि ते पुत्रप्राप्तिमाराध्य देवताम् ।।६।।"
'देवताराधिताऽवादीत्, दिव्यसूनुर्भविष्यति । अभूच्च तनुभूस्तस्या, नान्यथा देवतावचः ।।७।।"
'गजसुकुमाल इति, नाम चक्रे कृतोत्सवम् । सुतां सोमिलविप्रस्य, युता पर्यणाय्यत ।।८।।"
'सोऽन्येद्युः स्वामिनो नेमेः, श्रुत्वा धर्ममभूद् व्रती । विजहे स्वामिना सार्धं, सेर्ष्यस्तस्मिन्नभूद् द्विजः ।।९।।"
'क्रमेण प्रभुभिः साकं, द्वारिकां पुनरागमत् । प्रभुं पृष्ट्वा पितृवने कायोत्सर्गेण स स्थितः ।।१०।।"
तथास्थं तत्र दृष्ट्वा तं रुष्टो दुष्टो द्विजस्ततः । निवेश्य कण्ठुकं मूर्ध्नि, चित्ताङ्गारैरपूरयत् ।।११।।"
तत् कष्टं सहमानस्योत्पन्नं केवलमुज्ज्वलम् । अन्तकृत्केवलित्वेन, तदैव प्राप निर्वृतिम् ।।१२।।
विष्णुः प्रातः प्रभुं नत्वा, सोऽपि चापृच्छत् तथा । क्व मे बन्धुः प्रभुः स्माह, निश्यस्थात् प्रतिमां बहिः ।।१३।।
वासुदेवो गतस्तत्र, परासुमवलोक्य तम् । कुपितः प्रभुमप्राक्षीत्, केनाऽमारि प्रभुर्जगौ ।।१४।।

१. जाता जातु मे तनुजेन । न वक्षोजपयः केनाप्यपायत वासुदेवोऽवदत् प, प२ छ ।

विशतं त्वां पुरीं दृष्ट्वा, यस्य शीर्षं स्फुटिष्यति । कुटुम्बं प्रेष्य विप्रोऽपि, स्वयं यावन्निरैति सः ।।१५।।
तावद् दृष्टोविशन् विष्णुः, ततोऽतिभयसंभ्रमात् । ययौ पतितवत् कुम्भः, तन्मुण्डं शतखण्डताम् ।।१६।।

[आ.नि.तिलकाचार्यवृत्तौ गा. ७२४]

निमित्तादप्यायुः क्षीयते तच्चानेकधा स्यादित्याह –

दंडकससत्थरज्जुअग्गी उदगपडणं विसंवाला । सीओण्हं अरइ भयं खुहा-पिवासा य वाही य ।।१।।
मुत्त-पुरीसनिरोहो, जिण्णाजिण्णे य भोअणे बहुसो । घंसणघोलणपीलण, आउस्स उवक्कमा एए ।।२।।

(आ.नि.गा. ७२५-७२६)

दण्डकसशस्त्ररज्ज्वः अग्न्युदकयोः पतनं विषं व्यालाः - सर्पाः शीतोष्णं अरतिर्भयं-क्षुत्-पिपासा- व्याधिश्च मूत्र-पुरीषनिरोधः जीर्णाजीर्णे च भोजनं बहुशः घर्षणं चन्दनस्येव च घोलनं अङ्गुष्ठाङ्गुलिभ्यां यूकाया इव पीडनमिक्षुप्रमुखादीनामिव आयुष उपक्रमहेतुत्वादुपक्रमा एते, कारणे कार्योपचारात् यथा तन्दुलात् वर्षति पर्जन्यः यथायुर्घृतम् ।।४१२।।

बाणुव्व किमतिदुहयं, मणम्मि भवियाण पावसल्लाइ । किच्चं तस्सुद्धरणं, आलोअणानिंदणाइहिं ।।४१३।।

भगवन् ! भव्यानां मनसि बाणकवत् कुन्तवत् अतिदुःखदं किमिति प्रश्नः । अथ गुरूत्तरः – पापशल्यादि, यद् विसर्पद्यौवन-

धनादिमदेनाकार्यं कृतं महत् तत् पापं वयःपरिणामं स्मृतं सत् हृदयं शल्यं भूतं स्यात्, आदिशब्दान्मायाशल्यं मिथ्यात्वशल्यं निदानशल्यं च, यत उक्तं च –

"इंदियववसेण जाइं, जाइं कीरंति जुव्वणवसेणं । वयपरिणामे सरियाइं, ताइं हियए खडक्कंति ।।१।।"

किञ्च तस्सुद्धरणंति – तस्य पापशल्यादेरुद्धरणविधौ कृत्यं कार्यं विधेयमिति कैरिति आलोचननिन्दनादिभिश्च पापकर्मणः उद्धारः स्यात् । यत उक्तं च – **"आलोयणयाए णं भंते ! जीवे किं जणई ? आलोयणाए णं मायानियाणमिच्छादरिसणसल्लाणं मोक्खमग्गविग्घाणं अणंतसंसारवद्धणाणं उद्धरणं करेई । उज्जलभावणं च णं जणइ उज्जुभावपडिवन्ने वि य णं जीवे अमाई इत्थिवेयणपुंसगवेयं च णं बंधइ, पुव्वबद्धं च णिज्जरेई । निंदणयाए णं भंते ! जीवे किं जणई ! णिंदणयाएणं पच्छाणुतावं जणई । पच्छाणुतावेणं विरज्जमाणे करणगुणसेढिं पडिवज्जई । करणगुणसेढिं पडिवन्ने अणगारे मोहणिज्जं कम्मं उग्घाडेई । गरहणयाए णं भंते ? जीवे किं जणई ? गरहणयाएणं अपुरक्कारं जणइ, अपुरक्कारएणं जीवे अप्पसत्थेहिं जोगेहिंतो नियत्तई, पसत्थेहि पवत्तई, पसत्थजोगपडिवन्ने अणगारेणं अणंतघाइ पज्जवे खवेइ** ।।४१३।। [उत्त. अध्य. २९-५-६-७]

के मुणिसोच्चा पुरिसा, निसंबला जे मया य अविरइया । कोणियचेडयसमरे, सुहडा रुद्दट्टझाणेहिं।
रहमुसले संगामे सुमित्तवरणागणतुओ, सुहडो अणसणसंवेगेण सुसंबलो सुहं पत्तो ।।४१४।।

भगवन् ! मुनिजनशोच्याः पुरुषाः के भवन्तीति प्रश्नः । अथ गुरूत्तरः – ये अविरतिका विरतिविहीनाः सन्तो निःशम्बला मृताः । यथेति गम्यते, यथा कोणिकचेटकमहाराजसंग्रामे सुभटाः । अथ च रथमुशलसंग्रामे सुमित्रो वरनाग-नत्तुकः सुभटः अनशनसंवेगेन सुशम्बलः सन् स सुखं प्राप्तः, यत उक्तं च भगवत्यां श. ७, उद्दे. ९ । सदा सिलाकंटएणं भंते ! संगामे वट्टमाणे कतिजणसयसाहस्सीओ वहियाओ गोयमा ! चउरासीति जणसयसाहस्सीओ वहियाओ, तेणं भंते ! मणुआ णिस्सीला जाव णिप्पच्चक्खाण-पोसहोववासो रुट्ठा परिकुविया समरवहिया अणुवसंता काले मासे कालं किच्चा स कहिं गया कहिं उववन्ना ? गोयमा ! उसन्नं णरगतितिरिक्खजोणिएसु उववन्ना णायमेयं अरहा । रहमुसलेणं भंते संगामे वट्टमाणे कति जणसयसाहस्सीओ वहियाओ गोयमा ! छण्णउति जणसयसाहस्सीओ वहियाओ, ते णं भंते मणुया णिस्सीला जाव उववण्णा, गोयमा ! तत्थ णं दससाहस्सीओ एगाए च्छीयाए कुच्छिंसि उववण्णा, एगे देवलोएसु एगेसु सुकुले पच्चाया, अवसेसा उस्सणं णरगतिरिक्खयोणिएसु उववण्णो, तत्थ बहु जणो एवं आइक्खति, बहवे जणा देवलोए गया, वरुणेणं भंते कालमासं कालं किच्चा कहिं उववण्णे, कहिं गए गोयमा ! सोहम्मे कप्पे अरुणाभे विमाणे देवत्ताए उववण्णे, तत्थ णं तस्स चत्तारि पलिओवमाईतीति, तओ चुओ विसमहाविदेहे सिज्झिस्सइ त्ति वरुणस्स णं पियबालवयसए कालमासे कालं किच्चा कहिं गए ? गोयमा ! सुकुले पत्तयाए से णं भंते ! ततोऽणंतरं उवट्टित्ता केहिं गच्छिहि त्ति । गोअमा, महाविदेहे सिज्झिइत्ति ।।४१४।।

अथ राज्यकार्यचिन्तका अपि केचिद् धन्या धर्मधुरं वहन्तीति दर्शयति -

करेज्ज कज्जचिंतं, वहमाणे आसि धम्महरवसहा । चेडयकुमर नज्झुज्झय, संपइ राय व्व अन्ने वि ।।४१५।।

भगवन् ! राज्यकार्यचिन्तां वहन्तोऽपि के धन्या राजानः जिनधर्मं कुर्वन्तीति प्रश्नः । अथोत्तरः-चेटककुमारपालराजादिवत् । परं केचिन्नरा दरिद्रादिना उपद्रुता अपि धर्मं न कुर्वन्तीति । अत्र चेटकमहाराजा श्राद्धव्रतविशेषेण दिनमध्ये एकमेव शरं मुञ्चति अमोघबाणश्च । अथ च स चेटकराजा[१]पि कूलवालादिप्रबन्धेन नगरमेलनवाञ्छयाऽनशनमुच्चार्य देवतावसरजिनप्रतिमासहितः कूपे झम्पां दत्त्वा भवनपतिसांनिध्येन तद् भवनं समासाद्य विविधदिव्याहारैरभ्यर्थितोऽपि नागाङ्गिना विलासैरक्षोभ्यो मासमेकमनशनमाराध्य दिवि देवोऽभूत् । तस्य च स्वसुताविवाहकरणे नियमोऽभूत् । तथा कुमार[२]पालराजाऽपि हेमाचार्यगुरुप्रतिबोधित एवंविधराज्यर्द्धिसंपन्नोऽपि जैनधर्मप्रभावकोऽभूत्, तस्य च ७२ सामन्तभूपाला आज्ञाकारिणः, तथा च –

"कणाट-गूर्जरे लाटे, सौराष्ट्र-कच्छ-सैन्धवे । उज्जायां चैव भम्भेयं, स रेजे मालवे तथा ।।१।।"

'कुङ्कुणे च तथा राष्ट्रे, कीरे जालन्धरे पुनः । सपादलक्षे मेवाडे, दीपे कासातटे पुनः ।।२।।"

इति अष्टादशदेशेषु अमारिपटहः अन्येषु १४ देशेषु च धनबलेन मैत्रीबलेन च जीवरक्षा । १४४४ प्रासादा दण्ड-कलशमण्डिताः कारापिताः, १६०० जीर्णोद्धाराः, (उध्वराजाः) सप्त शत्रुञ्जयादियात्राः कृताः । २१ ज्ञानकोशाः लिखापिताः । ७२ लक्षप्रमाणरुदन्तीद्रव्यपत्राणि

१. चेटका राजाऽपि प्र० । २. कुमारपालो राजाऽपि प्र० ।

पाठिनः । ९८ लक्षद्रव्यं चैत्ये दत्तम् । भग्नसाधर्मिकोद्धरणे १००० दीनारदानम् । एकस्मिन् वर्षे कोटिदीनारदानम् । एवं १४ वर्षेषु १४ कोटि सुवर्णदानं श्रावकाणाम्, प्रतिदिनं त्रिकालदेवपूजा त्रिभुवनगुरुदेवविहारे नित्यं स्नात्रोत्सवः । हेमसूरिगुरुपादारविन्दे द्वादशावर्तवन्दनकदानम् । ततोऽनुक्रमेण सर्वसाधुवन्दनम् । पूर्वप्रतिपन्नपौषधादिव्रतार्हतश्राद्धवन्दनं च । श्रीसम्यक्त्वमूल द्वादशव्रतपालनम्, तत्र सम्यक्कण्टकैश्चर्याद्युपसर्गेष्वक्षोभः । प्रथमव्रते मारिरित्यक्षरोच्चारे उपवासकरणम्, द्वितीयव्रते विस्मृत्यादिना असत्यभाषणे आचाम्लादिविशेषतपः, तृतीयव्रते मृतधनमोचनम्, चतुर्थं अतः परं पाणिग्रहणनिषेधः । चतुर्मास्यां त्रिधा शीलम्, मनसा भङ्गे क्षपणः, वाचाभङ्गे आचाम्लम्, कायेन भङ्गेऽपि क्षपणः, परनारिसहोदर इति बिरुदम् । भोपलदेवीप्रमुखभार्याष्टकमरणेऽपि प्रधानादिभिर्बहुधोदितेऽपि पाणिग्रहणनियमाभङ्गः । आरात्रिकार्थं सुवर्णमयभोपलदेवीमूर्तिकरणम् । श्रीगुरुभिर्वासक्षेपपूर्वं राजर्षि-बिरुददानम्। पञ्चमव्रतविस्तरो यथा – षट्कोट्यः सुवर्णस्य[1], अष्टौ कोट्यस्तारस्य दशतुला, शतानि महार्हमणिरत्नादीनाम् । ३२००० मणघृतम्, ३२००० सहस्रमणतैलम्, त्रिणि लक्षमूडा प्रत्येकं शालियुगन्धरी मुद्गचनकादिधान्यानाम् । पञ्चलक्षाश्वा । सहस्रगजाः सहस्रकरभाः, ८० सहस्रगावः, ५०० गृहाणि, ५०० हट्टाः । सभा... ☆५०० शकटानि, शतगजाः, ५० सहस्ररथाः, १८ लक्ष सुभटाः, सर्वसैन्यमेलापकाः । षष्ठव्रते सर्वासु दिक्षु पत्तनपरिसरादधिकगमननिषेधः, सप्तमव्रते मद्यामिष-मधु भक्षण-बहुबीज- पञ्चोडुम्बरफलाभक्षानन्तकायादिनियमः ।

१. कनकस्य प्र.। ☆ त्रुटितमस्ति ।

घृतपूरनियमः, देवादत्तफलपत्राहारवस्त्रवर्तिनं स्वदेशाद् बहिः (?) सप्तव्यसनाकरणं चाष्टमव्रते, नवमव्रते सामायिके श्रीहेमसूरिगुरून् विनाऽन्यैः सह जल्पनिषेधः । प्रत्यहं १२ प्रकाश-२० वीतरागस्तवादिगुणनम्, दशमे चतुर्मास्यां कटकाकरणे गाजणीयसुरत्राणं गमनेऽपि पत्तनाद् बहिर्न निर्गमनम्, तत्स्वरूपं च वाच्यं एकादशमे व्रतेऽष्टमीचतुर्दश्योः पौषधोपवासः, रात्रौ कायोत्सर्गे मर्कोटकः पादलग्नः परिजनैरुत्सार्यमाणोऽपि कोपात् पादं न मुञ्चति तन्मृतिशङ्कया स्वपादत्वचा सह राज्ञा स दूरीकृतः । द्वादशव्रते पौषधपारणके दृष्टि-गोचरगतानां परःशतानामप्यास्तिकानां यथार्हवृत्तिदानेन संतोषणम्, सार्धं गृहीपौषधानां स्वावासे पारणकारणम्, दुःखितसार्धार्मिकश्रावकाः, ७२ प्रमाणकरद्रव्यमोचनम्, श्रीहेमसूरिधर्मशालासत्कमुखवस्त्रिकाप्रतिलेखकश्रावकाणां पञ्चशततुरङ्गमद्वादशग्रामाधिपतित्वप्रदानं च इत्यादिजैनधर्मानुष्ठानपरः कुमारपालनरेन्द्रो जैनशासनप्रभावकोऽजनि । तथा संप्रतिराजवदन्येऽपि राजानोऽभुवन् ।।४१५।।

के उत्तमा सयं किच्चं-सुकिच्चं धम्मं, नाऊण जे हु गुणसेणनिवुव्व लिंति ।

जे मज्झिमा गुरूवएसवरेण तं च, धम्मं न लिंति अहमाइ नरा कहं पि ।।४१६।।

गुरो ! उत्तमनराः के इति प्रश्नः । ये स्वयं कृत्यं सुकृत्यं च ज्ञात्वा गुणसेननृपवत् आत्मसाक्षिकं धर्मं लान्ति, के च मध्यमा नराः ? ये गुरूपदेशवरेण कृत्यं ज्ञात्वा धर्मं कुर्वन्ति मध्यमाः । केऽधमाः ? जे कथमपि धर्मं न लान्ति न कुर्वन्तीति ज्ञेयम् । अत्र गुणसेननृपसंबन्धः समरादित्यचरित्रतो ज्ञेयः । उत्तमोत्तमादिषड्विधपुरुषस्वरूपं च यथा – इह ताव समासेणं छव्विहा पुरिसा हवंति तं

जहा- अहमाहमा १, अहमा २, विमज्झिमा ३ मज्झिमा ४ उत्तमा ५ उत्तमोत्तमाः ६ । तत्थ ते अहमाहमत्ति ते पणट्ठधम्मकामाइसण्णा, ववगयपरलोयज्झवसाया सया सुहज्झवसायरहिया अणायंसुहलेसा, असुणियपंचविहविसयरसा महाकुकम्मकारिणो पावा पावायारा फुडियकरचरणसिरोरुहा अहमकम्मकारिणो तेयसोयरिया केवलट्टा भिल्ला पुलिंदा इंगालदाहया ५ कट्ठच्छिद्दया ६ खडवाहया लुद्धाइणो एए सव्वे वि पराओ, किंपि पाविऊण मज्झंपि वा पियंति मंसंपि वा खायंति, अन्नं च -

'अकज्जायरणं किंपि कुणंति, सव्वजणपरिभूया दुहियकम्मकारिणो ।

बहुजणउव्वेवणिज्जमवत्थंतरंमणुहविऊण, परलोए य नरगादिजायणा ठाणाणि भवंति ।।१।।"

अहमा उण इहलोयम्मि भूपडिबद्धा अत्थकामिणिक्कदिण्णहिययया ववगयपरलोयचिंता इंदियसुहाहिलासिणो इयररायसेवया बंदियणनणनट्टकहाहिणो तेहि उवहसंति, धम्मिअजणं निंदंति मुक्खमग्गं दुगंछंति धम्मत्थसत्थं विडंबंति देवकहालावं भणंति अ केण दिट्ठो परलोओ को वा तओ समागओ, केण वा उवलद्धो नरओ केण अवगया जीवभत्ता कहं वा जाणिउ पुन्न-पावसब्भावो । किंच लोयजडा तिदंडधारणादियं कायकिलिसो वयगहणं भोगवंचणादियं डंभो धम्मुवएसो मुद्धजणपयारणं देव-गुरू-पूआदियं धणक्खओ, अओ मुत्तूण अत्थकामे न अन्नो पुरिसत्थो अत्थि । जओ अत्थो हि नाम पुरिसस्स महंतं देवयं । तहाहि अत्थवंतो पूइज्जइ लोएणं परिवारिज्जइ बंधुयणेणं सलाहिज्जए बंदियणेणं बहु मन्निज्जए सयणवमोणं, अवि -

तं नत्थि जं न कीरइ, धणलवलोहेण जीयलोयम्मि । सूरो वि हु अत्थमणोरहेण बुड्डो समुद्दम्मि ।।१।।
कामो उण अत्थविणिओगो, तेण विणा अत्थो निरत्थओ चेव ।
कामेण विणा धणसंपयावि पुरिसाण जायइ अणत्थो, सीलं रक्खंतीए विहवाए जुव्वणभरुव्व ।।२।।
पिय अणुकूली परिवसइ अणुसुवण्णेसु, जसपडहओ वज्जइ, इत्थ समप्पेइ मुक्खसुहं हि किं कवलेहिं खज्जइ ?
"पीणणट्ठंगेणं मयणाहि घणत्थणीओ महिलाओ । एयाइं संति जत्थ य सो सग्गो सेसयं रण्णं ।।१।।"
एवमाइ भासिणो पंचिंदियवसगा य अधम्मबुद्धित्तणओ अधम्मा मयणट्ठा परेसिंपि असब्भूओवएसप्पयाणेण विणासे पयट्टंति, अहमबुद्धित्तणं च परत्थओ तेसिं दुक्खे चेव जं सुहाभिमाणो जउ ।।१।।

किं मओ न मन्नेति वाहगेयं ? किं वा मीणस्स ण वड्ढेति अहिलासातिरेगं गलामिसं ? किं ण तरलेइ वसट्टकमलामोओ महुयरं ? किं न जणइ हरिसं पयंगस्स दीवसिहा ? किं नाणंदेई गणियोरी *जूहाहिवइं, परमत्थचिंतया उण ? ❑अत्थूणे विणासा य तेसिं वावारमवत्थं ति, जहा य एते तहा अन्ने वि इंदियवसं गया दट्ठव्व त्ति, एवं च ते अहमबुद्धित्तणओ अहमा बहुजणगरहिया इह परलोए य बहुवेयणासु गइसु गच्छंति त्ति ।।२।।

विमज्झिमा ण धम्मत्थकामे परोप्परासंबाहेण सेवंति । तओ णं बंभणा रायाणो वणिया कुटुंबिया अन्ने वि इह परलोयावायदंसिणो अहवा दुब्भगयभज्जाइणो दट्ठव्वा ○एते सव्वे वि धम्ममविक्खंति । परलोयविरुद्धं परिहरंति, जम्मंतरे वि सूहवरूवस्सी◆ बहुधणबहुपुत्ता

* अयं शब्दः स्पष्टो न भवति, हस्तिनीवाचकोऽयम् । ❑ इतः मवत्थं ति पर्यन्तं स्पष्टं न भवति । ○ एते इत्यन्तः मध्यमपुरुषवर्णनं प्रतिभाति । ◆ सुभगरूपवन्तः

भविस्सामु त्ति तवं चरंति णादियं सेवंति । जे वि मुक्खमग्गाहिलासिणो कुप्पा वणिया नाणज्झयणतव-चरणरया परमत्थमिच्छादिट्ठिणो ते वि परमत्था दंसित्तणओ वि मज्झिमा जे वि सम्मदिट्ठिणो सण्णियाणा चक्कवट्टिरूववविहवाहिलासिणो चित्तविचित्ताइणो ते वि तव्विहा चेव त्ति ।।३।। मज्झिमा उण धम्मत्थ-काम-मुक्खेसु पसत्था सम्मदिट्ठिणो मुक्खिक्कक्कज्झगहियपरमत्था हीणसत्तयाए कालाणुभावेणं पुत्त-कलत्तनेहनियलिया लोहबंधणबद्धा य जाणंता वि परमत्थं पिच्छंता वि सम्मदंसणनाणचरणमुक्खमग्गं अवगच्छंता वि रागदोसपरिणामं बुज्झंता वि संसारासारत्तणं मुणंता वि कडुयविवागत्तणं मुणंता वि कडुयविवागत्तणं विसयाणं अवलोयंता वि उम्मग्गपवत्तणं इंदियाणं तहावि महुरयाए विसयाणं अप्पडिहयत्ताए अहम्मस्स चवलयाए इंदियाणं अब्भुत्तयाए संसारसहावस्स अणासन्नयाए मुक्खस्स अचिंतसत्तित्तणओ कम्मपरिणईए न सक्कंति महापुरिससेवियपव्वज्जमज्झवसियं तओ हीणसत्तयाए घरवासमावसंति ते उण सावया सम्मद्दिट्ठिणो जहासत्तिगहियवया य अन्ने य पगइभद्दया मुक्खाभिलासिणो पयत्तीए सकरुणा खंतिमद्दवज्जवोववेया दाण-सीलावयते इहलोए बहुजणपसंसणिज्जा होइऊण परलोए सुदेवत्तं वा माणुसत्तं वा पावंति त्ति ।।४।। उत्तमा उण मुक्खिक्कगहियपरमत्था परं परमत्थं मन्नंति त्ति हि उम्मूलिऊण महामोहवल्लिं भंजिऊण विसयकुडीरं विहाडेऊण अन्नाणतिमिरं गलहत्थेऊण रागदोसमल्ले छिंदिऊण नेहपासं विज्झविऊण कोहग्गिणो संवत्तियमाणपव्वया निव्ववियमायाफुंफुया लंघियलोहनीरोहा अजिया कामकुंजरेणं अणोलुग्गा★ इंदियकुरंगमेहिं अविद्दविया भोगतन्हाए, अजिया परीसहेहिं अभग्गाओवस्सग्गेहिं दूरे महिलाविलासाणं अणब्भासे सावज्जाणुट्ठाणाणं देसंतरे असंजमस्स अणंतिए

★ अनवरुग्णाः ।

कुधम्मस्स विइयपरमत्था तोलिऊण अप्पाणयं उज्झिऊण संसारसुहं अगणिऊण पुत्तकलत्तादियं वप्पिऊण कम्मपरिणामं । आसन्नमुक्खभावत्तणओ महापुरिस.....★ सव्वदुक्खनिज्झरणहेऊभूयं इयरजणमणोरहाणां पि दूरावत्तिणं पव्वज्झमुवगयं ति, ते ऊण साहुणो नाणाविहलद्धिसंपन्ना ओहिमणपज्जवकेवलनाणपज्जवसाणा दट्ठव्वा । ते य सुरासुरिंदचक्कवट्टिप्पमुहाणं वंदणिज्जा होऊण मुक्खं वा गच्छंति अणुत्तरविमाणेसु वा सुरिंदा वा इंदसामाणिया वा हवंति त्ति ५ । उत्तिमुत्तिमा उण तित्थयरनामकम्मविवागवत्तिणो तित्थयरा उप्पन्नवरकेवलनाणा निट्ठियट्ठा परकज्झिक्कदिण्णहियया उत्तमगुणरूवसत्तिसंपन्ना चउतिसाइसयसंपओववेयाऽणुदिणं परावबोहणत्थं महिं विहरिऊण आउक्खए सिवमयलमरुअमणंतमक्खयमव्वाबाहमपुणरावत्तयं सिद्धिगइनामधेयं ठाणं वेस्सं पावंति त्ति ।।६।। तओ जोगस्सेव हिउवएसपयाणेणं कुसलमइपवत्तणं कायव्वं ।। षड्पुरुषविचारः ।।४१६।।

जो रज्जवावारमएण मूढो, लोगाण संतावकरोऽतिपावी ।
किं किं भवे तस्स फलं च रोगा, मियासुयस्सेव च नारकित्तं ।।४१७।।

भगवन् ! यो मूढो राज्यव्यापारमदेन लोकानां संतापकरः स्यात्, च पुनरतिपापी पापिष्ठो भवति तस्य किं किं फलं भवेदिति प्रश्नः । उत्तरं तु तस्य सर्वे रोगाः स्युः, **मियासुयस्सेव** त्ति, मृगापुत्रस्येव नारकित्वं च स्यात् । च शब्दाद् बहुकालं भवभ्रमणम् । अत्र मृगापुत्रसंबन्धो यथा (वर्णितः) ।।४१७।।

★ त्रुटितमस्ति ।

किं कुणई दुट्ठसीला, इत्थी दुचिट्ठियं च तं जेणं । वंचिज्जइ रमणाइ य, तिलभट्टजसोहराइव्व ।।४१८।।

भगवन् ! दुष्टशीला स्त्री किं कुरुते, किं समाचरतीति प्रश्नः । तत्र दुष्टं शीलमाचारो यस्याः सा, यत उक्तं च –

अनृतं साहसं माया, मूर्खत्वमतिलोभता । निस्सहत्वं निर्दयत्वं, स्त्रीणां दोषाः स्वभावजाः ।।१।। [आचारोपदेश-१९८]

अथ गुरूत्तरं – सा स्त्री दुश्चेष्टितं करोति येन दुश्चेष्टितेन रमणादिस्वकुटुम्बमपि वञ्च्यते, आस्तामन्यत् परिजनः । अत्रोदाहरणं च तिलभट्टयशोधरादिवत् । यथा धनस्त्रिया तिलभट्टो वञ्चितः । यशोधरनृपो नयनावल्या वञ्चितः । तत्र यशोधरवञ्चनसंबन्धस्तु पूर्वं किञ्चिदुक्तोऽस्ति । तिलभट्टसंबन्धो यथा - मुनिव्रता नगरी, तत्र मुनिपती राजा, तस्य पृथ्वी राज्ञी, तयोर्मुनिचन्द्रस्तनयः । अन्यदा प्रस्तावे राजा मुनिपतिः शिरसि पलितं दृष्ट्वा जातपरलोकभय इति चिन्तयति -

"तिष्ठन्ति द्रव्याणि गृहेषु जाया, विश्रामभूमौ स्वजनाः स्मशाने । देहश्चितायां परलोकमार्गे, धर्मानुगो याति स एक जीवः ।।१।। तथा च-

कथं निर्णयः ? कण्ठेक्का ययाशी, यदि त्वं भवेर्जीव नैकत्र वासी । पदार्थोऽस्ति यो यस्ततः कोऽविनाशी ? विनाशी तदर्थं मुधा किं प्रयासि* ? ।।२०।।

'सुप्तो मानविवर्जितोऽपि जगत; षट्कायरक्षोद्यतः, कृत्वा साधुविहारितां शमरतो निःसङ्गचित्तः क्षमी ।

★ यदि पदार्थमात्रः विनाश्यति तर्हि, तं - तादृशमर्थम्, (कर्मधारयसमासे कृते तदर्थम्) प्रति नियमतोऽसेत्स्यति प्रयोजने किमर्थं प्रयासि ? इत्यर्थः ।

यत् क्वाहं कृतिनिश्चलेन मनसा ध्यायन् पदं नैर्वृतं, स्थास्येऽहं तु कदा शिलातलगतो भव्याय मार्गं दिशन् ।।३।।

इत्यादि वैराग्यं प्राप्य सुतं स्वराज्ये संस्थाप्य दमघोषाचार्यसमीपे प्रव्रजितः, गुरुसमीपे ग्रहणासेवनाशिक्षां गृहीत्वा षड्जीवनिकायरक्षापरायणः कालक्रमेण गीतार्थः सन् एकल्लविहारप्रतिमां प्रतिपन्नः । अन्यदा शीतकाले उज्जयिन्या उद्याने रात्रौ कायोत्सर्गेण स्थितः, तत्र भद्रकैर्गोपालबालकैः प्रवरचीवरैराच्छादितः, तदा तत्र किं जातः, तत्र नगर्यां तिलभट्टो ब्राह्मणोऽस्ति, तस्य दुष्टशीला भार्या नाम्ना धनश्रीरस्ति, स तु प्रचुरतिलसंग्रहकरणशीलत्वात् तिलभट्ट इति लोकेन कथ्यते । स प्रकृतिभद्रो मूर्खत्वेन, निजभार्यादुश्चेष्टितं न वेत्ति किमपि । अन्यदा धनश्रियाऽन्यपुरुषभोगलुब्धया सर्वे तिला निष्ठापिताः, चिन्तितं भयाद्[१] भर्तुः किमुत्तरं दास्यामि ? । ततस्तत्कालोत्पन्नदुर्मत्या बहुविधविहङ्गमादिपुच्छैर्निजदेहमाच्छादयित्वा कृष्णचतुर्दशीरात्रौ खादिराङ्गारभृतं शरावं गृहीत्वा भर्तारं भीषयितुं खले प्राप्ता । तत्र चैवमवददिति[२] तिलभट्टं भक्षयामि तिलान् वा भक्षयामि एवं वदन्ती अङ्गारान् फुत्करोति मस्तकं धूनयति इति वचः श्रुत्वा तच्चेष्टितं विलोक्य यावत् किमपि तिलभट्टश्चिन्तयति तावत् सा समीपमागत्य[३] वदति रे अद्य त्वां स्वहस्तेन मारयिष्यामि, तिलभट्टेनोक्तं हे देवि ! ईदृशं मा वद ममादेशं देहि ततस्तयोक्तं रे अहं भुवने तिलभक्षा नाम देवी विख्याताऽस्मि ततो यदि त्वं जीवितुकामोऽसि तदा मम सर्वान् तिलान् देहि यथा त्वां न भक्षयामि, तव शरीरे चोपद्रवो न स्यात् त्वया गृहे तिलानां निगृहीतव्यमिति, भट्टेन प्रतिपन्नं ततः सा तुष्टमना गृहे

१. चिन्तितं तया भर्तुः प्र। २. तत्र चैवं वदति प्र। ३. समीपं समागत्य प्र।

प्राप्ता । ततो भट्टो भयकम्पितशरीरो गृहमागत्य मृतः, इति दुष्टशीलस्त्रीचेष्टितेन तिलभट्टो मृतः, ततस्तच्छरीरं भार्यावचनेन विटैर्मुनिपतिसमीपे दग्धम् । तस्य चितास्फुलिङ्गैर्मुनिपतिसाधुरुपद्रुतो जातः, प्रभाते गोपैरुपचरितः नगरमध्ये कुञ्चिकश्रेष्ठिनः कथितम् । सर्वेषां जिनगृहाणां कुञ्चिका तस्य हस्ते, अतः कुञ्चिकेन साधुर्निजगृहमानीतः, तत्रस्थानां साधूनां कारणं कथितम्, साधभिरुक्तं अस्माभिर्यत् कार्यं सिद्ध्यति तत् कथ्यताम् । अच्छंकारीभट्टागृहात् लक्षपाकतैलमानयत, शेषं साधुप्रतिक्रियादिकमहं जानामीति, अथाच्छंकारीसंबन्धं पृच्छति शिष्यः ।।४१८।।

"सीलमुयारं च मणं, मुणिदाणे कस्स आसि खंती वि, अच्छंकारीए तं, पसंसिया जा हु हरिणावि ।।४१९।।"

भगवन् ! शीलमुदारं चित्तं वा दानविषये कस्य भव्यस्य आसीदिति अभूत् पुनः क्षान्तिश्च, क्षमा अपि कस्याभूत् ? इति शिष्यप्रश्नः । उत्तरं अच्छंकारीभट्टायाः सा का ? या क्षान्त्या हरिणा देवेन्द्रेण प्रशंसिता, तत्संबन्धश्च – उज्जयिन्यां धनश्रेष्ठी, कमलश्री प्रिया, तयोरष्टानां पुत्राणामुपरि भट्टा नाम पुत्री सर्वबन्धुजनस्य इष्टा मातृपितृभ्यामुक्तं एषा पुत्री गृहमध्ये केनापि न अच्छंकार्या तुंकारो न देयः । अतो अच्छंकारी भट्टा नाम्ना ज्ञाता[१] । यौवनं प्राप्ता, तातेनोक्तं इमां सुतां तस्य दास्ये यः सदाऽस्या वचनकारी, तुकारं वा न दास्यति । ततोऽस्या रूपादिगुणरञ्जितेन मन्त्रिणा[२] तत् तातेनोक्तं प्रतिपन्नम्, सा परिणीता तेन सह देवतेव सुखमनुभवति । मन्त्री तस्या आदेशकारी सदैव सवेलं सकालं गृहमागच्छति । राज्ञोक्तं मन्त्रिन् ! त्वं सवेलं कथा सदा गृहं गच्छति पृष्टम् । तेनोक्तं भार्याऽऽदेशेन[३] कुपितेन राज्ञा अर्धरात्रेण मुक्तो ।

१. भट्टा नाम जातं प्र० । २. पतिना प्र० छ० । ३. भार्यारोषेण प्र० छ ।

गृहमागतः, सा कपाटं विधाय जाग्रती यावत् तिष्ठति । तावन्मन्त्रिणा आगत्योक्तं प्रिये ! कपाटमुद्घाट्य । पुनरप्युक्तं प्रिये ! कपाटमुद्घाटय, तथापि तया नोद्घाटितम्, पुनरप्युक्तं प्रियेऽहं तव किङ्करो द्वारे समेतोऽस्मि द्वारमुद्घाटय परं तया नोद्घाटितम् । ततो मन्त्रिणोक्तं हा मया त्वमीदृशी सकोपा कथमङ्गीकृता ? तद्वचनं श्रुत्वा सा सहसा द्वारमुद्घाट्य रोषेण पितृगृहं व्रजन्ती चौरैर्धृता, सर्वाभरणादिकं पल्लीशस्य समर्पिता । तेन भार्याभावं याचिता, तया इति विचिन्त्य तस्य वचनं नाङ्गीकृतम्, यथा –

'वरं शृङ्गोत्तुङ्गाद् गुरुशिखरिणः क्वापि विषमे, पतित्वाऽयं कायः कठिनदृषदन्तर्विदलितः ।
वरं न्यस्तो हस्तः फणिपतिमुखे तीक्ष्णदशने, वरं वह्नौ पातस्तदपि न कृतं शीलपतनम् ।।१।।"

स बलात्कारं कुर्वन् तस्य जनन्या निषिद्धः । वत्स ! सत्या सह बलं न कार्यम् । सत्यो निजशीलप्रभावेन दुष्टं नरं दृष्ट्या दहन्ति । अत्र बलाकादृष्टान्तं शृणु – वनमध्ये एकः परिव्राजकस्तस्याज्ञानकष्टतपसा तेजोलेश्या जाता । अन्यदा वृक्षोपरिस्थया बलाकया तस्योपरि विष्टा कृता । तपस्विना सा दग्धा, चिन्तितं च यो मामवज्ञास्यति तमहं दहिष्यामि इति विचिन्त्य नगरे प्राप्तः । एकस्याः श्राविकाया गृहे भिक्षायै गतः । तया गृहकार्यपरवशतया शीघ्रं भिक्षा नानीता, ततः कुपितेन तेजोलेश्या मुक्ता, शीलगुणेन सा न दग्धा, कथितं च श्राविकया तपस्विन् ! अहं बलाकासदृशी नास्मि, तेनोक्तं त्वं कथं जानासि ? तस्याः स्वरूपं श्राविकयोक्तम् । तव वाणारस्यां कुलालः कथयिष्यति, तेन तत्र गतेन कुलालपार्श्वे पृष्टम्, कुम्भकारेणोक्तं शीलप्रभावेण तस्याः अवधिज्ञानमुत्पन्नमस्ति ममापि च, अतः शीलं प्रधानं इति दृष्टान्ते

कथिते पल्लीशेन सा सार्थवाहस्य हस्ते विक्रीता, तेनापि भार्यार्थे याचिता, इति विचिन्त्य तया न प्रतिपन्नम् ।

"सुविसुद्धसीलजुत्ता, पावइ कित्तिं जसं च इह नारी । सव्वजणवल्लहं च्चिय, सुगईभागी य परलोए ।।१।।"

"धन्नासी सा नारी, संकडपडिआ वि रक्खइ सीलं । इय चिंतिऊण तीए, पडिवन्नं तस्स नो वयणं ।।२।।"

ततस्तेन बर्बरकुले विक्रीता । तत्र बर्बरास्तस्य देहाद् रुधिरमाकृष्य वस्त्ररञ्जनं कुर्वन्ति । इत्थं तस्या देहस्तत्र चर्मावशेषो जातः । अत्रान्तरे तस्या एको भ्राता तस्या विलोकनाय समागतः । तेन तत्र विलोकिता, दृष्टा परं पूर्वं नोपलक्षिता, संकेतमनसा सा पृष्टा तया सर्वं स्वगृहस्वरूपं प्रोक्तम् । ततो द्रव्यदाने मोचिता । स्वगृहमानीता, विविधौषधैः पुनः स्वस्थशरीराऽसौ, चिन्तितं तयाऽहं रोषदोषेण आपदं प्राप्ता ततो रोषं मुक्त्वा स्वभर्तुर्गृहं गता, तत्र गृहिसुखं भुनक्ति । अथ तस्या गृहेऽन्यदा दग्धमुनिपतिशरीरौषधतैलार्थं साधुद्वयं ग्रामागतम् । अत्रान्तरे सौधर्मेन्द्रेण सभायां अच्छंकारीक्षमा प्रशंसिता, ततः एकेन देवेन तदश्रद्दधानेन तत्रागत्य दासीकरात् वारत्रयं लक्षपाकतैलकुम्भाः पातिताः, तथापि तया दास्युपरि क्षमा कृता, रोषस्य प्रसरो न दत्तः, उदारचित्ततया चतुर्थघटः स्वयमेवानीतः, सम्यक्त्वशीलप्रभावात् स न भग्नः । साधुभ्यां तैलं दत्तम् । साधुचित्ते विस्मयो जातः, अहो उदारचित्तता ! अहो क्षान्तिरिति साधुभ्यां प्रोक्तं महानुभावे ! अस्मत्कृते तैलमानयन्त्या दास्याः करात् घटत्रयं भग्नम्, अतो दास्युपरि कोपं मा कार्षीः, अच्छंकार्या प्रोक्तं भगवन् ! मया कोपफलमनुभूतमस्तीति ततोऽहं कस्योपरि कोपं न करोमि । मुनिभ्यामुक्तं कथमनुभूतं ततस्तया पूर्वोक्तं स्वचरितं कथितम्, एवं मे रोषफलं जातम्, ततो देवो

प्रकटीभूय मां स्तुत्वा इन्द्रप्रशंसां प्रकाश्य तैलं तथा वस्त्रं कृत्वा स्वर्गं गतः । ततः तौ मुनी तैलं गृहीत्वा आयातौ, दत्तं तत् तस्य कुञ्चिकश्रेष्ठिनः । कुञ्चिकश्रेष्ठिना तेन तैलेन मुनिपतिः साधुः स्वस्थशरीरः कृतः । तत्रैव वर्षारात्रं चतुर्मासकं स्थापितः । तत्र मुनिपतिचरित्रं समुत्पन्नम् । तत् तु ग्रन्थान्तरतोऽवसेयम् । तया तु इति क्षान्तिगुणा भाविता इति ।

★...'क्षमा श्लाघा क्षमा हितं' । क्षमा दानं पवित्रं च, क्षमा माङ्गल्यमुत्तमम् ।।२।।

'एक एव क्षमादोषो, द्वितीयो नोपलभ्यते । यदेनं क्षमया युक्तं, अशक्तं मन्यते जनः ।।३।।"

'क्षान्तितुल्यं तपो नास्ति, न संतोषात् परं सुखम् । न मैत्रीसदृशं दानं, नास्ति धर्मो दयासमः ।।४।।"४१९।।

अपगुरात्मफलं पृच्छति –

'किं परदूसणदाणे, परस्स जं दूसणं च जो देई । जहा सीयाए पत्तो, पुणो य पुत्तेण उत्तिन्नं ।।४२०।।

भगवन् ! परदूषणदाने सति परस्य जनमुनिप्रमुखस्य दूषणदाने परापवादस्य आलदाने सति किं जीवस्य किं स्यादिति गम्यमिति प्रश्नः । उत्तरं तु परस्य यद् दूषणं च यो देई प्रयच्छति, स तद् दूषणं तद्रूपापवादमालं प्राप्नोतीत्युत्तरम्, यत उक्तं च –

'परपरिवायमईओ, दूसइ वयणेहिं जेहिं परं । ते ते पावई दोसे, परपरिवाई इय अपिच्छो ।।१।।" तथा च –

★ प्रथमं चरणं त्रुटितमस्ति - क्षमा वरा धर्मधरा, किमपि चरणं संभवत्यत्र ।

'यदिच्छसि वशीकर्तुं, जगदेकेन कर्मणा । परापवादशस्येभ्यश्चरन्तीं गां निवारय ।।" अत्रोदाहरणं –

"जह सीयाए त्ति" यथा पूर्वभवे मुनिदोषदानेन तत् प्राप्तमिति । तत्संक्षेपसंबन्धश्च यथा – अत्र भरते मृणालकुण्डपुरे श्रीभूतिः पुरोधाः, तस्य सरस्वतीभार्या, पुत्री वेगवती,

'तीए वेगवईए, पूइज्जंतो य वंदमाणो य । दिट्ठो सुदंसणमुणी सुमुणियसुअदंसणोल्लमई ।।१।।"

तो मच्छरेण अहिअं, कहियं सव्वस्स तस्स गामस्स । जह एसो उज्जाणे, महिलाए समं मए दिट्ठो ।।२।।

तत्तो गामजणेणं, अणायरो मुणिवरस्स आढत्तो । एयम्मि अणुत्तिण्णे दोसे गिह्लामि नाहारं ।।३।।

इय सो वि मुणी, गिण्हई अभिग्गहं दुक्करं महासत्तो । सुण्णं वेगवईए, तओ मुहं देवयावसओ ।।४।।

तो सीयाए इमीए, कहिअं गामस्स जह मए अलिअं । भणिअमिणं तो लोओ, मुणिस्सऽहिअयरमणुरत्तो ।।५।।

इय जं मुणिस्स दिन्नं, अब्भक्खाणं कया पुणो सोही । कम्मेण तेण तीइ वि, दोण्णे वि जायाइं एयाइं ।।६।।

सा सुद्धं परिवालिऊण, पवज्जमणसणं काऊं । इंदत्तेणुववन्ना, बारसमे अच्चुए कप्पे ।।७।।४२०।।

किं करुणापरिणामो, कुणइ मणोवंछियं च जीवाणं । रज्जाइ·य सुरसुक्खं, मालागारुव्व पावेइ ।।४२१।।

भगवन् ! जीवानां हृदये करुणापरिणामो दयाध्यवसायः किं करोति किं विधत्ते इति प्रश्नः । उत्तरं च मनोवाञ्छितं कल्पद्रुमवत् पूरयति तथा राज्यादि सुरसौख्यं क्रमेण मुक्तिमपि च प्रापयति । यत उक्तं च –

'जं आरुग्गमुदग्गमप्पडिहयं आणेसरत्तं फुडं रूवं अप्पडिरूवमुज्जलतरा, कित्ती धणं जुव्वणं ।
दीहं आऊमवंचणो परियणो पुत्ता सुपत्तासया तं सव्वं सचराचरम्मि वि जए, नूणं दयाए फलं ।।१।। [सं.प्र. ११२८]

तथाहि क्षितिप्रतिष्ठिते ग्रामे केनाप्यारामिकेन पञ्चमत्स्याः स्तोकजलमध्ये तडफुडंकुर्वाणाः जातकरुणापरिणामेन स्तोकजलमध्यात् प्रचुरजलमध्ये मुक्ताः । ततः साधुगिरा प्रशान्तहृदयः स काले मृत्वा सुकुलपुत्रः समजनि । तस्य बाल्येऽपि पितृ-मातृमरणं जातम् । ततः देशान्तरं प्रति निर्गतः अन्तरा क्वचिदटव्यां रात्रौ वटवृक्षाधः स्थितः । तत्रस्थैः पञ्चभिर्यक्षैः स दृष्टः । अयं पूर्वभवोपकारीति ज्ञात्वा कथितं – अस्य पञ्चमदिने राज्यं भविष्यतीति, स श्रुत्वा जहर्ष, क्रमेण स पञ्चमदिने श्रीनिकेतनपुरे प्राप्तः, तत्र मृतपुत्रनृपतौ राज्यं प्राप्तवान् । अमात्याद्यारोपितराज्यभारः सुखेन राज्यलीलास्त्र्यादिसुखाद्यनुभवन् सीमाडे राज्योच्छेदाय रुद्धोऽपि स्त्रीभिः द्युतक्रीडामेव करोति, अमात्यैः दुर्गरोधस्वरूपे कथितेऽपि न मुञ्चति द्युतम् । पश्चाद् भार्याभिरपि कथितं तथापि न विरमति । ततः एकस्यां पाशकान् न पातयन्त्यां राज्ञोक्तं –

"सर्वदा पञ्च ते यक्षाः, ददन्ति च हरन्ति च । अक्षान् पातय कल्याणि !, यद् भाव्यं तद् भविष्यति ।।१।।"

इत्युक्ते तैरेव यक्षैः राज्योच्छेदकान् वैरिणो बद्ध्वा राज्ञः पादे क्षिप्ताः । आश्चर्यं जातं लोके । काले मुनिसमागमनयोगे पूर्वभवपृच्छा,

कथितं च ज्ञानिमुनिना पूर्वभवे मत्स्यपञ्चकरक्षणं करुणापरिणामेन कृतं तत्पुण्येन त्वं नृपो जातः, ते मत्स्याः शुभध्यानापूरणात् तद्वटवृक्षाधिष्ठायकाः पञ्चापि यक्षाः जाताः । तैस्तव राज्यं दत्तं प्रतिपन्थिसैन्यं स्तम्भितं इति श्रुत्वा जातजातिस्मृतिः राजा साधुसमीपे सम्यक्त्वमूलं द्वादशव्रतं प्रपेदे । क्रमेणानेककोटिद्रव्यव्ययेन जिनप्रासादमण्डितां महीं विधाय देवभूयं गतस्तृतीयभवे मोक्षं गमीति ।।४२१।।

को कस्स सुहं दुक्खं, कुणइ सपुण्णं कयं सपावं च । मूढो परप्पसायं, परस्स दोसं पयासेइ ।।४२२।।

भगवन् ! सुखं दुःखं च जीवस्य कः करोतीति प्रश्नः । उत्तरं च स्वपुण्यं - पूर्वकृतं स्वकीयं पुण्यं सुखं करोति, पूर्वकृतं च स्वकीयं पापं दुःखं कुरूते । यत उक्तं च –

'रम्यं रूपं करणपटुताऽऽरोग्यमायुर्विशालं, कान्ता लक्ष्मी सुकुलसुधनं सूनवो भक्तिमन्तः ।
षट्खण्डोर्वीसु परिवृढत्वं[१] क्षीरशुभ्रा च कीर्तिः, सौभाग्यश्रीरिति फलमहो पुण्यवृक्षस्य सर्वम् ।।१।।

तथा पापाच्च –

कुग्रामवासः कुनरेन्द्रसेवा, कुभोजनं क्रोधमुखी च भार्या । कन्याबहुत्वं च दरिद्रता च, दुःखं च रोगा बहुपापयोगात् ।।२।।

तथा – **अनाज्यं भोज्यमप्राज्यं, विप्रयोगः प्रियैः सह । अप्रियैः संप्रयोगश्च सर्वं पापविजृम्भितम् ।।३।।**

---

१. यशः क्षीरधवलं प्र छ ।

मूढो परप्पसायं ति – मूढो जनः स्वसंबन्धिमित्रादिना ग्रामान्तरादिसमागतः, सुखादि पृष्टः सन् युष्मत्प्रसादादिति वक्ति परं पुण्यप्रसादाद् धर्मप्रसादादिति न वक्ति, तथा च दुःखोत्पत्तौ अहमनेन दुःखीकृत इति वक्ति । परं मूढ इति न वक्ति, यदहं पूर्वकृतस्वपापेन दुःखीकृतः । अत्रार्थे निमित्तमात्रं तु सुख-दुःखादौ च द्रव्य-क्षेत्र-काल-भावादिकं स्यात् । गुणसुन्दरीकथानकदृष्टान्तो यथा –

भद्दिलपुरे अरिसिंहो राजा, कनकमाला राज्ञी, तयोः पुत्री गुणसुन्दरी ज्योतिर्निपुणा जिनधर्मवासिता च, एकदा यौवनप्राप्ता राजसभान्तर्गता । तदा राज्ञा श्रीमदाज्ञनः पृष्टः, कस्य प्रसादात् यूयं सुखं विलसथ, तैरुक्तं राजाधिराज ! तव प्रसादेन इति श्रुत्वा गुणसुन्दर्या तु निरपेक्ष्य गाथोक्ता, **'सा जयउ ए लच्छी, जस्स पसाएण ईसरजणस्स । सव्वमलिअं पि वयणं, सज्जणपुरिसा वि मन्नंति ।।१।।"**

ततो रुष्टेन राज्ञा सर्वमुद्दाल्य त्रुटितशिटितखण्डितवस्त्राणि दत्त्वा मूलीवाहकदरिद्रस्य दत्ता । ततः सा स्वकर्मफलमिति चिन्तयती तस्य गृहं गता तं भर्तारं निर्वाहयति देवतावत्, तस्य भक्तिं च करोति, अन्यदा तं प्रति वक्ति त्वं वाञ्छितप्रदं धर्मं कुरु । यतः –

'राज्यं सुसंपदो भोगाः, कुले जन्म सुरूपता । पाण्डित्यमायुरारोग्यं, धर्मस्यैतत् फलं विदुः ।।१।।" तथा –

'जो पूएइ जिणिंदं, जस्स मणे जिणमयं सया रमइ । तस्सत्थेण घरेण च, चिंतामणिणा च का गणना ।।१।।"

इत्युपदेशेन स प्रातर्मध्याह्नपूजानियमद्वयं च तया ग्राहितः । अन्यदपि तया धर्मं कृत्यं च ग्राहितः । अन्यदा तया तस्य भोजनादनु शिरश्च कुरु विवरणम् । सुगन्धीं गोशीर्षचन्दनमूलीं लात्वा कान्दविकापणादीनाऽऽज्यं शेषकाष्टान्यप्यानाय्य विक्रापितानि,

दशलक्षसुवर्णमुपार्जितम् । ततो विशेषतो नियमेनोभयकालं प्रतिक्रमणादि करोति । एकदा प्रतिक्रामन् गृहं प्रदीपाकुतचौरैर्द्रव्याद्याह्रियमाणं दृष्ट्वापि गुणसुन्दरी परिजनादिना कलिकले क्रियमाणेऽपि न क्षुब्धा ततस्तुष्टः सुरः प्राह-तव प्रशंसा सुरेन्द्रेण कृता इत्युक्त्वा चिन्तामणिरर्पितः, तस्य च पुण्यपालेति नामाख्यातम् । ततश्चिन्तामणिप्रसादात् सार्थं कृत्वा गौडदेशं गत्वा भद्रगर्जदशसहस्राणि लात्वा भद्दिलपुरं प्रत्यागतः । हस्तिमार्गणे च स्वयं परीक्ष्य ग्राह्यमित्युक्ते राजा स्वयमागतो भोजनार्थं निमन्त्रितः मध्याह्ने सामग्रीं विनाऽपि तन्महिम्ना साश्चर्यो राजा भोजितः । गुणसुन्दरी चतुर्द्वारावासे विविधफलावलिकां तदितरेण पक्वान्नं शालिदालिघृतादि नवनववेषा परिवेष्य गता । भोजनान्तरं सुप्तेन राज्ञा आश्चर्यचित्तेन पृष्टं तव कति भार्याः । ततस्तेनोक्तं यावन्त्यो दृष्टाः, ततो गुणसुन्दर्या राजदत्तवेषं परिधायोक्तं राजन् ! सर्वोऽपि जनः पूर्व पुण्यप्रसादेन सुखं विलसति न तु तव प्रसादेनेति चिन्त्यम् । यत उक्तं च –

'पत्नी प्रेमवती सुतः सुविनयो भ्राता गुणालंकृतः, स्निग्धो बन्धुजनो सखाऽतिचतुरो नित्यं प्रसन्नः प्रभुः ।"

***निर्लोभोऽनुचरः परार्त्तिशमने प्राप्तोपयोगं धनं, पुण्यानामुदयेन सन्ततमिदं कस्यापि संपद्यते ।।१।।"** (सुभाषिताष्टकानि ७/३) तथा –

"धर्मोऽयं धनवल्लभेषु धनदः कामार्थिनां कामदः, सौभाग्यार्थिषु तत्प्रदः किमपरं पुत्रार्थिनां पुत्रदः ।
राज्यार्थिष्वपि राज्यदः किमथवा नानाविकल्पैर्नृणां, तत् किं यन्न करोति किञ्च कुरुते स्वर्गापवर्गावपि ।।२।।"

---

* स्वबन्धुसु मुनिः प्रायोपभोग्यं धनं प्र॰ प्र॰ छ ।

ततो राजा वैराग्याद् राज्यं त्यक्त्वा दीक्षां जग्राह । ततः पुण्यपालोऽपि न्यायेन राज्यं पालयन् विरराज, अन्ते दीक्षां लात्वा सिद्धः ।।४२२।।

अथ सर्वहिताचरणरहस्यमाह –

अलमित्थ वित्थरेणं, मुणिणा गयसव्वपावसंगेणं । झायव्वो परमप्पा, समेणमेवं हियायरणं ।।४२३।।

व्याख्या – अत्र हिताचरणाधिकारे विस्तरेणालं पर्याप्तम्, गतसर्वपापसंगेन मुनिना समेन समभावेन भावितात्मना परमात्मा वीतरागो ध्यातव्यः । एवं भावितात्मनो हिताचरणमिति ।।४२३।।

'जे मरूदेवाईआ सिद्धा, सिज्झंति पंचदसभेया । समभावचरणतवसा, हुंति सुरा पुव्वतवचरणा ।।४२४।।"

व्याख्या – ये मरुदेव्यादिका जीवा पञ्चदशभेदाः सिद्धाः, यत्तदोर्नित्याभिसंबन्धात् ते सर्वेऽपि समभावचरणतपसा वीतरागतः संयमेन सिद्धाः । न तु सरागसंयमेन, यतः –

'रागी बध्नाति कर्माणि, वीतरागो विमुच्यते । जना जिनोपदेशोऽयं, संक्षेपो धर्ममोक्षयोः ।।१०।।"

ये तु पूर्वतपश्चरणाः सरागतपः संयमिनस्ते तु सुराः सौधर्माद्यनुत्तरविमानान्तगामिनो देवा भवन्तीति । यत उक्तं च –

'कालियपुत्ते मेहलिथेरे, आणंदरक्खिए तईए । कासवए इय चउरो, पासावच्चिज्ज मुणिपवरा ।।१।।"

'अकहिसु तुंगियाए, सरागतवसंजमेण समणा वि । कम्मावसेसपडिबंधउया देवा हविज्जंति ।।२।।" (ऋषिमण्डल-४१-४२)

तत्संक्षेपस्वरूपं यथा – अन्नया तिलोयगुरू भगवं रायंगिहाउ णयराओ निग्गंतूण जणवयविहारं विहरति । तथा कालो य तुंगीया णाम णयरी अमरणयरीसहोअरा व पडिवसंति । तत्थ बहिया तं पुप्फवटि उज्ञाणमासि । तत्थ तुंगीयाए बहवो समणोवासगा परिवसंति ।

'अहिगयजीवा जीवा, इड्ढा दित्ता विपुलधणवाहणा । विछडि विपुलभत्तपाणे, जाव निग्गंथे पावयणे कुला ।।"

जाव वा दट्ठपुण्णिमासणीसु पडिपुण्णं पोसहं सम्ममणुपालेमाणा समणे णिग्गंथे फासु जाव पडिलाभेमाणा जाव अप्पाणं भावेमाणा विहरंति तीए णं तत्थ तुंगीयाए णयरी अन्नया कयाई पासावच्चिज्जा थेरा भगवंतो जाइ संन्ना जाव पंचहिं अणगारसहिएहिं विहरमाणा तुंगियाए णयरीए पुप्फवणचेई समोसढा, अह पडिरूवं उग्गहं गिण्हंताणं संजमेण तवसा अप्पाणं भावेमाणा विहरमाणा तुंगीयाए णयरीए सिंघाडग जाव बहुजणा एवं वयासी । जाव तहारूवाणं वंदणवत्तियाए, जाव कयकोऊयं मंगलपायच्छित्ता समागया, ते समणे वंदंति णमंसंति जाव पज्जुवासंति, तओ तेसिं थेरेहिं धम्मो कहिओ । तओ णं ते समणोवासगा धम्मं सोऊण हट्ठा तुट्ठा आयाहिणं पयाहिणं करेति एवं वयासी । संजमेणं भंते ! किं फलं ? तवे णं किं फलो तए णं थेरा एवं वयासी संजमेणं अज्जो अण्हयफले तवेण वोदाणफलं, तए णं ते समणं वो थेराणं एवं वयासी कहं णं भंते ! संजमेणं, अण्हयफले तवेण वोदाणफलो, किं पत्तियं भंते देवा देवलोएसु उववज्जंति । तत्थ आणंदरक्खिए घरे एवं वयासी कम्मियाए अज्जो देवा देवलोएसु उववज्जंति ।।१।। कालियपुत्ते थेरे ते समणोवासए एवं वयासी पुव्वतवेणं, देवा जाव

उववज्जंति तओ मेहन्निपुत्ते थेरे एवं वयासी । पुव्वसंजमेणं अज्झो देवा जाव उववज्जंति, तत्थ कासवे नाम थेरे एवं वयासी संगियाए अज्झो, देवा देवलोएसु उववज्जंति । पुव्वभवेणं पुव्वसंजमेणं कम्मियाए संगियाए अज्झो देवा देवलोएसु उववज्जंति । तव्वेणं एसे अट्ठे ते समणोवासया हट्ठा तुट्ठा ते समं वंदति नमंसंति, जामेव दिसिं पाओब्भूया तामेव पडिगया त्ति । एवं राजगृहे गौतमेनापि भगवता महावीरसमीपेऽपि एषा वक्तव्यता पृष्टा, विस्तरस्तु भगवती द्वितीयशते ५ उद्देशकतो ज्ञेयः । इति ग्रन्थान्ते अन्त्यमङ्गलार्थं मेरुदेव्यादिपञ्चदशभेदसिद्धगर्भित-गाथार्थः ।।४२४।।

इति तपागच्छेन्द्रश्रीहिरविजयसूरिराज्ये उपाध्यायश्रीसकलचन्द्रगणिविरचिते श्रीहिताचरणग्रन्थे विविधविषयस्वरूपः सप्तविंशोऽधिकारः समाप्तः

प्रशस्तिः

१. पसत्थी –

चरणसिरिभालचंदो, गुरुतवगणगयणभासणदिणिंदो । भविमणणयणाणंदो, इहासि आणंदविमलगुरू ।।१।।
कयमयपमायविजओ, तस पट्टंबरनिसिंदसमतेओ । सिरिविजयदाणसूरी, गणमुणिकप्पद्दुमो आसी ।।२।।
तस पट्टखीरसायररयणं, सिरिहीरविजयसूरिंदो । जयइ जयम्मि य संपई, जिणसासणकित्तिवित्थारो ।।३।।
गच्छेसस्स य मुणिणा, वायगसिरिसयलचंदणामेणं । सुसमणु सहियाचरणो रइउ गच्छहियायरणे ।।४।।
सुणिअव्वो मुणिअव्वो, भविए हिए भणिय गुणियव्वो । सोहेयव्वो य तहा, विबुहेहिं अमच्छरेहिं च ।।५।।
नहतिन्नछक्कइदूंवरसे, (१६३०) हरिसेणं निम्मिओ एसो । नंदउ जा जिणमग्गो, हियावहो जत्थ मुणियमग्गो ।।६।।
इति तपागच्छेन्द्र श्रीहीरविजयसूरीन्द्रराज्ये. उ. श्रीसकलचन्द्रविरचितो हिताचरणो ग्रन्थः ।।

पाठान्तरेण विशोधिता प्रशस्तिः –

चरणसिरिभालचन्द्रो, गुरुतवगणगयणभासणनिसिंदो । भविमणणयणाणंदो इहासि आणंदविमलगुरू ।।१।।

कयमयपमायविजओ, तस पट्टंबरदिणिंदसमतेओ । सिरिविजयदाणसूरि गणमुणिकप्पद्दुमो आसी ।।२।।

तस पट्टखीरसाययरयणं सिरिहीरविजयसूरिंदो । जयइ जयम्मि य संपइ, तिलोयजसकित्तिवित्थारो ।।३।।

तस गच्छे मुणिवइणा, वायगसिरिसयलचंदणामेणं । भवियजणहियायरणो, रइओ गंथो हियायरणो ।।४।।

सुणियव्वो मुणियव्वो, भवभवियनिवहेहिं । सोहेत्तीयव्वो य तहा, विबुहेहिं विमच्छरेहिं ।।५।।

नह-तिन्न-छक्क-इन्दू (१६३०) वरिसे, हरिसेणं निम्मिओ गंथो । नंदउ जा जिणपंथो हियावहो जत्थ मुणिपंथो ।।६।।

ग्रन्थगतविषयानुक्रमः ।

त्रिकालजिननामग्रहणपूर्वक वन्दनम् । क्षायोपशम-क्षायिकभावलब्धिमतां वन्दनम् । ऋषभ-बाहुबलि-श्रीवीरतपस्विनमनम् । नमस्कारोत्पत्तिद्वाराणि, कथापत्र-१० । गौतमाष्टापदचैत्यवन्दनम्, पत्र-११ । योग्यायोग्याचार्यस्वरूपम्, पत्र-१२ । सातवेदनीयकर्मकारणानि, पत्र-२० । श्रीशान्तिनाथसंबन्धः, असातवेदनीयमृगापुत्रकथा, पत्र-२५ । त्रिभुवनशाश्वतप्रतिमाशरणम्, वन्दनम् पत्र-२६ । अष्टविधानस्वरूपं औदारिकादिशरीराणि पत्र-२७ । मायायां वेसाकथा, पत्र-२९ । दर्शनानां प्रधानदर्शनम्, पत्र-३० । सत्यहिताचरणे ज्ञानाचारस्वरूपम्, पत्र-३१ । कालाचारे शानदेवी-आभीरीरूपकथा पत्र-३५ । विनयनैमित्तिकद्वयदृष्टान्तम्, पत्र-३५ । दिन्नं त्रिवेगस्स

नियमपच्छिं कथा पत्र-३५ । उपधायोग विषयकथा पत्र-३६ । नापितदृष्टान्तः, पत्र-३७ । व्यञ्जनार्थ-तदुभयपरावर्त्ते सिद्धसेन. ४० । व्यञ्जनन्यूनमन्त्रविद्याभणिते श्रेणिककथा-३७ । असत्यहिताचरणानि, पत्र-४४ । अशुभदीर्घायुःकारणम्, पत्र-४६ । रोहिणा-नागसिरीकथा, पत्र-४६ । सहचारिणी चेतनाकर्मण्यच्छदिता सम्यक्त्वसप्ततिगा. पत्र-४८ । अर्हद्दासाष्टभार्याकथा, अथ चारित्रहिताचरणम्, गुरुशङ्कायां जङ्गलकथा, धर्मे निःशङ्कतायां मुचभट्टः, दर्शनाचारे श्रीधरः धर्मस्य फलनिःसंदेहे जिनदत्तकथा, देशविरतिहिताचरणे श्राद्धकृत्यानि, जिनदास-संबल-कंबलकथा, पालगोपालकथा, प्राणातिपातादिविरमणम्, इर्याया भाषाया एषणायाः कथा, नन्दिषेणादिकथा, धर्मरुचिकथा, प्रतिमाप्रतिपन्नश्राद्धकथा, नागदत्तादिकथा, तपाचारस्वरूपम्, विस्तरेण पत्रे सागरदत्तकथा, वीर्याचारविषये बहवो दृष्टान्ताः, निश्चयनय-व्यवहारनयादि, निरीहमुनिसिद्धवन्तगाथा-६४ । मुनीनां जिनपूजागाथा, गुरुकटुवचनमपि मधुरं-रूप्यचन्द्रकथा अहिताचरण-इह-परभवदुचेष्टितं निन्दति गर्हति च, इन्द्रियसंवरे संभिन्नस्रोतादिलब्धयः, श्रवणेन्द्रियविषये भद्रादिकथाः, चिन्तार्थकरणे समर्थो निजधर्मयुक्तः जिनास्तु स्वयं परतारणे असमर्थाः, भिक्षुप्रतिमा-श्राद्धप्रतिमा बलं हितं, कार्तिक श्रेष्ठिदृष्टान्तः, निजहितविकलानि शम्बलाशम्बलकम्बलकथा, मूषककथा, यत् पश्चात् पश्चात्तापकरं तनुक्रियते, शसिराज-मथुरामङ्गुआचार्यकथा, किं विषयविषस्य विषयः, नयनावली-रुन्द्रदत्तकथा, हृदयाकृष्णराजीगाथा, कृष्णाष्टमी समा लेश्या गाथा-८७, युगलिकचक्रि हरिसुरसुखहेतुः, मुनिदानादिपुण्यवन्तः, चन्दना-मूलदेव-सालिभद्रकथा, नारीनरादि अष्टमीतपः, अण्डजादिवस जीवाः, (प्रथमशतम्) रविचन्द्रग्रहादिपरिग्रहस्वरूपम्, नन्दनृपकथा,

नरणादिग्रहणयोग्याकासु गतिः, दुर्लभमनुष्यादिमतिपदानि, अंबाणयाइ पयाणि गाथा-४०७, कण्डरीक-पुण्डरीक कथा, नन्दिषेणकथा, सिरि धम्मधम्मशिष्यकथा, ज्ञानदानाभयदानधर्मोपष्टम्भदानम्, धनदेव-धनमित्रकथा, शय्यादाने वङ्कचूलकथा, अभयदाने मन्त्रिदासीकथा, पात्रापात्रदानस्वरूपम्, शीलधर्मे चरणकरणसित्तरी, तपोधर्मः, अज्ञानिअग्रिशर्मतपोरूपवाच्यम्, भावनायां – अनित्यभावनायां करकण्डूकथा, अशरणके दुर्मुखः कौशाम्बी-सुलोचनराजकथा, एकत्वभावनायां मधुराजकथा, एकत्वे नमिराजकथा, अन्यत्वभावनायां गन्धारनृपतिगई, अन्यत्वे धनकथा, संसारभावनायां - नरकगतिगमने भीमकथा, मांसभोगकुञ्जरस्य कथा, महारम्भे अघलकथा, अथ तिर्यग्गति, एकेन्द्रिये धनप्रियकथा, विकलेन्द्रिये प्रियङ्गुवणिक्वत् क्षुल्लकवनमहिषः तथा समुद्रदत्तवत् महिषः, अङ्गारमर्दकवत् करभः मधुवत् मेघो, दृढरथवत् शूकरः, सुमित्रवत् मत्स्यो भवति, अथ मनुष्यगतिसंसारः विविधपत्ते नरत्ते विय सुद्धगोत्तमित्यादीनि गाथा-१९७ विक्रमनृपकथा, केसिं कुम्भजणयदुक्खमित्यादिगाथाष्टदेवगतिस्वरूपम्, धरणिधरकथा, वेताम्बिकराजकथा, अकामनिर्जरया जम्बूको देवो जातः, बालतपस्विविषये तामलिअग्रिशर्म, अशुचिभावनायां कदम्बविप्रकथा, आश्रवभावना संवरभावनिर्जरा भा. गाथा-२३९ धर्मभावना विशिल्पाकथा, सनत्कुमारेन्द्रस्वरूपम्, लोकभावना, दुर्लभबोधौ मेतार्यः तथा अरिहदत्तौ, समरादित्यचरित्रे बप्पभट्टसूरिः, को सङ्घगुणायारो २७९ श्राद्धद्वारगाथा, रथयात्रा, मायास्वरूपं, सामारुद्रदेवकथा, धनतृष्णायां अणहगेण चन्द्रसार बन्धुर्हत् कथा, पण्डितमरणे सीहनृपकथा, उन्नतपुरुषा मा गा. २९५ मार्गणास्थानम् । साधुगोष्ट्यादिपदानि पत्र बुद्धिकला कामधेनुवत् पत्र रोहादिकथा । साधा मति-श्रुतादिज्ञानविचारः,

अल्पश्रुतपठने यवराजकथा, गीतार्थजाता जाता, अगीतार्थे ईश्वरसाधुकथा, योग्यायोग्यधर्मे प्रदेशिराजकथा, स्थविरामूर्खकथागाथा निगोदलोकस्व. गाथा पुद्गलपरावर्त्तः सगोयिकसम्यक्त्वप्रथमलाना निचय धर्मस्वरूपम् । व्यवहारनये लिङ्गग्रहणम्, परदाराभोगे सत्यकीकथायां कामासक्तारेवती कथा, सावद्याचार्यकथा, कालिकाचार्यकथा, वेदरचनायां नारद-पर्वतकथा, कर्म-जीवयोः सबल-निर्बल मनमद्यघटाय कथा, आसीविष विषयः, चोरिक्कपराभ्याख्याहिंसा धर्मतपसकथा, अध्ययनसायादिमरणे सोमिलकथा, राज्यकार्यचिन्तायां चेटकराज-कुमारपालादीनां वृषभा उत्तमादिषट्पुरुषाः । दुष्टा शीलनारी तिलभट्टाकथा, शीलवती उदारचित्ता अच्छंकारी परदूषणदाने सीता गुणसुन्दरी ।

इति तपागच्छेन्द्र श्रीहीरविजयसूरिराज्ये उपाध्यायश्री सकलचन्द्रगणिविरचिते श्रीहिताचरणग्रन्थे द्वितीयो विभागः समाप्तः ।। इति श्रीहिताचरणग्रन्थः समाप्तः ।।

जगद्गुरुश्रीहीरसूरीश्वरराज्ये उपाध्यायश्रीसकलचन्द्रगणिविरचितं स्वोपज्ञवृत्तिसमेतं

॥ श्रीहिताचरणम् ॥

द्वितीयो विभागः

(१६-२७ अधिकार)

: संशोधका : सम्पादकाश्च :

पू. पंन्यासप्रवरश्रीपुण्यकीर्तिविजयगणिवर्याः

